
अथ षष्ट प्रकरणम्

तत्र सारणीतो शरसाधनं निरूप्यते । भौमस्य मन्दकेन्द्रं यथामतं[१] ग्राह्यं । गुरौ विंशतिन्मिता[२]नंशान विशोध्ये[३] ग्राह्यं, शनौ पंचाशदंशान[४] संयोज्य ग्राह्यं, तेभ्यः कलाभिधं ग्राह्यं, तच्चोपरितन पंचदश पंक्तिषु चेत् तदा स्पष्टशीघ्रकेन्द्रेण तृतीयकोष्टाद् ग्राह्यं, तेभ्यो वहिश्चेत्तदा चतुर्थकोष्टकेषु ग्राह्यं, तत्कलाभिधेन संगुण्य प्रथमधातः[५] उत्तरशरो भवति । द्वितीये दक्षिणशिरः[६] बुधशुक्रयोः स्पष्ट-शीघ्रकेन्द्रात्तृतीयचतुर्थकोष्टकाभ्यां द्वितीयतृतीयशरौ ग्राह्यौ, यदि बुधस्य स्पष्ट-मन्दकेन्द्रं उपरि पंक्तौ चेत्, तत्र तृतीयशरे तस्यैव दशमांशः शोध्यः, यदि तत्र नास्ति, तदा योज्यः, पुनस्पष्टमन्दकेन्द्रं शुक्रस्य नवत्यंशान्वितं कार्यं, बुधे समुत्प[७]-त्तरशतद्वयमंशा योज्या[८] । पुनरेभ्यो कलाभिधं ग्राह्यं, द्वितीयशरेण संगुण्य द्वितीय-स्पष्टशरो भवति । एतद्वयं चेत् उपरिपंक्तिषु लभ्यते अथवा अधस्तनपंक्तिषु लभ्यते । तदा दक्षिणदिशि भविष्यति, वोत्तरदिशि भविष्यति । पुनः शुक्रे यथा गतमन्दकेन्द्र[९] ग्राह्यं, बुधे[१०] मन्दकेन्द्रभार्द्धांशान् संयोज्य कलाभिधं ग्राह्यं, तच्च तृतीयशरेण संगुण्यं, तत्र स्पस्टमन्दकेन्द्रं उपरितनपंक्तिषु स्पष्टशीघ्रकेन्द्रं च भार्द्धांशान्न्यूनं अथवा अधस्थपंक्तिषु चेत् तदा तृतीय शरः उत्तरदिक्को भवति[११] ।

(ख) १. यथागतं for (यथामतं) २. विंशतिमिता for (विंशतिन्मिता)

३. नंशानविशोध्य for (नंशानविशोध्ये)

४. दंशान् for (दंशान) ५. घातः for (धातः)

६. शरः for (शिरः) ७. सप्तत्युत्तर for (समुत्पत्तर)

८. योज्याः for (योज्या)

९. केन्द्रं for (केन्द्र)

१०. बुधमन्दकेन्द्रे for (बुधेमन्दकेन्द्र)

११. + तदन्यथात्वे दक्षिणदिक्को भवति +

Indira Gandhi National Centre for the Arts

पुन द्वितीया[1] वृत्या गता[2] कलाभिधानां वर्गा[3], कार्या[4] तत् षडंशः शुक्रार्थं ग्राह्यः, अर्द्धपादोनं च बुधार्थं ग्राह्यं, इदं प्रथम शरे ।

अथ त्रयानामप्येकदिक्त्वे योगः कार्यः, भिन्न दिक्त्वेन्तरं कार्यं तदा स्पष्ट[5]-शरो भवति ।

इति षष्ट प्रकरणम्

(ख) १. द्वितीया for (द्वितीया)   २. गत for (गता)
३. वर्गाः for (वर्गा)   ४. कार्याः for (कार्या)
५. स्पष्टः for (स्पष्ट)

—:o:—

Indira Gandhi National Centre for the Arts

अथ सप्तम प्रकरणम्

तत्र पंचग्रहाणामुदयास्तौ निरूप्यते[1]। उदयास्तादौ सूर्येण एतेषामन्तरं समानं न भवति। यथा नक्षत्रेषु अस्य कारणत्रयमस्ति। एकस्त्विदं[2] एतेषां प्रमाण-मेकरूपं नास्ति। द्वितीयं च क्षितिजक्रान्तिवृत्तसंपातः एकरूपो नास्ति। तृतीयं[3] च शरा एक रूपा न सन्ति। अथवा[4] क्षितिजं जदा[5]क्रान्तिवृत्तं हचिन्हं लग्नं वा सप्तमस्थानं जअचिन्हमुत्तरादिक् दचिन्हं सूर्यचिन्हं दमव[6] दृग्वृत्तं हचिन्हं उदय-स्थानमथवास्तस्थानं शररहितग्रहस्य कल्पनीयं, व चिन्हं उत्तरशरग्रहस्थानं तचिन्हं दक्षिणशरग्रहस्थानं पुनर्वचिन्हात्[7] वकलम्वतललम्वौ जदरेखायां निष्का-श्यौ, एतौ द्वौ शरौ भवतः। वदचापज्ञानमस्माकजिघृमस्ति[8]। इदं प्रकटमस्ति। वदचापं ग्रहविंवासाम्येन एकरूपं न भविष्यति।

अथाल्पबिंवस्य ग्रहस्यार्थं महच्चापं भविष्यति। महद्विंबस्य चल घुचापं भविष्यति। वदचापस्यैकरूपाभावत्वेन हदचापमप्येकरूपं न भविष्यति, यदि वदचापमेकरूपं कल्प्यते। क्षितिजक्रान्तिवृत्तसंपातोत्पन्नकोण[9] एकरूपश्च[10] न भवति[11]। तदापि हदचापमेकरूपं न भविष्यति। यदि कोणा अप्येकरूपाः कल्प्यंते शरा एकरूपाः न भवन्ति। यथा ग्रहो च चिन्हे वा तचिन्हेस्ति। तदा दहचाप-स्थाने दकचापं भविष्यति। वा दलचापं एते च न्यूनाधिके स्तः। तस्मात् वद-चापज्ञानार्थं ग्रहवेधोपेक्षितो भवति।

(ख) १. निरूप्येते for (निरूप्यते)
२. एकं त्विदं for (एकस्त्विदं)
३. तृतीयश्च for (तृतीयं च)
४. अथ अवक्षितिजं for (अथवाक्षितिजं)
५. जदं for (जदा)
६. दभवं for (दमव)
७. + तचिन्हात् +
८. मिष्टमस्ति for (जिघृमस्ति)
९. कोणा for (कोण)
१०. रूपाश्च for (रूपश्च)
११. भवन्ति for (भवति)



अथ बहुभिर्वेधे:[१] इदमाकूतं, उदये एतेषां ग्रहाणामिदमन्तरमस्ति। तद्यथा शनौ १४।० गुरौ १२।४५ भौमे १४।३० शुक्रे पश्चिमदिशि ५।४० बुधे पश्चिमदिशि ११।३०।

अथ ह् चिन्हं कर्कस्थानं कल्पितं। एतदेव शनिगुरुभौमेषु लग्नस्थानं बुधशुक्रयो: सप्तमस्थानं कल्पितं, एतच्च तस्मिन् देशे कल्पितं, यत्रेदं[२] परमदिनमानं होरा १४ क १५ तत्राक्षांशा: ३३[३]। तस्मिन् क्षितिजे वहदकोण: ५१।३०, अस्या ज्या कोटिज्ययोर्निष्पत्ति[४] तथास्ति, यथा सप्तचत्वारिंशत: ४७ सार्द्धसप्तत्रिंशता ३७।३० निष्पत्तिरस्ति। पूर्वप्रकारैरिदमपि ज्ञायते। यदा शनिगुरुभौमा: कर्कादिस्था भवन्ति। शीघ्रोच्चाच्चैतेषांमन्तराप्येक[५]रागेन्यू[६]नानि भवन्ति। तदैतेषां शरा: नितांतं स्वल्पा: भवन्ति। भौमस्य च शरो द्वादश कलाभ्योधिको न भवति। तस्मात् हदरेखा शनौ गुरौ च भौमे कदरेखा सूर्यादितेषां स्पष्टान्तररूपास्ति। वकं भौमशरोस्ति, ०।१२ कह्[७] ०।१० दकं १४।३० तस्माद्दहरेखा शनौ १४।० गुरौ १२।४५ भौमे १४।४० वदं शनौ ११।० गुरौ १०।० भौमे ११।३०।

अथ बुधशुक्रयो: प्रोक्तांतरे यदा पश्चिमोदयो भवति, तदा स्पष्टोर्क[८]शुक्रोदये २।२४।२० बुधोदये च २।१८।३० मध्यमार्क:[९] शुक्रे २।२४।२४ बुधे २।१९ शुक्र शीघ्रकेन्द्रं १४।० बुधस्य ३२[१०] शुक्रशर: १।० बुधस्य १।४० इदं कवचापमस्ति। तस्मात् कह् चापं शुक्रे ०।४५ बुधे १।२० दहं[११] शुक्रे ६।२५ बु० १२।५०वदं शु० ५।० बु० १०।७ एतानि चापानि तत्रै तेषामुन्नतांशा जाता:। इदमेवास्मकमिष्टम्[१२]।

इति सप्तम प्रकरणं समाप्तम्

(ख) १. बहुभिर्वेधैरिद for (बहुभिर्वेधे: इद)
२. यत्र for (यत्रेदं) ३. ३३।३३ for (३३।)
४. र्न्निष्पत्ति: for (र्निष्पत्ति) ५. मन्तराण्येक for (मन्तराप्येक)
६. राशेन्यूनानि for (रागेन्यूनानि) ७. कहं for (कह्)
८. स्पष्टोर्क: for (स्पष्टोर्क) ९. मध्यमोर्क: for (मध्यमार्क:)
१०. ३२।२४ for (३२) ११. इदं for (दहं)
१२. इदमेवास्माकमिष्टं for (इदमेवास्मकमिष्टम्)

अथाष्टम प्रकरणम्

तत्र बुधशुक्रयोस्तोदये[1] यानि साश्चर्याणि वस्तूनि भवन्ति । तानि निरूप्यंते । तत्र शुक्रस्य पश्चिमास्तात्पूर्वोदयपर्यंतं मांतराश्योदौ[2] परमकालो दिनद्वयतुल्यो भवति । कन्याराश्यादौ षोडशदिनात्मको भवति[3] ।

अथ शुक्रार्थं पूर्वोक्तप्रकारेण क्षेत्रं कार्यं, ह चिन्हं मीनादिः कल्प्यः, शुक्रशर उत्तरः ६।२० प्रकल्प्यः । अयं नीचोच्चवृत्ते नीचस्थाने कल्पितः । तस्मात् तस्मिन् देशे वहदकोणः पश्चिमास्तसमये ७७ पूर्वोदये ३४।३० । प्रथमक्षेत्रे समकोणस्यैकभुजः ५८।३० । द्वितीये ३४।०[4] द्वितीयभुजः प्रथमक्षेत्रे १३।३०, द्वितीये ४६।३०, दव रेखा ५।० तस्मात् प्रथमक्षेत्रे दहरेखा ५।८, द्वितीये ८।४६, वकंशर[5] ६।२० कहं प्रथम क्षेत्रे १।३० द्वितीये ६।१३ कदशेषं सूर्यग्रहांतरं ३।३८ प्रं[6] द्वितीये ०।२४ तस्मात् ग्रहो पश्चिमास्तात्पूर्वोदयपर्यंतं त्रिभि[7] ३ रंशैश्चतुर्दशकलाभि ३।१४ विलोमश्चलितः । तत्र नीचोच्चवृत्तनीचदिशि शीघ्रचापमस्मिन्प्रमाणे १।१५ ग्रहः स्वशीघ्रगत्या दिनद्वयेनैतच्चापतुल्यं चलति । पुनः पूर्वोक्तक्षेत्र[8] ह चिन्ह कन्यादिस्थानं कल्पितं, शुक्रशरो दक्षिणः ६।२० वहदकोणः पश्चिमास्ते ३४।३० पूर्वोदये ७७ ।

अथ समकोणस्य भुजाः निष्पत्तयः शराश्च पूर्वोक्तवत्स्युः । तस्मात् हदं पश्चिमास्ते ८।४९ पूर्वोदये ५।८ लहं ६।३१[9] दलं १८।२६।३८ अस्य शीघ्रकेन्द्रं

(ख) १. शुक्रयोरस्तोदये for (शुक्रयोस्तोदये)
२. मीनराश्यादौ for (मांतराश्योदौ)
३. + अथ बुधे वृश्चिकासे पश्चिमदिश्युदयो न भवति +
४. ३४।३० for (३४।०)
५. शरः for (शर)
६. प्र० for (प्रं)
७. त्रिभिरंशै for (त्रिभि ३रंशै)
८. क्षेत्रे for (क्षेत्र)
९. ६।३१।१।३० for (६।३१।३०)





७।३०।२।३० । तत्र ग्रहः पश्चिमास्तात् पूर्वोदयपर्यंतं अनयोर्योगतुल्यं गमिष्यति। तयोर्योग: १० तद्गमनदिनानि १६ ।

अथ बुधार्थमुपरितनक्षेत्रे[1] ह चिन्हं वृश्चिकादिः वा वृषादिः कल्पितः। तस्मात्स्वहह[3]कोण: ३४।३० समकोणस्यैकभुज: ३४।० द्वितीयभुज: ४९।३० वद-चापं १०।० तस्मात् दहं १७।३९ शर: तलचापाभिधानं वृश्चिके ३।०[4] वृषे ३।६ तस्मात् हल[5]वृश्चिके ४।२२ वृषे ४।२७ दलं वृश्चिके २२।१ वृषे २२।१६ उदय समये ऽस्मिनन्तरे ग्रहोपेक्षितः पुनर्वृश्चिकादौ २०।५८ अस्मादधिकमन्तरं न भवति। वृषादौ २२।१३ अस्मादधिकं न भवति।

इति अष्टमप्रकरणं समाप्तम्

(ख) २. + १० +
२. बहदकोण: for (स्वहह)
२. लहं for (हल)

१. क्षत्रे for (क्षेत्रे)
१. ३०।० for (३।०)

—:०:—

अथ नवम प्रकरणम्

अस्तोदयसमये एतेषां सूर्यादन्तरमन्न[1] निष्काश्यते । पूर्वोक्तप्रकारेण ज्ञातं वदचापं यदि भवति, राशीनां ह चिन्हमादिः कल्प्यते । तदा वहदकोणः दहचापं वकचापं वा लतचापं विदितं भविष्यति । पुनः कहचापं वा हलचापं पुनर्दक-चापं दलचापं च विदितं स्यात् । मया तस्मिन् देशे अन्तरचापानि पंचग्रहाणां निष्काश्य सारिण्या[2] लिखितानि सन्ति ।

इति नवम प्रकरणं समाप्तम्

(ख) १. मत्र for (मन्न) २. सारिण्यां for (सारिण्या)

—:०:—

Indira Gandhi National Centre for the Arts

अथ दशम प्रकरणम्

तत्र सारिणी कोष्टका[१]: लिख्यन्ते ।

राशि	उ. प्रातः पूर्व श. अं. क.	अस्त संध्यायाः पश्चिम अं. क.
०	२२।३०	११।२८
१	२१।१७	११।२४
२	१।१२	१२।२६
३	१४। ६	१४। २
४	११।३४	१५।३४
५	१०।५३	१८।१६
६	१०।४८	१७। ७
७	१०।५३	१६।१३
८	११।३४	१५।३१
९	७। २	१४। २
१०	१७।५२	१२।२६
११	२१।५७	११।४१

(ख) १. कोष्ठकाः for (कोष्टकाः)

Indira Gandhi National Centre for the Arts

राशि	उदयः प्रातः पूर्व०वृ० अं क.	अस्त संध्यायाः पश्चि० अं. क.
०	२०।१०	१०।१९
१	१६। ६	१०।२९
२	१५।११	११।१०
३	१२।४८	१२।४६
४	१०।३४	१४।३१
५	१०।३०	१६।१२
६	६।१७	१६।३४
७	६।४१	१६।१२
८	१०।४०	१४।३१
९	१२।४६	१२।४८
१०	१५।५१	११।१०
११	१६। ६	१०।२९

राशि	उदयः प्रातः पूर्व अं. क.	अस्त संध्यायाः पश्चिम अं क.
०	२१।१२	११। ६
१	२०।१८	११।४८
२	१७।२१	१२।३०
३	१४।३३	१४।३३
४	१२।१८	१७।१५
५	११।४६	२०। ५
६	११।३८	२१। ९
७	११।४८	२०।१९
८	१२।३४	१७।३२
९	१४।४५	१४।४५
१०	१७।३५	१२।१५
११	२०।३६	११।४२

Indira Gandhi National Centre for the Arts

राशि	उदय संध्या शु. अं. क.	अस्त संध्यायाः अं. क.	उदय प्रातः अं. क.	अस्त प्रातः अं. क.
०	५।१०	४। ९	३। ०	१०।२८
१	५। ८	४।१६	६।१६	९।४०
२	५।१२	५। ७	९।५९	७।३६
३	५।३६	५।२३	९।५०	५।५९
४	६।१६	१३। ३	८। २	५। ५
५	७।२२	१८। २	६।३८	४।५४
६	७।१३	१७।१३	५।४१	४।५४
७	८।३०	१३।४७	५।२८	४।५५
८	७।४९	८। १	४।३९	५।१६
९	६।१५	४। ८	२।४३	६।३५
१०	५।११	३।१६	१।३०	८।३३
११	५।२२	३।१८	०।२४	१०।१६

राशि	उदय संध्या अं. क.	अस्त सध्या बु. अं. क.	उदय प्रातः बु. अं. क.	उदय संध्या अं. क.
०	९।५८	९।४३	२३।५८	२३।३८
१	१०। ४	१०। ५	२२।१५	२२।१५
२	१०।१८	११।४७	१८। ०	१६।४४
३	११।२२	१५।३४	१४। ४	१२।३०
४	१३।४३	१९।५९	११।२५	१०।२९
५	१८। १	२३।५५	१०।२१	९।१९
६	२२।४९	२३।५६	९।५१	१०। ०
७	२५। १	२२। १	९।५१	१०। ९
८	१८।११	१७।२५	९।२५	११।१९
९	१३।५४	१२।१०	९।३६	१४। ५
१०	११।१०	९। ७	१२।२६	१७।५०
११	१०।११	९।४३	१९।१५	२१।४६

Indira Gandhi National Centre for the Arts

ख

राशि	उदयः प्रातः पूर्वे	श	अस्तः संध्याया पश्चिमे
०	१३।३०		११।२८
१	२१।१७		११।४४
२	१७।१२		१२।२६
३	१४। ९		१४। २
४	११।३५		१५।३४
५	१०।५३		१८।१६
६	१०।४८		१७। ७
७	१०।५३		१६।१३
८	११।३४		१५।३१
९	७। २		१४। २
१०	१७।५२		१२।२६
११	२१।५७		११।४१
		वृ	
०	१०।१०		१०।१९
१	१९। ६		१०।२९
२	१५।११		११।१०
३	१२।४८		१२।४६
४	१०।३४		१४।३१
५	१०।३०		१६।१२
६	९।१७		१६।३४
७	९।४१		१६।१२
८	१०।४०		१४।३४
९	१२।४६		१२।४८
१०	१५।५१		११।१०
११	१९। ६		१०।२९

ख

राशि	उदयः प्रातः	अस्तः संध्यायां
	मं	
०	२१।१२	११। ६
१	२०।१८	११।४८
२	१७।२१	२२।३०
३	१४।३३	१४।३३
४	१२।१८	१७।१५
५	११।४६	२०। ५
६	११।३८	११। ९
७	११।४८	२०।१९
८	१२।३४	१७।३२
९	१४।४५	१४।४५
१०	१७।३५	१२।६५
११	१०।२६	११।४२
	उदयः संध्यायां	शु. अस्तः संध्यायां
०	५।१०	४। ९
१	५। ८	४।१६
२	५।१२	५। ७
३	५।३६	५।२३
४	६।१६	१३। ३
५	७।२२	१८। २
६	७।१३	१७।१३
७	८।३०	१३।४७
८	७।४९	८। १
९	६।१५	४। ८
१०	५।११	३।१६
११	५।२२	३।१८

ख

	उदयः प्रातः	अस्तः सन्ध्या
	अं क.	अं. क.
०	३। ०	१०।२८
१	६।१६	६।४०
२	६।५६	७।३६
३	६।५०	५।५६
४	८। २	५। ५
५	६।३८	४।५४
६	५।४१	४।५४
७	५।२८	४।५५
८	४।३६	५।१६
९	२।४३	६।३५
१०	१।३०	८।३३
११	०।२४	१०।१६

राशि	उदयः संध्या	अस्तः संध्या
	अंः क.	अं क.
	बु०	
०	६।५८	६।४३
१	१०। ४	१०। ५
२	१०।१८	११।४७
३	१२।२२	१५।३४
४	१३।४३	१६।५६
५	१८। १	२३।५५
६	२२।४६	२३।५६
७	२५। १	२२। १
८	१८।११	१७।२५
९	१३।५४	१२।१०
१०	११।१०	६। ७
११	१०।११	६।४३

Indira Gandhi National Centre for the Arts

ख

	बु०	
	अं. क.	अं. क.
०	२३।५८	२३।३८
१	२२।१५	२२।१५
२	१८। ०	१६।४४
३	१४। ४	१२।३०
४	११।२५	१०।२६
५	१०।२१	६।१६
६	६।५१	१०। ०
७	६।५४	१०। ६
८	६।२५	११।१६
९	६।३६	१४।३५
१०	१२।२६	१७।५०
११	१६।१५	२१।४६

इति दशम प्रकरणं समाप्तम्

—:०:—

सम्राट् सिद्धान्ते

यंत्राध्यायः

समृाट् सिद्धान्ते

यंत्राध्याय:

श्री महागणपतये[१] नमः । श्री सरस्वत्यै नमः ।

गजाननं गणाधिपं सुरासुरार्चितं सदा ।

समस्तभक्तकामदं शिवासुतं सुखप्रदं ॥

[२]वितंडचंडयोगिनीसमाजमध्यवर्त्तिनं ।

प्रशस्तभूतिभूषितं नमामि विघ्नवारणम् ॥१॥

लक्ष्मीनृसिंहचरणांबुरुहं सुरेशवंद्य समस्तजनसेवितरेणुगन्धं ।

वाग्देवतां निखिलमोहतमोपहंत्रीं वन्दे गुरु गणितशास्त्रविशारदं च ॥२॥

श्री गोविंदं समाहूया[३]दिविबुधान्वृन्दाटवीनिर्गतान्,

यस्तत्रैव निराकुलं शुचिमनोभावः स्वशक्त्यानयत् ।

म्लेच्छान्मानसमुन्नतान्स्वतरसा निर्जित्य भूमण्डले,

जीयात्[४] जयसिंहदेवनृपतिः श्रीराजराजेश्वरः ॥३॥

करं जनार्द्दनं नाम दूरीकृत्य स्वतेजसा ।

भ्राजते दुःसहोऽरीणां यथा ग्रैष्मो दिवाकरः ॥४॥

राजाधिराजो जयसिंहदेवो यो मत्स्यदेशाधिपतिश्च सम्राट् ।

श्रीरामपादांबुजसक्तचित्तो यज्वा सदा दानरतः सुशीलः ॥५॥

गोलादियन्त्रेषु नवीनयुक्तिप्रचारदक्षो गणितागमज्ञः[५] ।

सत्यप्रियः सत्यरतः कृपालुस्तिग्मप्रतापो जयति क्षमायां ॥६॥

(घ) ५. गणितामज्ञः for (गणितागमज्ञः)

(ङ) १. श्रीमन्महागणपतये for (श्रीमहागणपतये)
२. वितन्द्र for (वितण्ड)
३. समाह्वयादि for (समाहूयादि)
४. + श्री +

Indira Gandhi National Centre for the Arts

येनेष्टं वाजपेयाद्यं महादानादिषोडश ।[१]
दत्तानि द्विजवर्येभ्यो गोग्रामद्विपवाजिनः ॥७॥
स धर्मपालो गणितप्रवीणान् ज्योतिर्विदो गोलविचारदक्षान् ।
कारूंस्तथाहूय च कारवेधं[२] गोलादियन्त्रैद्युसदां च भानां ॥८॥
तेन श्रीजयसिंहेन प्रार्थितः शास्त्रसंविदा ।
करोति श्रीजगन्नाथः सम्राट्सिद्धांतमुत्तमं ॥९॥

अथ वेधोपयोगिनि यन्त्राणि प्रोच्यतेऽधुना[३]—

नाडीयन्त्रं गोलयन्त्रं दिगंशाख्यं तथैव च ।
दक्षिणोदक्भित्तिसंज्ञं वृत्तषष्ठांशकं तथा ॥१०॥
यन्त्रसम्राडिति ख्यातं यन्त्राणामुत्तमोत्तमं ।
जयप्रकाशं तद्वच्च सर्वयन्त्रशिखामणिः ॥११॥

अथ नाडीवलयस्वरूपमुच्यते—

अभीष्टदेशे काष्ठमयं पलभाक्षेत्रद्वयं विधायाऽभीष्टसमान्तरेण पूर्वापररेखायां कर्मकारहस्तमितां पीठिकां कृत्वा तदुपर्युभयतः पलभाक्षेत्रद्वयं स्थापयेत् । तत्कर्णसमानभूमिकायां यथा तत्पालिगत दृष्ट्वा[४] वेधसौकर्यं स्यात्तथा वृत्तं कार्यं, तन्नाडीवलयं भवति । तत्केन्द्रमवश्यं ध्रुवाभिमुखं भवति । पुनः पलभाद्वयं दूरीकृत्य सुधया श्लक्ष्णं विधाय भांशांकितं षष्टिघद्यंकितं[५] च कार्यं । यथाभागचतुष्टयं समं भवति तथा पूर्वापरसूत्रांकितमूर्ध्वाधरसूत्रांकितं[६] च कार्यं । तत्केन्द्रे सूत्रं निधाय केनचिदाधारेण ध्रुवाभिमुखं स्थिरं कृत्वा ततस्तत्पालिगतयष्टिकया[७] सूत्रगतदृष्ट्वा[८]

(घ) ३. प्रोच्यंते for (प्रोच्यते) (ङ) ४. दृष्ट्या for (दृष्ट्वा)
५. घटयंकितं for (घद्यंकितं) (ङ)
६. मधराधर for (मूर्ध्वाधर) ७. पष्टिकया for (यष्टिकया) (ङ)
८. दृष्ट्या for (दृष्ट्वा)

(ङ) १. महादानानि for (महादानादि) २. वेदं for (वेधं)
६. 'सूत्रांकितमूर्ध्वाधर' लुप्त

Indira Gandhi National Centre for the Arts

ग्रहर्क्षादिकं वेध्यं। ऊर्ध्वस्थानाद्वेधस्थानान्तं नतकालो ज्ञेयः। इति नाडी वलय-यन्त्रं। अस्मिन्नुत्तरगोलस्थानां ग्रहर्क्षाणां वेधो भवति। दक्षिणगोलस्थानो[1] न भवति तेनेदं नादृतं।

अथ गोलयन्त्रमुच्यते—

धातुमयं चतुरंगुलपिंडयुतं कर्मकारहस्तचतुष्टयमितव्या वृत्तद्वयं भांशांकितं कृत्वा भाद्धांशान्तरे योजनीयं। यथा समकोणचतुष्टयं भवति तयोर्मध्ये एकं क्रान्तिवृत्तमपरमायनवृत्तं कल्पनीयं। आयन[2]वृत्ते कदम्बस्थानद्वये वृत्तोभयतोंतर्बहिश्च निःसृतं कीलद्वयं मूषायां वातदुत्पत्तौ तत्संलग्नमेव कार्यं। पुनस्तस्मिन्नेवायनवृत्ते ध्रुवस्थाने कीलद्वयं तथा संयोज्यं यथा वृत्तात् किंचिद्बहिर्गतं भवति। पुनः कदम्बद्वयकीले बहिर्निःसृते एकं वृत्तं कदम्बसंज्ञमायनवृत्तान्तर्गतं द्वितीयमायनवृत्ताद्बहिर्गतं प्रोतं कार्यं। यथा तत्कदम्बवृत्तद्वयमायनवृत्तेन क्रांतिवृत्तेन च लग्नं सदकुंठितं भ्रमति। तथा कार्यं। यद्यप्युपरितनकदम्बवृत्तं ध्रुवकीले कुंठितं भवे[3] तथापि कार्यसिद्धिर्भवेत्[4]। न कोपि दोषो यतस्तत्स्थं तु भ्रमिष्यत्येव पुनरेकं वृत्तं याम्योत्तरसंज्ञं मायनवृत्तात्किंचिदधिकं ध्रुवकीलयोः प्रोतं स्थिरं याम्योत्तरदिक्स्थं षट्भान्तरितकीलद्वययुतं स्तंभद्वयाधारेण दृढं कार्यं। यथा तदन्तर्गतानि वृत्तानि भ्रममाणानि भवन्ति तथा कार्यं। पुनरन्तर्गतकदम्बवृत्तोदरगतमन्यद्वृत्तं कीलकरहितं तदुदरगतमेव भ्रममाणं कार्यं। एतद्वृत्तं शरार्थमुपयुक्तमस्ति।

अथ लघुवृत्तैकपार्श्वे षड्राश्यन्तरितं भुजद्वयमेव व्यासगतं निखात्वा दृढं स्थापयेत्। यतस्तच्छिद्रद्वयगतदृष्ट्वा[5] ग्रहर्क्षादिवेधो भवति। एवं षड्भिर्वृत्तैरिदं गोलयन्त्रं सिद्धयति। इदमेव यवनभाषया[6]र्जातुल्हलक[7]मित्युच्यते। सर्वेषु वृत्तेषु

(घ) ३. भवेत्तथापि for (भवे तथापि)
५. दृष्ट्या for (दृष्ट्वा) (ङ)
६. भाषायां for (भाषयार्)

(ङ) १. गोलस्थानां for (गोलस्थानो)
२. आयनि for (आयन)
४. भंवेदिति for (भंवेद्)
७. जातुलह्लक for (र्जातुल्हलक)

यथासम्भवमंशा[1] कलाश्चांक्या:। अथवा कदम्बवृत्तद्वयमाबनवृत्तांतर्गतमेव कार्यं। यथैतद्वृत्तद्वयभ्रमणे ध्रुवकीलजल्पांतरायो न स्यात्। अयं प्रकार: साधीयान्।

अथ वेध प्रकार: —

यदा रविचन्द्रौ दृश्यौ भवतस्तदा क्रान्तिवृत्तं कदम्बवृत्तं[2] च तथा भ्रामणीयं यथा त छाया तदन्तर्गता स्यात्। पत्रवृत्तद्वयसंपातो रविसम्मुखस्तत्र स्पष्टो रविर्ज्ञेय:।

अथ तस्मिन्नेव कालेंतर्गतकदम्बवृत्तं तदन्तर्गतवेधवलयं च तथा भ्रामणीयं यथा तद्भुजद्वयरंध्रेण चन्द्रदर्शनं स्यात्। एवमन्तर्गतकदम्बवृत्तस्य क्रांतिवृत्तस्य च चन्द्रसन्मुखदिशि यत्र संपातस्तत्र स्पष्टश्चन्द्रो ज्ञेय:। क्रान्तिवृत्ताद्यावद्भिरंशैर्वेधस्थानं तावान् शरो ज्ञेय:। एवं चन्द्रं स्थिरं कृत्वा रात्रौ नक्षत्रादिकं वेध्यं। इति गोलयन्त्रं। एतस्मिन्यन्त्रेऽतिभारेण नामनोन्नामनं भवति, तेन वेधेन्तरं पतति, तेनेदमप्यनादृतं।

अथ दिगंशज्ञानाय[3] दिगंशयन्त्रमुच्यते—

तन्निर्माणप्रकारो यथा। जलवत्समीकृतायां भूमौ दिक्साधनं कृत्वा वृत्तमिष्टव्यासार्द्धेन कार्यं। तस्य क्षितिजमिति संज्ञा, एवमत्र क्षितिजत्रयं कार्यं। तत्र प्रथमवृत्तं इष्टोच्चप्रमाणं पूर्णगर्भं कार्यं। द्वितीयवृत्तोपरि वर्त्तुला चक्राकारा प्रथमोच्छ्राय[4]प्रमाणा भित्ति:[5] कार्या। तृतीयवृत्तोपरि द्विगुणोच्छ्रायतुल्या वर्त्तुला पालि: कार्या। क्षितिजत्रयेपि पूर्वापरा याम्योत्तरा च रेखा कार्या। तदुपरि भांशाश्चक्रकलाश्चांक्या:। तृतीयवृत्ते चतु:सूत्री पूर्वोक्तवत् दृढा कार्या। प्रथमवृत्ते केन्द्रस्थाने एकं सूत्राग्रं दृढं संलग्नं कार्यं। द्वितीयसूत्राग्रं पाषाणेन बध्वा तृतीयवृत्तपालौ स्थाप्यं, तस्य दृङ्मण्डल सूत्रमिति संज्ञाऽस्ति।

(घ) १. मंशा: for (मंशा) (ङ) २. 'कदम्बवृत्तं च' लुप्त

३. ज्ञातार्थं for (ज्ञानाय)

(ङ) ४. यमोल्लाप for (छ्राय) ५. प्रमाणानितिकार्या for (प्रमाणाभित्ति:)

Indira Gandhi National Centre for the Arts

अथ वेध प्रकारः—

इष्टग्रहस्य नक्षत्रस्य वा बिंबकेन्द्रं द्वितीयमंडलगतदृष्टया चतुःसूत्रोकेन्द्र-मार्गेण दृङ्मण्डलसूत्रे यथा भवति। तथा दृङ्[1]मण्डलसूत्रं तृतीयपालौ प्रचालनीयं। एवं कृते सति पूर्वापररेखा सूत्रचिन्हात्[2] दृङ्मण्डलसूत्रपर्यंतं क्षितिजे दिगंशा भवंति।

[3]**अत्रोपपत्तिः—**

इदं दृङ्मण्डलसूत्रं दिग्वृत्तचतुर्थांशस्य पूर्णज्यारूपं भवति। पुनस्तस्मिन् ग्रहबिंबचतुःसूत्रसंपातौ एककाल एव[4] भवतस्तदा तत्सूत्रमवश्यं दिगंशेषु लगतीत्युपपन्नं।

इति दिगंशयंत्रं।

अनेन यंत्रेण यंत्रसम्राजा च चंद्रध्रुवक ज्ञानं च भवति। तद्यथा। यदा चंद्रः याम्योत्तरवृत्तासन्नो भवति स कालोनुमानेन ज्ञेयः। तस्मिन् काले गणितागतश्चन्द्रः स्पष्टः कार्यः। तं वित्रिभलग्नं कल्पयित्वा तस्माल्लग्नं साध्यं। लग्नादनुमानकालीनस्पस्टसूर्याच्चेष्टकालः साध्यः। तस्मिन् काले चन्द्र-सूर्यौ स्पष्टौ कार्यौ। पुनश्चंद्रं वित्रिभलग्नं कल्पयित्वा तस्माल्लग्नमिष्टकालश्च साध्यः। एवमसकृदिष्टकालः साध्यस्तस्मिन् काले यश्चन्द्रो गणितागत आयाति स वित्रिभलग्नतुल्यश्चंद्रो भवति। तस्मिन् समये लग्नाग्रांशतुल्याश्चन्द्रस्य दिगंश-कोधंशा[5] भवन्ति। आयनदृक्कर्मसंस्कृतचंद्रस्य विषुवांशानां तत्कालीनदशमस्य चोत्तरं[6] नतकालो भवति, दिगंशकोटिज्यातस्त्रिप्रश्नोक्तरीत्या वित्रिभस्य नतांशाः साध्याः। ते याम्योत्तरत्वेन[7] याम्योदक् संज्ञा भवंति। ते शरसंस्कृताश्चन्द्र[8]बिंबनतांशा

(घ) १-२. 'दृङ्मण्डल—चिन्हात्' तक लुप्त
वि॰—यहां मार्जिन में निम्नांकित उपलब्ध है :—
'तृतीय पालौ प्रचालनीयं। एवं कृते सति पूर्वापररेखा सूत्रचिन्हात् द्वाडलसूत्र ६७'

(ङ) ३. यत्रोपपत्तिः for (अत्रोपपत्तिः)   ४. एकवचन for (एव भवत)
५. कोट्यंशा for (कोधंशा)   ६. चांतरं for (चोत्तरं)
७. यामोत्तरत्वेन for (याम्योत्तरत्वेन)   ८. (संस्कृतास for (संस्कृता)

Indira Gandhi National Centre for the Arts

भवंति । पुनः स्थिरीकृतेष्टकाले नाडीवलये चन्द्रस्य वेधं कृत्वा नतकालो ज्ञेयः । स नतकालो गणितागतनतकालेन तुल्यश्चेत्तदा चंद्रः शुद्धो ज्ञेयः । पूर्वकपाले वेधितनतकाल अधिकश्चेत्तदा चन्द्रध्रुवक अधिक अपेक्षितः । न्यूनश्चेन्न्यून अपेक्षितः पश्चिमकपाले एतद्विपरीतं[1] ज्ञेयं । तत्र नतकाले[2] पलमितोतरेण[3] चंद्रे षट् कलाप्रमितमंतरं पतति इति सुमतिना ज्ञेयं । एवं वित्रिभकालीनं[4] चन्द्रं कृत्वा तस्य दिगंशाः साध्याः । यदा वेधेन तावंतो दिगंशा आयांति तदा चन्द्रो वित्रिभे आगत इति ज्ञेयं । तस्मिन् समये चन्द्रस्य यः नतकालो भवति । स तत्कालदशमलग्न[5]घटीषु योज्यः, यदि वित्रिभं दशमाधिकं भवति, यदि न्यूनं तदा शोध्यः । शेषाल्लंकोदयैर्लग्नं साध्यं, स आयनदृक्कर्मसंस्कृतश्चंद्रो भवति । पुनस्तत्समये गणितेन यः शर आयाति स दृग्लंबनसंस्कृतः कार्यः । तत्तुल्याक्षांशपत्रा[6]दायनदृक्कर्म संस्कृतचन्द्राक्रांति[7]वृत्तस्थो ध्रुवकः साध्यः—स यथा । आयनदृक्कर्म[8]संस्कृतग्रहस्य विषुवांशाः साध्याः । शर उत्तरश्चेन्नवतिस्तेषु शोध्या, दक्षिणश्चेद्योज्या । शेषांशेभ्यः शरतुल्याक्षांशपत्रा[9]दुदयाः साध्याः । शर उत्तरश्चेदेषु नवतिर्योज्या, दक्षिणश्चेच्छोध्या, शेषं क्रातिवृत्तस्थो ध्रुवो भवति ।

अथ दक्षिणोदकभित्तिसंज्ञं यंत्रमुच्यते—

समकोणसमचतुर्भुजां भितिं दक्षिणोदक्स्थां विधाय । दक्षिणदिक्स्थोर्ध्वकोणे केन्द्रं कृत्वा भित्तिप्रमाणव्यासार्द्धेन वृत्ततुर्यांशप्रमाणंक्षेत्रं कार्यं । तत्र नवत्यंशाः कार्याः[10] यथासंभवं कलाश्चांक्याः । केन्द्रेऽभीष्टं लोहशंकुं निधाय मध्यान्हे रवेश्छाया वेध्या । अधः सूत्रवृत्तसंपातचिन्हात् छायाग्रपर्यंतं नतांशा बोध्याः । एवं

(घ) ३. पलमितांतरेण for (पलमितोतरेण) (ङ)
५. 'लग्न' लुप्त (ङ)
७. त्क्रान्ति for (क्रान्ति)
१०. विसर्ग लुप्त (ङ)

(ङ) १. एतद्विपरितं for (एतद्विपरीतं)
२. नतकाकाले for (नतकाले)
४. कालिकं for (कालीनं)
६. यंत्रादायन for (पत्रादायन)
८. आयनयद्दृक्कर्मं for (आयनदृक्कर्मं)
९. यंत्रा for (पत्रा)

प्रत्यहं वेधेन परमाधिकता परमाल्पता च नतांशा[1] नो ज्ञेया। दक्षिणस्थपरमाधिकपरमाल्पनतांशांतरार्द्धं परमक्रान्तिर्भवति, इदं परक्रात्यधिकाक्षदेशे भवति। यत्र चोत्तरा नतांशाः परमात्मा[2] भवंति, तत्र वृत्तं किंचिद्दक्षिणतोधिकं कार्यं। तत्र परमाधिकपरमाल्पनतांशयोगार्द्धं परमक्रांतिर्भवति। अक्षांशाधिकक्रांतिदेशे परमक्रान्तिः परमाल्पनतांशैर्हीना अक्षांशा भवंति। क्रान्त्यधिकाक्षदेशे तु पर[3]क्रांतिः परमन्यून[4]नतांशैर्युता अक्षांशा भवंति। अनेन यंत्रेण इन्द्रप्रस्थेऽक्षांशाः २८।३९ ज्ञाताः। परमक्रान्तिश्च २३।२८ यवन देशे अवरखसाऽऽदिभिर्यवनाचार्यैर्वेधेनोपलब्धा क्रांतिः २३।५१।१९ पुनर्यू[5]नानदेशे षट्त्रिंशदक्षांशयुते बतुलम्[6]जूषेन वेधेन प्राप्ता क्रान्तिः[7] २३।५१।१५[8] पुनः समरकन्द[9]नगरेऽक्षांशैः ३९।३७ युते उलूक[10]बेगेन वेधेनोपलब्धा क्रान्तिः २३।३०।१७ अस्माभिः शालिवाहनशके १६।५१ इन्द्रप्रस्थेऽनेन यंत्रेण वेधेन प्राप्ता क्रान्तिः २३।२८ एवं वेधेन क्रान्तिं ज्ञात्वा तयानुपातेन स्पष्टो रविः कार्यः। स यथा। परमक्रान्तिज्यया २३।५३।३४।३२ त्रिज्या ६० लभ्यते तदेष्टया क्रान्तिज्यया किमिति लब्धफलस्य चापं उत्तरक्रान्तावुपचीयमानायां रविर्भवति। अपचीयमानायां च भार्द्धांशशुद्धं रविर्भवति। याम्यक्रांतावुपचीयमानायां भार्द्धांशयुतं[11] रविर्भवति। अपचीयमानायां[12] भांशशुद्धं रविर्भवति। अयं रविः सायनो भवति। ते चायनांशाः एकपंचाशदधिकषोडशशते १६५१ शालिवाहन शके सप्तत्रिंशत्कलाधिकैकोनविंशदंशाः[13] १९।३७ निश्चिताः। पुनरयनांशानां गतिः सप्तति ७०

(घ) १. नतांशानां for (नतांशानो) (ङ) २. परमाल्पा for (परमात्मा) (ङ)
३. 'परक्रान्तिः परमन्यून' लुप्त

(ङ) ४. 'न्यून' लुप्त
५. जंनाननदेशे for (यूनानदेशे)
६. वितुलमपूसेन for (बतुलमूजूषेन)
७. विसर्ग लुप्त
८. २३।५१।१ for (२३।५१।१५)
९. कंदर for (कंद)
१०. उलुक for (उलूक)
११. युक्तं for (युतं)
१२. अपक्षीयमाणायां for (अपचीयमानायां)
१३. विंशा for (विंशदंशाः)

Indira Gandhi National Centre for the Arts

वर्षेरेकोंशो निश्चितोऽस्ति। प्रतिवार्षिकी गतिश्च विकलादिः विकलाः ५१ प्रतिविकलाः २७ त्रिकला ५० इत्ययनांशगतिः।

अथेष्ट कालेऽयनांशानयनम्—

गजाश्वनेत्रै २७८ रहिताः शकाब्दाः खसप्तभक्ता अयनांशकाः स्युः।
प्रत्यब्दजातायनजागतिरक्तरूपाक्षतुल्या विकलाः प्रदिष्टाः ॥१॥

इति दक्षिणोदक् भित्तियंत्रं।

अथ वृत्तषष्ठांशसंज्ञं यंत्रमुच्यते—

जलसमीकृतायां भूमौ दिक् साधनं कृत्वा याम्योत्तरा भित्तिः पूर्ववत्समकोणसमचतुर्भुजा कार्या। तस्यां दक्षिणतः किंचित्प्रदेशं सक्त्वोर्ध्वाधरा[1] रेखा कार्या। एवमूर्ध्वपालौ याम्योत्तरा तत्समा रेखा कार्या। तद्योगे केंद्रं कृत्वा किंचिदधिक चतुर्थांशमितं वृत्तं कार्ये[2]। तद्वृत्तसंलग्नं चतुरंगुल[3]पुष्टं वृत्तं चूर्णेष्टिकादिना कार्यं। तत्श्लक्ष्णं कृत्वा तत्रोंशाः[4] यथासंभवं कलाश्चांक्याः। पुनस्तद्भित्तिसमासमानांतरा हस्तद्वयांतरेणान्या भित्तिः पूर्वतः कार्या। तत्रापि वृत्ते[5] तथैव विधेयं। उत्तरतःद्वारं स्थापयित्वा सर्वं भित्त्यंतरं मुद्रितं कार्यं। एवं दक्षिणतोपि[6] भित्यंतरं मुद्रिते[7] कार्यं। ए[8]वमुपरितनप्रदेशोपि पट्टिकादिना मुद्रितः कार्यः। भित्तिद्वयस्य दक्षिणको[9]णद्वयं ऊर्ध्वाधररेखातः कर्णाकारं छित्वा पट्टिकया पिहितं कार्यं। छिन्नोभयकोणगतयाम्योत्तररेखायां ऊर्ध्वाधररेखासमीपे सूक्ष्मं[10] सुषिरं कार्यं। यथा तद्गता रविप्रभा मध्यान्हे वृत्ते पतति तथा कार्यं। अनेन प्रकारेण यंत्रं कृत्वा तदंतर्गत्वा कपाटं दत्त्वा मध्याह्ने सुषिरगतां रवि[11]प्रभां प्रत्यहं विलोक्य क्रांत्यक्षयोर्निश्चयः कार्यः।

(घ) १. त्यक्त्वोर्ध्वा for (सक्त्वोर्ध्वा) (ङ) २. कार्यं for (कार्ये)
४. तत्रांशाः for (तत्रोंशाः) (ङ) ५. वृत्तं for (वृत्ते)
७. मुद्रितं for (मुद्रिते)

(ङ) ३. रंगल for (रंगुल) ६. 'तोपिभि…… । ए' लुप्त
८-९. 'वमुपरितन—कोण' लुप्त
१०. मूल्यं for (सूक्ष्मं) ११. + वृत्ते +

Indira Gandhi National Centre for the Arts

शेषं भित्तियंत्रवद् ज्ञेयं। इदं यंत्रं यथा यथा महद् भवति तथा वेधः सूक्ष्मतरो भवति, इति वृज[1]षंष्ठाशयंत्रम्। इदमेव यवनैः शुदश्फकरीत्युच्यते।

अथ यंत्रसम्राडाख्यं यन्त्रमुच्यते—

जलसमीकृतायां भूमौ दिक्साधनं कृत्वा याम्योत्तरा रेखा कार्या। तस्यां भित्ति[2]र्जात्यक्षेत्रसदृशी उदग् ध्रुवाभिमुखी यथा ध्रुवसूत्रं तद्भित्तौ पतति तथा कार्या। कर्णाकारभित्त्यर्द्धे पूर्वपश्चिमान्यतरपालौ केन्द्रं कृत्वा पूर्वापरोर्द्धं चन्द्रलेखा सदृश अंतरावरणरहितो वृत्तचतुर्थांशश्चूर्णेष्टिकादिभिः कार्यः, एवमपरपालितोपि तादृश एव वृत्तचतुर्थांशः कार्यः। इदमर्द्धवृत्तं चतुरंगुलपिंडयु[3]तं हस्तमितपरिणाहं कृत्वा तत्पालिः पाषाणचूर्णादिना श्लक्ष्णा दृढा कार्या। अस्यां पंचदश घटिका यथासंभवं पलानि चांक्यानि, भित्तौ ध्रुवाभिमुखः सोपानमार्गः कार्यः। इदमपि नाडीवलयमित्युच्यते। अ[4]त्यु[5]भयपालौ केन्द्राद्यामोत्तरतस्त्रिज्याविभागतुल्याः षष्टिभागा अंक्याः। पुनर्वेधार्थं वृत्तपालिशकलसदृशी पट्टिका वृत्तपालिसंलग्ना यथा भवति तथा कार्या। तस्यां निखा[6]त्वा मध्यदीर्घसुषिरयुतद्वयंगुला लोहपट्टी दृढा कार्या। इयं वेधपट्टी भवति।

अथ वेध प्रकारः—

पट्टिकां वृत्तपालौ निधाय लोहपट्टीसुषिरगतदृष्टया भित्तिपालीसंलग्नया च ग्रहर्क्षादिकं वेधयेत्। तदान्येन सोपानमार्गेणारुह्य भित्तौ पट्टिकादि निधाय चिन्हं कार्यं। तच्चिन्हकेन्द्रचिह्नांतरेंशादिकं ग्राह्यं। तस्य छाया सारण्यां चापमंशादिकं ग्राह्यं, सा वेधितग्र[7]हक्षीणो क्रांतिर्भवति। भित्तिमूलाद्वेधस्थानपर्यंतं नतकालो ज्ञेयः।

(घ) १. वृत्त for (वृज) (ङ)
२. भित्तिः जात्य (for भित्तिर्जात्य) (ङ)
४. अत्र for (अ-) (ङ)
५. भित्युभय for (त्युभय) (ङ)
७. ग्रहर्क्षाणां for (ग्रहक्षीणो) (ङ)

(ङ) ३. युक्तं for (युतं)
६. निखाता for (निखात्वा)

Indira Gandhi National Centre for the Arts

अथ वेधेन नक्षत्रध्रुवकज्ञां[1] यथा—

रवेरस्तासन्नकाले रविं संविध्य[2] नतकालो ज्ञेयः, सनिरवयवो ग्राह्यः। तस्मिन्नेव समये घटीयंत्रं[3] स्थापयित्वा यावत्पर्यंतं नक्षत्रबिंबदर्शनं सम्यक् भवति, तावत्पर्यंतं निरवरवाद्यो[4] ग्राह्याः। ता[5] रविनतकाले योज्यास्तत्कालीनरविनतकालो भवति। तस्य रविविषुवघटीनां च योगे[6] दशमकालो भवति।

अथ तस्मिन्समयेऽभीष्टनक्षत्रस्य वेधेन नतकालो ज्ञेयः, क्रांतिश्च ज्ञेया। नक्षत्रं पूर्वकपाले चेन्नतकालो दशमघटीषु योज्यः। पश्चिमकपाले चेच्छोध्यः। शेषं षड्गुणं आयनदृक्कर्मसंस्कृतनक्षत्रध्रुवकस्य अंशात्मकः कालो भवति। तत्र क्रांतिरुत्तरा चेत्तदा तस्मिन्काले नवतिं संयोज्य क्रान्तितुल्याक्षांशपत्रा[7]ल्लग्नं साध्यं। तन्नवत्यंशैरूनं ध्रुवको भवति। क्रान्तिर्दक्षिणा चेन्नवतिं संशोध्य क्रान्तितुल्याक्षांश-[8]पत्राल्लग्नं साध्यं, तन्नवत्यंशैर्युतं ध्रुवको भवति।

अत्रोपपत्तिः—

यस्मिन्देशे ग्रहर्क्षबिंबं मस्तकोपरि भवति। तद्गतध्रुववृत्तं तत्र याम्योत्तरवृत्तं भवति। तत्स्पष्टा क्रान्तिरक्षांशा भवंति। आयनदृक्कर्मसंस्कृतग्रहः दशमलग्नं भवति। तत्रत्यं वित्रिभं ध्रुवको भवति, वेधेन ज्ञातकालः दशमलग्नस्य कालो भवति। [9]उत्तरक्रान्तौ तत्र नवतिं[10]। उत्तरक्रान्तौ तत्र नवतिर्योजिता चेत्तद्देशीयलग्नोदयो भवति। अस्माल्लग्नं साधयित्वा वित्रिभं कार्यं, स वेधितनक्षत्रस्य ध्रुवको भवति।

(घ) १. ज्ञान for (ज्ञां) (ङ)   २. वेध्य for (संविध्य)
४. निरवयवाद्यर्थिग्राह्याः for (निरवयवाद्यो ग्राह्याः)
५. ताः रवि for (ता रवि)
९-१० 'उत्तर—नवति' लुप्त (ङ)

(ङ) ३. 'यंत्रं' लुप्त
४. निरवयवा घट्यो ग्राह्याः for (निरवरवाद्यो ग्राह्याः)
६. योगो for (योगे)
७. यंत्राल्लग्नं for (पत्राल्लग्नं)   ८. यंत्राल्लग्नं for (पत्राल्लग्नं)

Indira Gandhi National Centre for the Arts

[१]क्रांतिर्दक्षिणा चेन्नवतिः शोध्या, तद्देशीय अस्तलग्नोदयो भवति । अस्माल्लग्नं साधयित्वा सत्रिभं कार्यं, स वेधितनक्षत्र[२][३]स्य ध्रुवको भवति[४] । उत्तरक्रान्तौ नवतिर्योज्यते दक्षिणक्रान्तौ शोध्यते ।

तत्रोपपत्तिः—

निरक्षा[५]दुत्तराक्षदेशे क्षितिजमुत्तरगोले उन्मण्डलादधो भवति । दक्षिणगोले उपरि भवति । दक्षिणाक्षदेशे एतस्माद्विपरीतं भवति । उत्तराक्षदेशे ये मेषादिद्वादशराश्युदयास्ते दक्षिणाक्षदेशे तुलादिद्वादश राश्युदया भवंति ।

अथ विषुवांशस्पष्टक्रान्त्योर्ज्ञाने शरानयनं विषुवांशान् त्रिशद्भिर्विभज्य राश्यादिकं कार्यं । तस्य कल्पितस्पष्ट इतिसंज्ञा कल्प्या । [६]पुनरस्यान्यक्रान्तिर्ग्राह्या[७] । पुनरस्या स्पष्टक्रान्तेश्चैकदिश्यंतरं भिन्नदिशि योग एवं स्पष्टक्रान्त्यन्यक्रांतिसंस्कारो भवति । पुनः संस्कारज्या सत्रिभकल्पितस्पष्टद्युज्या गुणा त्रिज्या भक्ता शरज्या भवति । [८]अस्याश्चापं शरो भवति ।

अथ शरदिक्ज्ञानं—

यत्र संस्कारयोगस्तत्र स्पष्टदिगेव शरदिग्भवति । यत्र चांतरं तत्र स्पष्टक्रान्तिः सौम्यान्यक्रान्तेश्चाधिका चेत् । अथवान्यक्रान्तिर्दक्षिण[९]स्पष्टक्रान्त्यधिका चेत्तदा शर उत्तरः । यदि च दक्षिणस्पष्टक्रान्तिरन्यक्रान्तेरधिका । अथवान्य[१०]क्रान्तिरुत्तरा स्पष्टक्रान्तेरधिका तदा शरो दक्षिणः । एवं शरदिक् ज्ञानं भवति ।

अस्योपपत्तिः—

तत्राग्रे वक्ष्यमाणमेव क्षेत्रं कार्यं । तत्र नाडीवलयं क्रांतिवृत्तं । क्रान्तिवृत्तं नाडीवलयं । ध्रुववृत्तं शरवृत्तं, शरवृत्तं ध्रुववृत्तं, स्पष्टक्रान्तिः शरः, शरः स्पष्ट-

---

(घ) ९. दक्षिणा for (दक्षिण)

(ङ) १-२. 'क्रान्ति—नक्षत्र' लुप्त   ३-४. 'स्य—भवति' लुप्त
५. निरक्षात्तदुत्तरक्षा for (निरक्षादुत्तराक्ष)
६-७ 'पुनर—ग्राह्या' लुप्त   ८. + यत्र चांतरं तत्र +
१०. क्रान्ते for (क्रान्ति)

Indira Gandhi National Centre for the Arts

क्रान्तिः। एतानि परिकल्प्य अत्र विषुवांशस्पष्टक्रान्तिभ्यां शरसाधने वक्ष्यमाणोपपत्तिरूहनीयेत्यलां[1]।

इति यंत्रसंम्राडाख्यं यंत्रं।

अथ जयप्रकाशयंत्रमुच्यते—

तत्रादौ जलसमीकृतायां भूमावभीष्टकर्कटेन वृत्तं कार्यं। तत्र दिक्साधनं कृत्वा पूर्वापरा याम्योत्तरा च रेखा कार्येति[2]। तद्वृत्तं कपालोदरवद्वर्तुलं गोलार्द्धमितं खननीयं एकं वृत्तार्द्धप्रमाणं धातुमयं दारुमयं वा वलयार्द्धं कार्यं। तत्खानित[3]गर्त्ते भ्रामणीयं। यदि सर्वत्र संलग्नं सद्भ्रमति तदा तद्यंत्रं शुद्धं जातमिति ज्ञेयं। [4]अथवा धातुमयं दारुमयं वा कपालवद्वर्तुलं गोलार्द्धमितं यंत्रं कार्यं। तद्यंत्रं (वृत्तं)[5] पूर्वापरयाम्योत्तररेखाभ्यामंकनीयं। रेखाद्वयसंपाते। खस्वस्तिकं (यंत्र[6]केन्द्रं कल्पनीयं) भवति। तत्र यंत्रपालिः क्षितिजं भवति। क्षितिजे भांशाश्चक्रकलाश्चांक्याः। [7]याम्योत्तररेखायां केन्द्रादुभयत्र नवति ९० अंशास्तत्कलाश्चांक्याः[8]। [9]तत्र इष्टशंकुः स्थाप्यः, शंकुमस्तकपर्यंतं यंत्रमध्ये जलं देयं, तज्जलं यंत्रमध्ये परितः यत्रलग्नं तत्प्रमाणकं यंत्रं छित्त्वा स्थापनीयं, तत्प्रमाणकं अभीष्टयंत्रं भवति[10]।

अथ याम्यदिशि क्षितिजयाम्योत्तररेखासंपातादधः अक्षांशांतरे याम्योत्तररेखायां चिन्हं कार्यं। तद्दक्षिणध्रुवचिन्हं भवति। एवमुत्तरदिशि क्षितिजयाम्योदग्रेखा संपातादूर्ध्वं अक्षांशांतरे उत्तरध्रुवचिन्हं (ज्ञेयम्)[11] भवति। ध्रुव द्वयचिन्हं केन्द्रं कृत्वा परमक्रान्तिमितव्यासार्द्धेन वृत्तं कार्यं। तत्कदंबभ्रमवृत्तं भवति। कदंबभ्रमवृत्तद्वये याम्योत्तररेखा संपातात् दक्षिणवृत्तेऽधः संपातात् सौम्यवृत्ते ऊर्ध्व-

(घ) १. रूहनीयेत्यलं for (रूहनीयेत्पलां) २. कार्या for (कार्येति)
३. खनित for (खानित) (ङ)
५. तद्वृत्तं for (तद्यंत्रं वृत्तं) (ङ) ६. '(यंत्रकेन्द्रं कल्पनीय)' लुप्त (ङ)
७-८. 'याम्योत्तर—चांक्याः' लुप्त (ङ) ९-१० 'तत्रइष्टशंकुः – यंत्रं भवति' लुप्त (ङ)
१. '(ज्ञेयं)' लुप्त (ङ)

(ङ) ४. यथा वा for (अथवा)

Indira Gandhi National Centre for the Arts

संपातात् सव्यक्रमेण भांशाश्चक्रकलाश्चांक्याः। ([1]राशेराश्यर्द्धस्य वा स्वाभीप्सितांशस्य वा) राशीनामुदयप्रमाणानि चांक्यानि। तान्युत्तरकदंबभ्रमवृत्ते याम्योत्तररेखासंपातात्पश्चिमतः दक्षिणकदंबभ्रमवृत्ते पूर्वतश्चांक्यानि।

अथ कदंबे केन्द्रं कृत्वा [2]व्यासार्द्धमितकर्कटेन वृत्तं पूर्वाऽ[3]परचिन्हे स्पष्टं कार्यं, तत्क्रान्तिवृत्तं भवति। पुनः कदंबभ्रमवृत्ते प्रतिराश्युदयांशेषु केन्द्राणि कृत्वा द्वादशराशी[4]नां क्रांतिवृत्तार्द्धानि कार्याणि (स्वाभीप्सितांशस्थाने केन्द्रं कृत्वा तेनैव कर्कटेन वृत्तं कार्यं, तत्स्वाभीप्सितांशस्य क्रांतिवृत्तं भवति। एवं राशिषट्कस्य [5]स्वाभीप्सितानि क्रान्तिवृत्तानि कार्याणि)।

अथ ध्रुवचिह्ने केन्द्रं कृत्वा व्यासार्द्धमितकर्कटेन वृ[6]त्तं कार्यं, तन्नाडीवृत्तं भवति। एव द्युज्यया षडहोरात्रवृत्तानि कार्याणि। याम्योत्तररेखा नाडीवृत्तसंपातात्पूर्व[7]परदिशि पंचदशघटिकास्तासु यथासंभवं पलानि चांक्यानि। नाडीवृत्ते केन्द्रं कृत्वा प्रति[8]घटीध्रुववृत्तानि कार्याणि। (पूर्वा[9]पर [10]स्वस्तिक नाडीवृत्तसंपातात् अधः नाडीवृत्ते वृषलप्रमाणे चिह्नं कृत्वा तेनैव कर्कटेन वृत्तानि कार्याणि, तानि ध्रुववृत्तानि भव[11]न्ति)। नाडीवृत्तयाम्योत्तरवृत्तसंपातादुभयतः सौम्ययाम्यरेखायां क्रान्त्यंशाः ज्ञेयाः।

अथ खमध्ये केन्द्रं कृत्वा प्रत्यंशमुन्नतवलयानि कार्याणि। तथा क्षितिजे केन्द्राणि कृत्वा प्रत्यंशं दिगंशवृत्तानि कार्याणि। ([12]प्रतिराशेः राश्यर्धस्य अंशस्य

(घ) १: (राशेराश्यर्द्धस्य वा स्वाभीप्सितांशस्य वा)' लुप्त (ङ)
३. पूर्वाऽपरं चिह्नस्पृष्टं for (पूर्वाऽपरचिह्ने स्पष्टं)
५. '(स्वाभीप्सितां—कार्याणि)' लुप्त (ङ)
७. पूर्वापर for (पूर्वंपर) (ङ)   ९. '(पूर्वापर' लुप्त (ङ)
१०-११. 'स्वस्तिक······भवंति)' लुप्त (ङ)
१२. 'प्रतिराशेः —से— ध्रवके' तक सब लुप्त। (ङ)

(ङ) २. सार्द्धमित for (व्यासार्द्धमित)   ४. राशिनां for (राशीनां)
६. 'वृत्तं' लुप्त   ८. घटि for (घटी)

Indira Gandhi National Centre for the Arts

वा क्षितिजे तु एवमेव क्षितिजपूर्वापररेखा संपातादुभयतः पूर्वपश्चिमदिशि अग्रांशा अंकनीया', पुनः ध्रुवकेन्द्रं[१] कृत्वा याम्योत्तररेखायां क्रान्तिचिह्नस्पृक् पूर्वापरक्षितिजस्थित अग्रांशस्पृक् वृत्तं कार्यं तदहोरात्रवृत्तं तावतांशानां सूर्यस्य भवति, एवं नाडीवृत्तोभयतः इष्टाहोरात्रवृत्तानि कार्याणि ।

अथ यन्त्रपालौ याम्योदक्चिह्नस्थं एकसूत्रे निवेश्य, द्वितीयं पूर्वापर[२]चिह्नस्पृक् सूत्रं निवेश्य, एवं चतुःसूत्री जाता, एवं कृते सति यत्र सूत्रयोः संपातः तत्र यन्त्रस्थकेन्द्रं ज्ञेयं ।

अथ इष्टकालादिसाधनं यदि वा तत्केन्द्रं छाया अहोरात्रवृत्ते यत्र पतति तत्र चिह्नं कार्यं, क्षितिजात्तच्चिह्नपर्यन्तमुन्नतघटिकाः अ[३]होरात्रवृत्ते भवन्ति, तत् चिह्नाद्याम्योत्तररेखापर्यन्तं अहोरात्रवृत्ते नतघटिका ज्ञेयाः । छायाचिह्नं क्रान्तिवृत्ते यत्र लग्नं तल्लग्नं स्यात् । छाया नाडीवृत्तपर्यन्तं ध्रुवसूत्रे क्रान्तिः नाप्रवृत्तात्तचिह्नं उत्तरे उत्तरा याम्ये याम्या च ज्ञेया । दिने चतुःसूत्रछाया यस्मिन् क्रान्तिवृत्ते पतति, तस्मिन् काले तल्लग्नं भवति । चतुःसूत्रसंपातछाया यत्र द्यु[४]रात्रवृत्ते पतति तत्र नतघटिकाः ज्ञेयाः । चतुःसूत्र[५]छाया यत्रोन्नतवलये पतति तत्रोन्नतांशाः । यद्दिग्वलये प[६]तन्ति ते दिगंशाः । यदि संपातो वृत्तान्तरे भवति, तदानुपातात्कलाकल्पना । इदं यन्त्रं मकराहोरात्रवृत्ताद् दशांशमितं यन्त्रं [७]स्थापयित्वा शेषं छित्त्वा निष्कासनीयं । पुनर्याम्योत्तररेखात[८]ः पूर्व[९]तः घटीमितं यन्त्रं याम्योत्तरं सर्वत्र छित्त्वा निष्कासनीयं । प्रणालिका कार्या । यथा मनुष्य-

(घ) १. 'न्द्रं कृत्वा—से—द्वितीयंपू' सब लुप्त (ङ)
२. 'र्वापर—से—घटिकाः' सब लुप्त (ङ)
३. 'अहोरात्र—से—च ज्ञेया') लुप्त (ङ)
४. 'द्यु रात्रवृत्ते' लुप्त
५. + संपात्र + (ङ)
७. स्थापइत्वा for (स्थापयित्वा)

(ङ) ४. द्यु जावृत्ते for (द्यु रात्रवृत्ते)
६. पति for (पतंति)
८. विसर्ग लुप्त
९. पूर्वतो for (पूर्वतः)

Indira Gandhi National Centre for the Arts

संचारो भवति। तत्पूर्वतो घटीचतुष्टयानन्तरं याम्योत्तरं घटीमितं यन्त्रं छित्त्वा प्रणालिका कार्या, सा कटिप्रमाणा भवति। एवमेव पश्चिमतः प्रणालिकाद्वयं कार्यं। एवं तद्यंत्रे प्रणालिकापंचकं भवति। प्रणालिका प्रान्तं[1] अंगुल[2]चतुष्टयमितं स्थापयेत्। न तु सर्वं छेदयेत्। [3]क्षितिजमपि यथास्थितं स्थापयेत्[4]। क्षितिजमपि यथास्थितं स्थापयेत्। यत्रावकाशस्तत्रारोहणावरोहणार्थं सोपानमार्गः कर्त्तव्यः, एवं यन्त्रं निर्माय वेधं कारयेत्। तत्र तावद्वेधप्रकारः उच्यते, यन्त्र प्रान्तेऽभीष्टं नक्षत्रं विध्वा तन्नतकालं साधयित्वा पूर्वोक्तप्रकारेण दशमलग्नं साधयेत्। पुनर्ग्रहबिंबवेधे[5] याम्योत्तरसंलग्नप्रणाल्पां[6]स्छित्वा[7] याम्योत्तररेखायां दृक्चिह्नं कृत्वा चतुःसूत्रसंपातगत दृष्ट्वा[8] ग्रहर्क्षादिकं वेधयेत्, अन्यप्रणाल्पां वा वेधपट्टिकया वेधयेत्। तत्र चिह्नं कार्यं। यन्त्रपालौ वेधपट्टीं निवेश्याभीष्टनक्षत्रं विध्वा तन्नतकालो ज्ञेयः। नक्षत्रं पूर्वकपाले चेन्नक्षत्रघटीषु नतकालः शोध्यः, पश्चिमकपाले चेद्योज्यः सद्दशमलग्नस्य[9] कालो भवति। तस्माद्विषुवांशसारणीतो गणितेन वा दशमलग्नं साध्यं।

अथ वेधपट्टीकरणं यथा—

तद्यन्त्रस्थक्रान्तिवृत्तैकराशिपरिमिता वृत्तखण्डरूपा पट्टी कार्या। तस्यां निखाय[10] प्रणालिका[11] कार्या। एवमेव तावती पूर्वपदी[12] कृतप्रणाली न्यूनविस्तारा द्वितीया[13]। कदम्बवृत्तखण्डे राशिद्वयपरिमितमंशकलाद्यंकितं द्वितीयवृत्तार्द्धं[14] दृढं

(घ) १. प्रांते for (प्रांतं)
३-४ 'क्षितिज—स्थापयेत्' लुप्त (ङ)
५: 'वेधे' लुप्त (ङ)
६. प्रणाल्यां for (प्रणाल्पां)
७. स्थित्वा for (स्छित्वा)
८. दृष्ट्या for (दृष्ट्वा)
९. सदशमलग्नस्य for (सदृशमलग्नस्य)
१०. निखात्वा for (निखाय) (ङ)
१२. पूर्वपट्टीकृत for (पूर्वपदीकृत) (ङ)
१३. +कार्या+
१४. वृत्तार्द्धे for (वृत्तार्द्धं) (ङ)

(ङ) २. अंगुलि for (अंगुल)
६. प्राणाल्यां for (प्रणाल्पां)
९. सदसमलग्नस्य for (सद्दशमलग्नस्य)
११. प्राणालिका for (प्रणालिका)

Indira Gandhi National Centre for the Arts

कार्यं । तद्वृत्तद्वयं त्रिशदंशैस्तत्कलाभिश्च यथा संभवमंकनीयं, द्वितीयवृत्तं प्रथम-वृत्तस्य प्रणाल्पां[1] स्थापनीयं । एवं वेधपट्टी कृत्वा दशमलग्नस्यांशान् तत्र दत्त्वा चिह्नं कार्यं । तच्चिह्नं याम्योत्तरवृत्ते स्थापनीयं । तदूर्ध्वाग्रं दशमलग्नस्य[2] राश्य-होरात्रवृत्ते स्थापनीयं । द्वितीयाग्रं तदग्निमलग्नस्य राश्यहोरात्रवृत्ते[3] स्थापनीयं । एवं कृते तद्वृत्तखण्डं क्रान्तिवृत्ताकारं भवति । तत्पूर्वापराग्रयोः संलग्नाहोरात्र-वृत्तयोः[4] चिह्ने[5] कार्ये । यदि वेधचिह्नं दशमात्पृष्ठतो भवति तदा क्रान्तिवृत्तखंडं दशमलग्नराश्यहोरात्रवृत्ते लापनीयं[6] । पुनस्त द्वितीयाग्रं तत्पृष्ठगतलग्नराश्यहोत्र-वृत्ते लापनीयं । यथा वेधचिह्नं राशिमध्ये आयाति तथा चालनीयं । पुनः प्रणा-लीस्थं वृत्तखण्डं तथा चालनीयं यथा शरवृत्तं वेधचिह्नोपर्यायाति । क्रान्तिवृत्ता-द्वेधचिह्नपर्यन्तं शरवृत्तखण्डे येंशास्ते शरांशा ज्ञेयाः । पूर्वाहोरात्रवृत्ता छर[7]मूल-पर्यन्तं येंशास्ते तदग्निमराश्यंशा[8] भवन्ति । यदि दृक् चिह्नं दशमादग्रतो भवति तदा तत्क्रान्तिवृत्तं अग्रतश्चालनीयं । तथैव तत्रापि पूर्वोक्तप्रकारेण राश्यंशो ध्रुवकः शरश्च ज्ञेयः ।

इति[9] जयप्रकाशे वेधप्रकारः । इति जयप्रकाश यन्त्रम् ।

अथ क्रान्तिवृत्तं नामयन्त्रमुच्यते—

परात्पद्युज्या प्रमाणेनैकं लोहमयं वृत्तं कार्यं । तत्पूर्वापरयाम्योत्तरे चतुरं[10]मुलायामपुतं कार्यं । पुनस्त्रिज्यापरिमितव्यासार्द्धेन पत्राकारं वृत्तं पित्तलस्य

(घ) ३. 'राश्य' मिटाया हुआ — ८. तदग्रिम for (तदग्निम)
१०. चतुरंगुलायामपत्रयुतं for (चतुरंमुलायामपुतं)

(ङ) १. प्राणाल्यां for (प्रणाल्पां) — २. दसमलग्नस्य for (दशमलग्नस्य)
४. विसर्ग लुप्त — ५. चिन्ह for (चिन्हे)
६. लीपनीयः for (लापनीयं) — ७. च्छर for (छर)
८. दसग्निमराश्यंसा for (तदग्निमराशंस्या)
९. 'इति जयप्रकाशे वेधप्रकारः' लुप्त
१०. चतुरंगुलामयुतं for (चतुरंमुलायामयुतं)

कार्यं। तद्वृत्तं पाषाणादिघर्षणेन समीकृतं श्लक्ष्णं कार्यं। तच्चतुःसूत्रांकितं भांशांकितं च कार्यं। तदेकपालिर्लोहद्युज्यावृत्तकीलितः कार्यः। ऊर्ध्वसूत्रं कीलस्थाने लगति तथा कीलितः कार्यः। अधःसूत्रं द्युज्यावृत्ता[1]द्विगुणा[2]त्परक्रान्तिज्यांतरितं यथा भवति तथा कीलाधारेण युतं कार्यं। एवमुभयपार्श्वेपि कीलाभ्यां दृढं धारितं कार्यं। पुनरा[3]यनपट्टिकायां समानान्तरं प[4]लक्षेत्रद्वयं लोहादिनिर्मितं कृत्वा स्थाप्यं। तत्कर्णपट्योस्तिर्यक् लोहपट्टिका दृढा स्थाप्या। तदुपरि मध्ये छिद्रं[5] कृत्वा किंचित्पराल्पद्यु[6]ज्याधिकं पत्राकारं वृत्तं कीलितं कार्यं। त[7]स्मिन्पत्रे पराल्पद्युज्या [8]वृत्तं कार्यं। तस्मिन् षष्टिघटिकाः भांशाश्चाँकनीयाः। तन्मध्ये चतुरंगुलाधिकं दृढं की[9]लं कृत्वा पूर्वकृतं क्रान्तिवृत्तं [10]चतुःसूत्रे पातकृतछिद्रे प्रोतकार्यं यथा भ्रममाणं भवति तथा कार्यं। ऊर्ध्वसूत्रे क्रान्तिवृत्ते मकरास्यचिह्नं कार्यं। अधःसूत्रे कर्कचिह्नं कार्यं पार्श्वयोर्मेषतुलाचिह्ने कार्ये। क्रान्तिवृ[11]त्ते केन्द्रे सूक्ष्मं चिह्नं कृत्वा वृत्तव्यासात्किंचिदधिका लोहपट्टिका वेधार्थं कार्या। तदेकतरप्रांतस्तु क्रांतिवृत्तपालिकृतांशेषु यथा भ्रमति यथा विधेयः। द्वितीयप्रान्ते वृत्ततुरीयं पट्टीसंलग्न केन्द्रं यथा भवति तथा स्थापनीयं। तुरीयपालौ नवत्यंशाश्चांकनीयाः। तत्केन्द्रे नलिकायुतपट्टिकाकीलेन प्रोता कार्या। यथा तदग्रं तुरीयवृत्तपालिस्थांशेषु भ्रमति तथा कार्यं।

इति यन्त्र निर्माणप्रकारः।

(ঘ) १. द्विगुणत्परक्रांति for (द्विगुणात्परक्रान्ति)
३. पुनरायत for (पुनरायन)　　४ पलभाक्षेत्रद्वयं for (पलक्षेत्रद्वयं) (ङ)
१०. चतुः सूत्रसंपात for (चतुःसूत्रे पात) (ङ)

(ङ) २. वृत्तद्विगुणात् for (वृत्ताद्विगुणात्)　　५. चिन्हं for (छिद्रं)
६. परालघुज्यादिकं for (परालप्द्युज्याधिकं)
७. +तस्मिन्पत्रे परालद्युज्यावृपरिमध्ये छिद्रं कृत्वा किंचित्पराल्पद्युज्यादिकं पत्राकारं वृत्तं कीलितं कार्यं+
८. +धिकपत्राकार+　　९. कीलकं for (कीलं)
११. वृत्त for (वृत्ते)

अथ वेध प्रकारः प्रोच्यते —

यन्त्रान्तरान्मकरस्य[१] नतघटिका वेधसमये ज्ञेयाः। स्वनतघटीषु मकरास्यं स्थापयित्वा तुरीयकेन्द्रगतनलिकया ग्रहर्क्षादिकं वेधयेत्। तुरीये यावन्तोंशा बृहत्पट्टिकातो भवन्ति ते शरांशा ज्ञेया, बृहत्पट्टिकायाः सूक्ष्माग्रं यत्र लगति तत्र यद्राश्यादिकं तत्षड्राशियुतं ध्रुवको भवति।

अथ दक्षिण[२]गोलस्थग्रहर्क्षवेधार्थं तुरीयकेन्द्रं पट्टिकातस्तुरीयत्रिज्यान्तरे कार्यं। तुरीयपालिस्तु पट्टिका संलग्ना कार्या। अस्माभिरिदं यन्त्रं कर्महस्तव्यासमितं कृतमस्ति।

इति क्रान्तिवृत्तं यन्त्रं।

इति यन्त्राध्यायः।

अथ वक्ष्यमाणगणितोपयोगिज्याचापादिकं रेखागणितसाध्यं प्रतिपाद्यते—

यस्य कस्यचिद्वृत्तस्य षष्ट्युत्तर [३]शतत्रयपरिमिता विभागाः कल्प्यन्ते। तद्व्यासस्य विंशत्युत्तर[४]शतमिता विभागाः कल्प्या[५]ः। प्रत्येकविभागस्य षष्टिमिता विभागाः कला भवन्ति। कलायाः षष्टिमिता विभागाः विकला भवन्ति। एवमग्रेऽपि विभागाः ज्ञेयाः।

अथ ज्योत्पत्तिः—

ज्योत्पत्तिं ये विजानन्ति त एवाचार्यसंज्ञि[६]ताः।
अतस्तां वच्मि विविधां गणकानन्दकारिणीं ॥१॥
व्यासार्द्धमानेन विधाय वृत्तं समावनौ चक्रकलांकितं च।
दिगंकितं प्रागपराख्यसूत्रयुक्तं[७] भुजांशा[८]नुभयत्र दत्त्वा ॥२॥

(ङ) १. मकरास्येन for (मकरस्य नत) २. दक्षण for (दक्षिण)
३. सतत्रय for (शतत्रय) ४. सतमिता for (शतमिता)
५. 'कल्प्याः' लुप्त ६. संज्ञिकाः for (संज्ञिताः)
७. युतं for (युक्तं)
८. भुजामानुभयत्र for (भुजांशानुभयत्र)

Indira Gandhi National Centre for the Arts

तदग्रयोर्यद्धि निवद्धसूत्रं पूर्णज्यकाद्विघ्नभुजांशकानां ।
ज्यां ज्यार्द्धमेव प्रवदन्ति तद्ज्ञा यतस्तदद्धाग्रिगतो ग्रहेन्द्रः ॥३॥
अतो वृतेः प्राक्परचिह्नतश्च भुजांशकानेकत एव दत्त्वा ।
तिर्यग्गता मध्यमसूत्रतश्च रेखा भवेद्याभुर्जासिंजिनीह ॥४॥
एवं हि याम्योत्तरसूत्रतश्च कोट्यंशसक्ता खलु कोटिजीवा ।
तद्वर्गयोगस्य पदं त्रिभज्या कर्णो भवेत्क्षेत्रमिदं हि जात्यम् ॥५॥
त्रिज्याकृतिर्दोर्गुणवर्गहीना तस्याः पदं कोटिलवज्यका स्यात् ।
कोटिज्यका वर्गविहीनितायास्त्रिज्याकृतेः स्याच्च पदं भुजज्या ॥६॥
दोर्ज्या विशुद्धा त्रिभसिंजिनीतो कोट्युत्क्रमज्या विशिखाभिधाना ।
कोटिज्यकोना यदि भत्रयज्याभुजोत्क्रमज्या प्रभेत्तदानीं ॥७॥
क्रमोत्क्रमे ज्ये भुजकोटिरूपे तद्वर्गयोगाब्धिलवस्य मूलं ।
भवेद्भुजार्द्धांशकसिंजिनी वा प्रकारतस्तां प्रवदामि सम्यक् ।
व्यासोत्क्रमज्याहतितूर्यभागमूलं तदर्द्धांशकसिंजिनी वा ॥८॥
व्यासाच्छरघ्नाच्छरवर्गरहीनान्मूलं भुजज्याथ तदीयवर्गं ।
शरोद्धृताद्यो खलुविस्तृतिः स्यात्तदर्द्धकोट्यन्तरतः शरः स्यात् ॥९॥
व्यासार्द्धमानं त्रिभसिंजिनीह भवेत्तदर्द्धं खगुणांश जीवा ।
त्रिज्याकृतेरर्द्धपदं तु यत्स्यात्तद्वाणवेदप्रमितांशजीवा ॥१०॥

(घ) ६. प्रभवेत्तदानीं for (प्रभेत्तदानीं) (ख)
११. छरवर्गहीनान् for (छरवर्गरहीनान्) (ङ)

(ङ) १. तदर्द्धाग्र for (तदद्धाग्रि) २. भवद्ग्रा for (भवेद्या)
३. कृत for (कृतेः) ४. शिंजिनीतः for (सिंजिनीतो)
५. कोटिक्रमज्या for (कोट्युत्क्रमज्या)
७. त्क्रमभुजकोटिरूपे for (त्क्रमे ज्ये भुजकोटिरूपे)
८. शिंजिनी for (सिंजिनी) ९. शिंजिनी for (सिंजनी)
१०. व्यासाच्छरघ्ना for (व्यासाछरघ्ना)
१२. कोटयन्तरतः for (कोट्यन्तरतः) १३. शिंजनी for (सिंजिनी)

Indira Gandhi National Centre for the Arts

त्रिज्यार्द्ध वर्गादिषु संगुणाच्च मूलं शरामांशक[1] जीवयोनं ।
तदर्द्धकं स्याद् धृति भागजीवा तत्कोटिजीवा द्विनगांशकानां ।।११।।
तस्यास्तदर्द्धांशकसिंजिनी[2] स्यात्तत्कोटिजीवा[3] कृतमार्गणज्या ।
पुनस्ततस्तद्दलभागकानाँ जीवा प्रसाध्या न गदस्त्रकानां ।।१२।।

अथ द्विगुणांशजीवा—

अन्योन्य कोटिज्यकया विनिघ्नो[4] भुजांशजीवे त्रिभजीवयाप्ते ।
तल्लब्धि योगांतरके क्रमेण चापैक्यचापांतरजीवके स्तः ।।१३।।

अथ चापज्याज्ञाने सति चाप तृतीयांश ज्यानयनं—

दोर्ज्याविधायकरसंगुणितां, त्रिभक्तां कुर्यात्पृथक् फललवान् गणकप्रवीणः ।
व्यासार्द्धवर्गविहृते घन[5]केतु तेषां भागावशेषसहितं फल[6]मग्नि भक्त ।।१४।।
लब्धं कलालवतले विनिवेश्य पंक्तेः कार्यो धनः[7] प्रथमकेन घनेन हीनः ।
व्यासार्द्धवर्गविहृतः फलयुक्तशेषं, रामैर्भजेद्विकालिकास्तदधो निवेश्याः ।।१५।।
पंक्तेर्घनात्पूर्वघने विशोधिते त्रिभज्यकावर्ग हृते[8] तु यत्फलं ।
भाज्यावशेषे सहितं विधाय मुहुस्तदग्रे तु विधिः पुरोक्तः ।।१६।।
पंक्त्यर्द्धकं स्याद्धि धनुस्त्रिभागजीवाथ तां वच्मि पुनः प्रकारात् ।
मेदैरनेकै[9]र्गणकस्य बुद्धिः प्रवीणतामेति यतः स्वशास्त्रे ।।१७।।
स्वत्र्यंशहीना भुजसिंजिनी[10] वा पृथग्घनो[11] स्यास्त्रिगुणस्य कृत्या ।
त्रिघ्न्याहृतो लब्धियुता मुहुर्वातदर्द्धकं चापगुणांश[12]जीवा ।।१८।।

(घ) ७. घनः for (धनः)
११. पृथघ्घनो for (पृथग्घनो)
९. भेदैरनेकै for (मेदैरनेकै) (ङ)

(ङ) १. मांसक for (मांशक)
२. शिंजिनी for (सिंजिनी)
३. स्यात्कोटि for (स्यात्तत्कोटि)
४. विनिघ्नेत्प्र for (विनिघ्नी)
५. धन for (घन)
६. पल for (फल)
८. हते for (हृते)
१०. शिंजिनी for (सिंजिनी)
१२. गुणांस for (गुणांश)

Indira Gandhi National Centre for the Arts

भुजांशजीवा[1] त्रिलवः पृथक्स्थः स्वत्र्यंशयुक्तेन धनेन तस्य ।
त्रिभज्यका वर्गविभाजितेन युक्तो मुहुः स्यात्त्रिलवस्य जीवा ॥१९॥
पुनः प्रकारं वक्ष्यामि चापत्र्यंशस्य सिंजिनीं[2] ।
खमभ्रं खनखाश्चायं ०।०।०।२० गुणो रूपधनस्य च ॥२०॥
भुजज्यका स्वत्रिलवेन हीना घनेन तस्या गुणका हतेन ।
युता मुहुस्तद्दलकं ज्यका स्याद्धनुस्त्रिभागस्य पुरोक्ततुल्या ॥२१॥
प्रकारान्तरतो वक्ष्ये चापत्रिलवमौर्विकां रूपाणां ।
गुणकश्चायं खमाकाशं धरा नखाः ०।०।१।२० ॥२२॥
भुजांशमौर्वीत्रिलवः पृथक्स्थो घनेन तस्य स्वगुणाहृतेन ।
युतो सकृद्वा धनुषस्त्रिभागमौर्वी भवेत्प्राक्ज्यकया समाना[3] ॥२३॥
अथ चाप ज्ञाने सति पंचमांशज्यानयनं-
भुजांशज्यका पंचमांशः पृथक्स्थो घनात्तस्य विष्कंभवेदांशकृत्या[4] ॥२४॥
हृताल्लब्धमाद्यो[5] भवेत्तद्विनिघ्नः प्रसिद्धज्यका पंचमांशस्य जीवा[6] ॥२५॥

अथैतेषां श्लोकानां व्याख्या सोपपत्तिका लिख्यते । ज्योत्पत्तिमिति स्पष्टार्थं पद्यं ॥१॥ व्यासार्द्धमानेनेति—जलसमीकृतायां भूमौ अभीष्टत्रिज्यामितकर्कटेन वृत्तं कार्यं । अत्रास्माभिः षष्टिमितैव त्रिज्या कल्पितास्ति । पुनर्वृत्तं चक्रकलान्वितं दिगंकितं प्रागपरसूत्रयुतं च कार्यं । येषां भुजांशानां जीवाऽभीष्टाऽस्ति, ते भुजांशा उभयत्र देयाः ॥२॥ तदग्रयोरिति–तदग्रगतं सूत्रं द्विगुणभुजांशानां पूर्णज्या भवति । प्राचीनैस्तु पूर्णज्यया व्यवहृतमाधुनिकास्तु ज्यार्द्धेन व्यवहरंति, उभयोः

(घ) ५. माद्यो for (माद्यो)
६. + वर्गः ॥२४॥ त्रिराशिज्यकायास्तुवर्गेण भक्तः फलं स्वीय पंचांशहीनं परः स्यात् ।
परोनेन चाद्येन युक्तः पृथक्स्थः स्फुटः स्यान्मुहुः पंचमांशस्य +

(ङ) १. जीव for (जीवा) २. शिंजिनीं for (सिंजिनीं)
३. ज्यकयांसानां for (ज्यकया समाना)
४. वेदांसवृत्त्या for (वेदांशकृत्या)

Indira Gandhi National Centre for the Arts

फलं तुल्यमेव। तद्ज्ञाः (तज्ज्ञाः) एतत्सकारणं वदंति यतः[1] ग्रहः ज्यार्द्धाग्रगत एव दृश्यते ।।३।। अतोवृत्तेरिति--स्पष्टार्थं पद्यं ।।४।। एवमिति – पूर्वचिह्नादभीष्ट[2]-स्थानपर्यंतं भुजांशा भवंति। तेषां जीवा भुजज्या भवति। तिर्यक् चिह्नादभीष्ट-स्थानपर्यंतं कोट्यंशा[3] भवंति। तेषां जीवा कोटिज्या भवति। केन्द्रादभीष्टचिह्न-स्थानपर्यंतं त्रिज्यामितः कर्णो भवति। अयं भुजज्या कोटिज्या वर्गयोगमूलतुल्यो भवति, तेनेदं जात्यक्षेत्रं भवति ।।५।। त्रिज्याकृतिरिति – त्रिज्यावर्गो दोर्ज्यावर्ग-हीनः तस्य मूलं कोट्यंशज्या[4] भवति। त्रिज्यावर्गः कोटिज्यावर्गहीनोस्य पदं भुजज्या भवति ।।६।। दोर्ज्येति—दोर्ज्या भुजज्या त्रिभज्यातः शुद्धा शराभिधा कोट्युत्क्रमज्या[5] भवति। भत्रयज्या कोटिज्योना भुजोत्क्रमज्या भवति ।।७।। क्रमोत्क्रम-ज्येति—क्रमज्याभुज उत्क्रमज्याकोटिः। भुजवर्गकोटिवर्गयोग-चतुर्थांशमूलं भुजार्द्धांशज्या भवति।

अथवा त्रिज्योत्क्रमज्ययोर्घातार्द्धस्य[6] मूलं भुजार्द्धांशज्या भवति। अत्रोपपत्तिः— समावनौ त्रिज्यामितव्यासार्द्धेन वृत्तं कार्यं। तत्र पूर्वापरा रेखा[7] कार्या। पूर्वरेखातो ज्ञातभुजांशानां दोर्ज्या देया। भुजाग्रात्पूर्वचिह्नपर्यंतं भुजांशो[8] न भार्द्धांशानां पूर्णज्या[9] च देया। भुजपूर्णज्याकोटि[10] पूर्णज्यायोगे समकोणो भवति। भुजपूर्णज्या भुजो भवति। भुजो न[11] भार्द्धांशानां पूर्णज्या[12] कोटिर्भवति। व्यासः कर्णो भवति। इदं जात्यक्षेत्रं जातं। पुनर्भुजज्या व्याससूत्रसंपाते समकोणो भवति।

(घ) ३. कोटच ंशा for (कोट्यंशा) ४. कोटच ंश for (कोट्यंश) (ङ)

५. कोटच ुत्क्रमज्या for (कोट्युत्क्रमज्या)

८. + भुजांशानां पूर्णज्या देया। भुजाग्रात्पश्चिमचिह्नपर्यंतं +

(ङ) १. यतो ग्रहो for (यतः ग्रहः) २. दभिष्ट for (दभीष्ट)

६. जयोर्घातर्द्धस्य for (ज्ययोर्घातार्द्धस्य)

७. रेखावनयोः for (रेखा कार्या)

९-१०. 'पूर्णज्या·········ज्याकोटि' लुप्त

११. भुजांशान for (भुजोन) १२. + देया-:-

Indira Gandhi National Centre for the Arts

भुजज्याकोटिर्भवति । भुजोत्क्रमज्या भुजो भवति । भुजपूर्णज्याकर्णो भवति । इदमपि ज्यात्यमस्ति[1] । एतत्क्षेत्रद्वयं कोणत्रयस्यैकभुजस्य च साम्यात्सजातीयं भवति । अत्र भुजांशपूर्णज्यार्द्धं भुजार्द्धांशानां जीवा भवति । अत्रानुपातः—यदि द्विगुणत्रिज्यया भुजपूर्णज्या लभ्यते तदा भुजपूर्णज्यया किमिति लब्धं भुजोत्क्रमज्या, तेनेदं ज्ञातं, भुजोत्क्रमज्या द्विगुणत्रिज्याघातः भुजपूर्णज्या वर्गो भवति । कुतः व्यासपूर्णज्ययोर्निःष्पत्तिः पूर्णज्योत्क्रमज्यानिष्पत्तितुल्यास्ति, तन्मूलार्द्धं भुजार्द्धांशानां जीवा भवति इत्युपपन्नं । क्षेत्रं यथा ॥८॥ व्यासाच्छरघ्नादिति । उत्क्रामज्या गुणितव्यासाद्व्युतक्रमज्यावर्गः शोध्यते[2] तदा भुजज्या वर्गोवशिष्यते तन्मूलं भुजज्या भवति । जीवा वर्गउत्क्रमज्या भक्तः फलस्योत्क्रमज्यायाश्च योगः व्यासो भवति । व्यासार्द्धस्य भुजकोटिज्यायांश्चांतरादुत्क्रमज्या भवति । अत्रोपपत्तिः—पूर्वक्षेत्रेणैव सा यथा । व्यासोत्क्रमज्या घातो भुजपूर्णज्यावर्गो भवति । तस्मिन्नुत्क्रमज्यावर्गे शोधिते भुजज्यावर्गोवशिष्यते तन्मूलं भुजज्या भवतीत्युपपन्नं ।

अथ उत्क्रमज्या भुजे भुजज्या[3]कोटिरिति । लब्धिरुत्क्रमज्यो न व्यासो भवति । तदुत्क्रमज्यायोगः यासो भवतीति स्पष्टमेव ॥९॥ व्यासार्द्धमानमितिव्यासार्द्धमानं राशित्रयस्य ज्या भवति । तदर्द्धं त्रिंशदंशानां जीवा भवति । तत्कोटिज्या षष्टचंशा ६० जीवा भवति । त्रिजा[4]वर्गार्द्धमूलं पंचचत्वारिंशदंशानां जीवा भवति । अत्रोपपत्तिः— वृत्तषष्ठांशस्य पूर्णज्या त्रिज्यातुल्या भवति । इति रेखागणिते चतुर्थाध्याये पंचदशे शकले[5] प्रतिपादितमस्ति । अतः तदर्द्धं[6] त्रिंश-

(घ) १. जात्यमस्ति for (ज्यात्यमस्ति)
६. तदर्द्धं for (तदर्द्धं)

(ङ) २. साध्यते for (शोध्यते)
५. सकले for (शकले)

३. + कोटिः भुजज्याभुज +

४. त्रिज्या for (त्रिजा)





Indira Gandhi National Centre for the Arts

(ङ) १ मानिय for (मानीय)
२. +नवत्यंशयुक्तं कृत्वा शेषांसानुदयांशकान्। सरासानक्षभागाश्च कल्पयित्वा विचक्षणः। शरतुल्यांसा स यत्र कोष्ठस्थोदयभागकैः संसाध्यः लग्नं तस्मिश्च। खभवा सान्विसोधयेत् +
४–५. 'तस्मा—लग्नं त' लुप्त
६-७. 'स्मिश्च—भागकः' लुप्त
८. स्यादायनदृग्राहः for (स्यादायदृग्ग्रहः)
९. नाडिवृत्तं for (नाडीवृत्तं)
१०. कल्पिः for (कल्पितः)
११. सोधिवतायतः for (शोधितायतः)
१२. सौमाक्षासत्वं for (सौम्याक्षांशत्वं)
१३. सड्रास्युदया for (षड्राश्युदया)

Indira Gandhi National Centre for the Arts

दयास्ते[१] सौम्याक्षांशानां तुलादिषड्राश्युदया भवन्ति । इत्युपपन्नं[२] यथोक्तं ।

इत्यायनदृक्कर्म[३] ।[४]

स्पष्टायमाच्चरलवानुदये विधाय तान् भस्य वैषुवलवेष्वयमांशगोलात्[५] ।
कुर्याद्दृणं धनमतो[६] विपरीतमस्ते स्यात्स्वोदयांशक[७] इहास्तमयांशकश्च ॥१॥
स्वीयोदयांशान् स्वपलांशपत्रे[८] धनुर्भवेत्स्वोदयलग्नकं तत् ।
स्वास्तांशतो[९] भार्द्धलवैरुपेतात्स्वास्ताख्यलग्नं[१०] खलु भोदयास्ते ॥२॥

अथ श्लोक द्वयस्यार्थः—

स्पष्टक्रान्तेश्चरमानीय[११] आयनदृक्कर्मसंस्कृतोदये स्पष्टक्रान्तिः सौम्ययाम्यगोलयोः क्रमेण[१२] ऋणं धनं च कार्यं। स आयनदृक्कर्म ास्तमया संस्कृतस्योदयो भवति। तस्माल्लग्नं[१३] साध्यं तदुदयलग्नं भवति। अस्ते चरं विपरीतं दत्त्वा भार्द्धांशाश्च-दत्त्वा लग्नं[१४] साध्यं तदस्तलग्नं भवति।

अत्रोपपत्तिः—उत्तरगोले क्रान्तौ सत्यां यस्य ग्रहस्य नक्षत्रस्य वा तद्बिंबोपरिगतं क्षितिजवृत्तं नाडीवृत्ते यत्र लगति तच्चिन्हं[१५] आयनदृक्कर्म संस्कृतोदय चि-

---

(घ) ३. स्पष्ट नहीं है। ४. + अथाक्षदृक्कर्म +

(ङ) १. + सौम्याक्षासत्वं भवति, याम्याक्षासानां ये मेषादि षड्रास्युदयास्ते +
२. इत्युपपनं for (इत्युपपन्नं)
३. इत्यायनदृकर्म for (इत्यायनदृक्कर्म)
५. वेषुयमासगोलात् for (वेष्वयमांशगोलात्)
६. धणमतो for (धनमतो) ७. मस्तत् for (मस्ते स्यात्)
८. स्वपलासपत्रे for (स्वपलांशपत्रे) ९. खास्तांसतो for (स्वास्तांशतो)
१०. स्वात्खाख्य for (स्वास्ताख्य) ११. क्रान्ति for (क्रान्ते)
१२. 'क्रमेण' लुप्त १३. तस्मालग्नं for (तस्माल्लग्नं)
१४. ग्नं for (लग्नं) १५. नवतिचिह्न for (तच्चिन्हं)

Indira Gandhi National Centre for the Arts

ह्वात्स्पष्टक्रान्त्युत्पन्न चरांशैरुदये पश्चिमत एव भवति। *दक्षिणक्रान्तौ पूर्वत एव भवति। अस्ते एतद्विपरीतं भवतीत्युपपन्नं[1]।

इत्याक्षदृक्कर्म

अथ दृश्यादृश्यत्वमुच्यते[2]—

ग्रहोदयांशानुदयांशकेभ्यो लग्नस्य संशोध्य यदत्र शेषं।
स्वाहर्द्[3]लांशानधिकं यदा स्यात्तदा ग्रहः स्वक्षितिजोपरिस्थः ॥१॥
पूर्वे[4] कपालेऽस्त्यथ चेद्दिनार्द्धांशाः[5] शेषतुल्याः खचरस्तु वृत्ते।
याम्योत्तराख्ये स्वदिनार्द्ध[6]भागाधिकं दिनांशानधिकं[7] यदा स्यात् ॥२॥
शेषं तदा स्वक्षितिजोपरिष्टात्पश्चात्कपालेस्ति खगोथशेषं।
स्वाहर्मितेरंशसमं तदास्तभूजेखगोस्तीति[8] विनिश्चयोयं ॥३॥

अथार्थः[9]—

ग्रहोदयांशा लग्नोदयांशेभ्यः शोध्याः। शेषं दिनार्द्धांशेभ्यो यदि न्यूनं तदा ग्रहः क्षितिजादुपरि पूर्वकपालेस्तीति ज्ञेयं, दिनार्द्धांशसमानाः शेषांशास्तदा खमध्येस्तीति। यदि दिनार्द्धांशोधिका[10]दिनमानांशेभ्यो न्यूनास्तदा क्षितिजादुपरि पश्चिमकपोलस्तीति वेदितव्यं। दिनांशसमानाश्चेदस्तक्षितिजेस्तीत्ययं निश्चयोस्ति।

(घ) १०. दिनार्द्धांशाधिका for (दिनार्द्धांशोधिका) (ङ)

* नोट—यह वाक्य यहां बाईं ओर मार्जिन में अंकित है।

(ङ) १. भवतीपपन्नं for (भवतीत्यूपन्नं) २. दृस्यात्वमुच्यते for (दृश्यादृश्यत्वमुच्यते)

३. स्वाहदलांशा for (स्वाहर्द्लांशा)

४. पूर्वो for (पूर्वे)

५. स्यथचादिनार्द्धांसाः for (ऽस्त्यथचेद्दिनार्द्धांशाः)

६. स्वरिनार्द्ध for (स्वदिनार्द्ध) ७. + दिनांसानधिकं +

८. खगोस्तिति for (खगोस्तीति) ९. अस्यार्थः for (अथार्थः)

Indira Gandhi National Centre for the Arts

[1]अथोन्नतांशेभ्यो दिगंशज्ञानं—

दृगुन्नतज्याक्षभया[2] विनिघ्नी सूर्योद्धृता[3] शंकुतलं सदैव ।
याम्यं भवेद्वोन्नतभागजीवा लम्बज्यकाप्ता[4]क्षगुणेन निघ्नी ।।१।।
तदग्रया संस्कृतमत्रदोः स्यादसौ त्रिभज्या गुणितो हृतश्च ।
दृग्जीवयाप्तस्य धनुर्दिगंशा भुजांशदिक्काः[5] सुधियावगम्याः ।।२।।
यद्वा द्विधा स्थापितलंबभागा युतोनि[6]ताश्चोन्नतभागकैस्ते ।
तज्जीवयो[7]र्योगवियोगखण्डमाद्या[8]न्यसंज्ञं क्रमशो विचिन्त्यं[9] ।।३।।
याम्यान[10]भोगापमभागकाश्चेत्तज्या[11]न्यसंज्ञेन युता विधेया ।
यद्युत्तरः स्यादपमो ग्रहस्य क्रांतिज्यकान्यांतरमत्र कार्यं ।।४।।
योगो वियोगस्त्रिभसिंजिनी[12]घ्नश्चाद्योद्धृतो लब्धधनुर्दिगंशाः ।

अथ प्रकारांतरम्—

द्युरात्रवृत्ते नतकालमौर्वी स्पष्टद्यु[13]जीवा गुणिता विभक्ता ।
नतांशमौर्व्याप्तफ[14]लस्य चापं खांकांशशुद्धं च दिगंशकाः स्युः ।

अथार्थः—

[15]उन्नतांशज्यापलभागुणा द्वादशभक्ता शंकुतलं सदैव दक्षिणं भवति । अथवा

(ङ) १: अथौनतांशेभ्यो for (अथोन्नतांशेभ्यो)
२. वया for (भया) ३. सूर्यादूवृत्ता for (सूर्योद्धृता)
४. ज्यकाशा for (ज्यकाप्ता)
५. भुजांसंधिका for (भुजांशदिक्काः)
६. + ता + ७. तजीवयो for (तज्जीवयो)
८. माद्यामक्रसंज्ञं for (माद्यान्य संज्ञं)
९. विचित्त for (विचिन्त्यं) १०. यामान्य for (याम्यान)
११. त्तजान्यसंज्ञेन for (त्तज्यान्यसंज्ञेन)
१२. शिंजिनिघ्न for (सिंजिनीघ्न) १३. द्युज्या for (द्यु)
१४. पलस्य for (फलस्य) १५. उनतांस for (उन्नतांश)

उन्नतांशज्या अक्षांशज्या गुणालम्बांशज्या भक्ता लब्धं शंकुतलं सदा दक्षिणमेव। इदमग्रया संस्कृतं भुजो भवति। अयं त्रिज्यागुणो दृग्ज्या[1]भक्तो दिगंशज्याऽस्या[2]श्चापं दिगंशाः भुजदिक्काः ज्ञेयाः।

अथ प्रकारान्तरं। उन्नतांशा लम्बांशेषू[3]नयुताः[4] कार्याः। उभयोर्जीवे कार्ये ज्ययोर्योगार्द्धं प्रथमसंज्ञं। ज्ययो[5]रन्तरार्द्धं द्वितीयसंज्ञं भवति। यदि ग्रहस्प[6]ष्टक्रांति-र्दक्षिणा तदा क्रान्तिज्या द्वितीयेन युता। यद्युत्तरा क्रान्तिस्तदा क्रान्तिज्या द्विती-यान्तरं कार्यं शेषं त्रिज्यागुणं प्रथमसंज्ञेन भक्तं लब्धादिगंशज्या त[7]च्चापं दिगंशाः। पुनः प्रकारान्तरं—वक्ष्यमाण प्रकारेणोन्नतांशेभ्यो नतकालमानी यतज्जीवा[8] साध्या, सा स्पष्टक्रान्तिकोटिज्या गुणिता नतांशज्या भक्ता लब्धं दिगंशकोटिज्या [9]ऽस्याश्चापं नवतिशुद्धं दिगंशाः। यद्वा द्विधा स्थापितलम्बभागा इत्यस्योपपत्तिः- कखगघ याम्यो[10]त्तरवृत्तं। झघ[11]मुन्नतांशचापं। अद्य लंबाशचापं। कझ अन्तरं। [12]झतमन्तरज्या। [13]बपं उन्नतांशचापं [14]खघंलम्बांशचापं। [15]वगं योगः। वपं योगजीवा-लततुल्या [16]झतलतयोर्योगार्द्धं। क्षत संज्ञा जीवा प्रथमं। झतलतयोरन्तरार्द्धं स्पष्ट-क्रान्तिज्या स च संज्ञा दक्षिणा। उत्तराक्रान्तिर्यं[17]शं। अन्तरार्द्धंजशं। सथं क्रान्ति-

---

(घ) १३. बसं for (वपं)   १४. खगं for (खघं)

(ङ) १. दृगज्या for (दृग्ज्या)   २. साश्चापं for (ऽस्याश्चापं)
३. लम्बांशेषु for (लम्बांशेषू)   ४. युक्ता for (युताः)
५. जयो for (ज्ययोः)   ६. स्थानं for (स्पष्ट)
७. तचापं for (तच्चापं)   ८. तजिवा for (तज्जीवा)
९. साश्चापं for (ऽ स्याश्चापं)   १०. यामोत्तर for (याम्योत्तर)
११. धमुन्नतांस for (झधमुन्नतांश)   १२. गमतरज्या for (झतमन्तरज्या)
१५. चगं for (वगं)   १६. अतलतयो for (झतलतयो)
१७. राशं for (यंशं)

ज्या[1] द्वितीययोर्योगः। क्रान्तिज्या द्वितीययोर[2]न्तरजपं। झनमत्रिभुजं सथम त्रिभु-जयोः[3] साजा[4]त्यं। यदि नझमित[5]।

अथ दे[6]नजूमकर्णः प्राप्यते[7]। तदा सथे न किमिति लब्धसमकर्णः। झ[8]नम-त्रिभुजं जपमत्रिभुजं च मिथः सजातीयं। यदि झनेन झमं लभ्यते। तदा जवे[9]न कि-मिति लब्धं मयं। पुनरनुपातः। दृग्ज्याप्रमाणेनेदं तदा त्रिज्या प्रमाणेन किमिति लब्धं, दिगंशज्या अ[10]स्याश्चापं दिगंशा भवन्तीत्युपपन्नं। क्षेत्रं च। द्यु[11]रात्रवृत्ते इत्य-स्योपपत्तिः। त्र[12]योदशक्षेत्रेण। कगजझं क्षितिजवृत्तं। झसगं नाडीवलयं। यतश्रं ध्रुववृत्तं। हृतवं दृग्वलयं। कहजं याम्योत्तरवृत्तं। गतघझं भसदृशवृत्तं। तहं न-

---

(घ) ६. नभमकर्णः for (देनजूमकर्णः)
   ९. जयेन for (जवेन) (ङ)   ११. 'द्युरात्र—पत्तिः' लुप्त
   १२. 'त्रयोदश—सजाती' समस्त लुप्त

(ङ) १. क्रान्तिययोर्योगः for (क्रान्तिज्या द्वितीययोर्योगः)
   २. द्वितीययोरन्जपजयं for (द्वितीययोरन्तरजपं)
   ३. भुजुयोः for (भुजयोः)   ४. सजात्यं for (साजात्यं)
   ५. नभमिथ for (नभमित)   ६. येनजमकर्णः for (देनजूमकर्णः)
   ७. सा तेदतां तथेन for (प्राप्यते तदासथेन)
   ८. 'भ' लुप्त   १०. 'स्याश्चापं—पपत्तिः' लुप्त
   १२. 'त्रयोदश—सजाती' समस्त लुप्त





Indira Gandhi National Centre for the Arts

तांशाः । अतं स्पष्टक्रान्तिः । तयं स्पष्ट क्रान्तिकोटिः । स अंनतकालः । यसअत्रि- भुजं यद्यतत्रिभुजं सजातीयं[1] । यदि त्रिज्यामितेन अयेन असंनतकालज्या लभ्यते । तदा द्युज्यामिते नयतेन किमिति लब्धं घतज्या । पुनः हतद्यत्रिभुजं हवकत्रिभुजं च मिथः सजातीयं । यदि हतेन नतांशज्यया द्यतज्या लभ्यते । तदा हवेन किमिति लब्धं बकजीवा वावज जीवा, अस्याश्चापं[2] दिगंशकोटिः । इदं नवतिशुद्धं दिगंशा भवन्तीत्युपपन्नं[3] ।

अथ दिनमानार्द्धसाधनमुच्यते । तद्यथा—

खांका ६० श्चरांशैः सहिता वियुक्ता[4] दिनार्द्धमानं खलु गोलयोः स्यात् ।
तदूनखाष्टेंदुमिता[5] निशार्द्धं तत्तर्कभक्तं घटिकादिकं स्यात् ॥१॥

अथ भावसाधनम्—

विलग्नजातं रजनी प्रमाणमेकं द्विवेदेषु हतं तु योज्यं ।
लग्नांशकानां विषुवांशकेर् साध्यास्ततः क्षेत्रलवाः पुरावत् ॥२॥
ते स्युर्द्विरामेषु रसास्तु भावास्तत्सप्तमाः षट्कयुता विचिंत्याः ।
षड्राशियुक्तं दशमं तुरीयं लग्नं स षड्भं[6] खलु सप्तमं स्यात् ॥३॥
दिन[7]प्रमाणं रजनीप्रमाणं निरक्षदेशेषु समं सदैव ।
लंबांशका यत्र परापमांशास्तत्रापवृत्तं कुजसंनिभं स्यात् ॥४॥
अथोकुष्ठष्ठोर्ध्वंग[8] चिह्नगानां दिनप्रमाणं कथयामि सूक्ष्मं ।
त्रिज्यार्ककर्णेन हृता फलस्य[9] चापं भवेद्भू पिहितं लवाद्यं ॥५॥

(घ) १. 'यं । यदि—जीवा अ' समस्त लुप्त
२-३. 'स्याश्चापं—त्युपपन्नं' लुप्त   ६. सड्भं for (षड्भं)

(ङ) १. 'यं यदि—जीवा अ' समस्त लुप्त
२. 'स्याश्चापं—खांका' लुप्त   ४. वियुता for (वियुक्ता)
५. जतननखाष्टेंदुमितानि for (तदूनखाष्टेंदुमितानि)
६. खड्भं for (सषड्भं)   ७. दीन for (दिन)
८. 'ष्ठ' लुप्त   ९. पलस्य for (फलस्य)

Indira Gandhi National Centre for the Arts

गर्भीयभूजादधरास्थितांशा दृग्वृत्तगा भूपिहितेन युक्ताः ।
तत्कोटिजीवा विहृता त्रिभज्या रूपेण हीना च भवद्दगौच्यं[१] ॥६॥
यदा रविर्गर्भकुजस्थितः स्यात्कुछन्नकोद्य[२] शक जीवयाप्ता ।
त्रिज्याफलं भूरहितं दृगौच्यं[३] स्याद्योजनाद्य क्षिति खण्डनिघ्नं ॥७॥[४]
ध्रुवादधः संस्थित देशगानां मेरुस्थितानां[५] क्षितिपृष्ठतस्तु[६] ।
अश्वेंदुभिर्बाणपयोधिभिश्च तथा[७] च षड्गोमितयोजनैश्च ॥८॥
मीनादिकुंभादि मृगादिसंस्थो दृग्गोचरः[८] स्यात्सविताक्रमेण ।
दृगौच्यमाने बिदिते प्रसाध्यं दृश्यांशकज्ञानमतो[९] विलोमात् ॥९॥

अथ मध्यनतांशेभ्यो रविज्ञानं—

क्रांत्यंक्षसंस्कारवशान्नतांशा[१०] तद्गूनखांकाश्च तथोन्नतांशाः ।
पलांशनम्रांशकयोर्विलोमसंस्कारतः क्रांति लवा भवेयुः ॥१०॥
तज्या त्रिभज्या गुणिता विभक्ता परापमांशज्यकया फलस्य[११] ।
चापं रविः स्याद्यदि[१२] नम्रभागा अक्षांश[१३]काल्पाः क्षयगामिनश्चेत् ॥२॥
वर्धिष्णवश्चेद्रसराशिशुद्धाः पलांशकेभ्योऽनधिका नतांशाः ।
वृद्धिगता षड्भयुतं रविः स्यात् क्षयिष्णवश्चक्रविशोधितं वै ॥३॥
सौम्या नतांशा यदि[१४] वृद्धिगाः स्युराद्यं पदं स्यात्क्षयगामिनश्चेत् ।

(ङ) १. दृगोचं for (दृगौच्यं) २. कोटांसक for (कोद्यंशक)
३. दृगोच्यं for (दृगौच्यं) ४. '॥७॥' लुप्त
५. मेरुक्षितितानां for (मेरुस्थितानां)
६. स्थिति for (क्षिति) ७. तखा for (तथा)
८. दृगोचरः for (दृग्गोचरः) ९. 'श' लुप्त
१०. वसानतासातदूण for (वशान्नतांशा तद्गून)
११. पलस्य for (फलस्य) १२. साद्यदि for (स्याद्यदि)
१३. अस्यांश for (अक्षांश)
१४. सौम्यान्यतांसायनदि for (सौम्यानतांशा यदि)

पदं द्वितीयं सवि[1]तु[2]र्विचिन्त्यं यत्राक्षभागापमभागकाल्पाः ॥४॥

एवं विभायावशतोपि शंकोः पदं खौ मध्यगते विचिन्त्यं ।

किन्तु प्रभायावशतो नतांशज्ञानं भवे[3]त्सांतरकं हि किंचित् ॥५॥

अथ दृक्क्षेपानयनम्—

खमध्यलग्नो[4]न्नतभागजीवा खलग्नलग्नांतरजीवयाप्ता ।

त्रिज्या गुणा दृग्[5]गतिसंज्ञिता स्या[6]त् त्रिभोनलग्नस्य नरश्च सोत्र ॥१॥

यद्वा रवेरुन्नतभागजीवा वि[7]लग्नसू[8]र्यांतर जीवयाप्ता ।

त्रिज्या गुणा वित्रिभजो नरः स्यात् दृक्क्षेपकस्तद्धनुषस्तुकोटिः ॥२॥

खलग्नजाता विषुवांश[9]का ये त्रिभोनलग्नस्य च ये भवन्ति ।

तदन्तरांशज्यकया विनिघ्नी त्रिभोनलग्नापमकोटिजीवा ॥३॥

विलग्नकाग्र[10]्यज्यकया विभ[11]क्त दृक्क्षेपको वाप्तधनुर्लवाद्यं ।

पलांशजीबा विहृता त्रिभज्या लग्न द्यु जीवा विहृताप्तचापं ॥४॥

त्रिभोन[12]जान्यापमसंस्कृतं वा दृक्क्षेपकः स्यादविशेष दिक्क[13]ः ।

लग्नोदयांशापमकोटिजीवा गुण्या वियल्लग्नन[14]तांशमौर्व्या ॥५॥

(घ) १०. विलग्नकाग्रज्यकया for (विलग्नकाग्र्यज्यकया)

११. विभक्ता for (विभक्त) (ङ)

(ङ) १. सविवितु for (सवितुर्)

२. 'न्त्यं यत्राक्ष—भवेत्सां' लुप्त

३. 'न्त्यं यत्राक्ष—भवेत्सां' लुप्त

४. लग्नोनत for (लग्नोन्नत)

५. दृगाति for (दृग्गति)

६. 'त्' लुप्त

७. + त्यं यत्राक्षभागापमभागकाल्पा ॥४॥ एवं विभावायावशतोपि सकोपदं रवौ मध्यगते विचिन्त्यं किन्तु प्रभायावशतो नतांसज्ञानं भवेत्सा ॥६॥ +

८. पर्यांतर for (सूर्यांतर)

९. विषुबांशाका for (विषुवांशका)

१०. विलग्नकाग्रजकया for (विलग्नकाग्र्यज्यकया)

१२. नज्या for (नजा)

१३. दिक् for (दिक्कः)

१४. 'न' लुप्त

त्रिज्यौ द्‌धृताप्तस्य धनुर्लवाद्यं दृक्क्षेपको वा नतभागदिक्कः ।

अथ[1] खेमध्यलग्नोन्नत भागदिक्क[2] इत्यंतस्यार्थः । दशमोन्नतांशजीवा[3] त्रिज्या[4] गुणा दशमलग्नांतरजीवया भक्ता लब्धा दृग्गतिजीवा[5] अस्याश्चापं दृग्गतिः । इदं नवतिशुद्धं दृक्क्षेपः । वा दशमनतांशजीवा[6] लग्नविषुवांशद्युज्या गुणा त्रिज्या भक्ता लब्धं दृक् क्षेपजीवा । अस्याश्चापं दृक्क्षेपः । दृक्क्षेप । दिक् दशमनतांश-दिक्का ज्ञेया । वा अक्षांशज्या त्रिज्या गुणा लग्नद्युजीवा भक्ता फलचापं दृक्क्षेपवृत्ते खमध्यनाडी वलयोरंतरं[7] । इदं दक्षिणं । वित्रिभान्यक्रांत्या संस्कृतं दृक्क्षेपो भवति ।

अत्रोपपत्तिश्चतुर्दश क्षेत्रेण । कगझदं[8] क्षितिजं । हंखमध्यः । कतअझं क्रांति-वृत्तं । सहवं दृक्क्षेपवृत्तं । दहगं[9] याम्योत्तरवृत्तं[10] । लमनं नाडीवलयं । तं दशमं दतं[11] दशमोन्नतांशाः । हतं नतांशाः । कं सप्तमं[12] । झं लग्नं[13] । स अंदृग्गतिः । अहं दृक्क्षेपः ।

(घ) २. + जीवेत्यारभ्य दृक्क्षेपको वानत भाग +
७. वलययोरन्तर for (वलयोरन्तरं)
८. नोट—अतिरिक्त— + इदं उपपत्ति शकलं मकारद्वयस्य +

(ङ) १. इति for (अथ)
३. दसमौनतांस for (दशमोन्नतांश) ४. जीव्री for (जीवा)
५. दृगाति for (दृग्गति) ६. 'जीवा' लुप्त
९. हहगं for (दहगं) १०. यामोत्तरवृत्तं for (याम्योत्तरवृत्तं)
११. धझतं for (दतं) १२. कसंझमं for (कं सप्तमं)
१३. झंलग्नं for (झंलग्नं)





मं[1] गोलसन्धिः। कतं दशमसप्तमयोरन्तरं। यदि कतेन दत्तं। तदा अकेन[2] असं। मनं लग्नोदयः। नयं उदयक्रान्तिः। व्यथं[3] क्रान्तिकोटिः। तथं नवतिः। यदि तथेन थयं लभ्यते। तदा[4] तहेन ह अमिति। पलांशजीवेत्यस्य। पंचदश क्षेत्रेणोपपत्तिः। कगझदं[5] क्षितिजं। हः खमध्यं। गसदं नाडीवलयं। वतक्रान्तिवृत्तं[6]। कहझं याम्योत्तरवृत्तं। लहनं दृक्क्षेपवृत्तं। अं लग्नं अपं लग्नक्रान्तिः। यथं क्रान्तिकोटिः। सहं अक्षांशाः। हतं दृक्क्षेपः[7]। अथ[8] नवतिः। यदि यथेन[9] थसं लभ्यते। तदा सहे नमहं लभ्यते। तममन्यक्रान्तिर्वित्रिभस्य। अनया हयं संस्कृतं तहं दृक्क्षेपो भवति। शेष प्रकाराणामुपपत्तिस्तु गमा[10]ऽस्ति सुबुद्धीनां[11] किं विस्तरेणेति।

अथ परमोन्नतांशपरमाधरांशलक्षणम्—

वृत्ते याम्योत्तरे भूजाद्ग्रहर्क्षाऽवधियेंशकाः।
उन्नतांशास्त[12] एव स्युः परमादृश्यगोलजाः[13] ॥१॥
क्षितिजाधोथ खेटस्य बिंबपर्यंतमंशकाः।
परमाधरसंज्ञास्ते गोले ज्ञेयमिति स्फुटम् ॥२॥

यस्य नित्योदयास्तौस्तस्तस्य भस्य ग्रहस्य वा[14]।
उन्नतांशाधरांशाश्च परमाः संभवन्ति हि ॥३॥

(घ) ३. यथं for (व्यथं)
 ८. सथं for (अथं)
 १०. सुगमा for (गमा) (ङ)
 ६. वतअं for (वत)
 ९. यसेन for (पथेन)

(ङ) १. भंगोल for (मंगोल)
 ३. 'व्यथं क्रांति' लुप्त
 ५. 'भ' लुप्त
 ११. सुबुद्धिनां for (सुबुद्धीनां)
 १३. ज्या for (जाः)
 २. अनेक for (अकेन)
 ४. + हव +
 ७. + अयं दृक्क्षेपः +
 १२. उनतांस्त एव for (उन्नतांशास्त एव)
 १४. या for (वा)

Indira Gandhi National Centre for the Arts

सदोवितस्य भस्याथ परमाश्चोन्नतांशकाः ।
वारद्वयं भवन्तीह गोलेस्त्येवं[1] परिस्फुटं ॥४॥
ऊर्ध्वाधराख्य[2]भावेन वृत्ते याम्योत्तरे यतः ।
तत्संबंधि द्युरात्रस्य वृत्तं लगति सर्वथा ॥५॥
यस्यर्क्षस्य[3] सदैवास्तस्तस्यैव परमाधराः ।
अंशावारद्वयं गोले भवन्तीति परिस्फुटं ॥६॥
सदोदितर्क्षस्य च यस्य[4] वृत्तं द्युरात्रसंज्ञं क्षितिजेस्ति लग्नं ।
तस्यैकवारं परमोन्नतांशा भवन्ति गोलेस्ति परिस्फुटं त्विदं ॥७॥
ऋक्षस्य[5] यास्यास्तमितस्य[6] नित्यं द्युरात्रवृत्तं क्षितिजेऽस्ति लग्नं ।
तस्यैकवारं परमाधरांशा भवन्ति चैषां कथयामि साधनं ॥८॥
निरक्षदेशे ये स्पष्टाः क्रांत्यंशा द्युरा नतांशकाः ।
नतांशाः खांकशुद्धाः स्युः परमोन्नतभागकाः ॥९॥
तावंत[7] एव परमा अधरांशा भवन्ति हि ।
साक्षदेशे यदृक्षं स्यान्[8]नाडी वलयतो दिशि ॥१०॥
[9]दक्षिणस्यां तदा तस्य स्पष्टा ये क्रांतिभागकाः ।
लंबांशशुद्धा यच्छेयं[10] परमोन्नतभागकाः ॥११॥
साक्षदेक्षे यदृक्ष[11] स्यान्[12]नाडीवलयतो दिशि ।

(घ) ६. यस्यास्तमितस्य for (यास्यास्तमितस्य)
१०. छेषं for (छेयं)

(ङ) १. स्तेवं for (स्त्येवं) २. ख for (ख्य)
३. यस्य तस्य for (यस्यर्क्षस्य)
४. सदोदितभक्षचयस्य for (सदोदितर्क्षस्य च यस्य)
५. ऋणस्य for (ऋक्षस्य) ६. यस्यास्तमितस for (यास्यास्तमितस्य)
७. 'तावंत – भवन्तिहि' लुप्त ८. स्या नाडी for (स्यान्नाडी)
९-११. '॥१०॥ दक्षिण—यदृक्षं स्या' लुप्त
१२. 'न्नाडी – दिशि' लुप्त

Indira Gandhi National Centre for the Arts

उत्तरस्यां तदा तस्य स्पष्टा ये क्रांतिभागकाः ॥१२॥
लंबांशसहिताः कार्याश्चेत् स्युर्नवतितोधिकाः ।
तदा भार्द्धांशशुद्धाः स्युः परमोन्नतभागकाः[1] ॥१३॥
पूर्वोक्तवैपरीत्येन परमाधरभागकाः ।
यस्य स्पष्टक्रांतिभागा लंबांशेभ्योधिका यदि ॥१४॥
बिंबगोलस्तस्य भस्य दृश्यध्रुववशात्सदा ।
उदितो वा सदैवास्तं यातश्च भवति स्फुटं ॥१५॥
लम्बांशेभ्यः क्रांतिभागाः स्पष्टाः स्युर्यत्[2]प्रमाणकाः ।
अधिकास्ते त्र विज्ञेया परमोन्नभागकाः ॥१६॥

इति परमोन्नतांशपरमाधरांशज्ञानं ।

अथ दिगंशोपरिनतांशानयनम्—

दिग्भाग[3]कोटयंशक[4]सिंजिनीघ्नी[5] पलोत्क्रमज्या त्रिभभजीवयाप्ता ।
तदूनदिक्कोटि[6]लवज्यकाया[7] कोदण्डकोटिः परसंज्ञकः[8] स्यात् ॥१॥
लंबज्यका दिग्लवकोटिमौर्व्यागुण्या त्रिभज्या विहृता फलस्य ।
कोदण्डकोटिः[9] परसंज्ञको वा जीवा तदीया[10] च हरो विचिंत्यः ॥२॥
स्वाक्षापमज्ये त्रिभसिंजिनी गुणे हारेण[11] भक्ते च तदीयचापयोः ।
योगे वियोगे[12] समभिन्नकाष्ठयोरभीष्टकाः स्युः क्रमशोन्नतांशकाः ॥३॥
सौम्यांशकश्चेदधिकोपमोक्षतः प्राग्दिग्लवज्यापचयंगता पुनः ।
प्रवर्द्धते चापर दिग्लवज्यकान्यूने[13]पमेमि स्वपलात्तदा धनुः ॥४॥

(ङ) १. परमौनत for (परमोन्नत)   २. सुयंत् for (स्युर्यत्)
३. दिगभाग for (दिग्भाग)   ४. कोटांशक for (कोटय ंशक)
५. शिनिघ्नी for (सिंजिनीघ्नी)   ६. दिकोटि for (दिक्कोटि)
७. लवजकाया for (लवज्यकाया)   ८-९. 'परसंज्ञकः—कोदण्डकोटिः' लुप्त
१०. तदिया for (तदीया)   ११. हरेण for (हारेण)
१२. योगोवियोगः for (योगेवियोगे)   १३. नूने for (न्यूने)

द्वितीयमभ्राऽष्टकुतो विशोध्य वा ततो नतांशा[1] द्वि विधाः क्वचिन्मताः[2] ।
नतज्यकावर्गं[3] विवर्जितायास्त्रिज्याकृतेर्मूलमिहोन्नतज्या[4] ॥५॥
निरक्षदेशे क्रांतिज्या त्रिज्याघ्नी दृग्ज्ययोद्धृता[5] ।
फलचापं[6] नतांशाः स्युरुन्नताः खांकविच्युताः ॥६॥

अथैषां पद्यानां वाक्यार्थः—

अक्षांशानां उत्क्रमज्या दिगंशकोटयंशजीवा गुणा त्रिज्या भक्ता यल्लब्धं[7] तेनोनायाः दिगंशकोटयंशज्यायाः[8] चापकोटिः परसंज्ञः[9] स्यात् । लम्बांशज्या दिगंशकोटिज्या गुणा त्रिज्या भक्तफलस्य[10] चापकोटिः परसंज्ञः स्यात् । वा प्रकारान्तरेण । तज्जीवाहरो[11] ज्ञेयः । स्वदेशीयाक्षांशज्याक्रान्ति च[12] त्रिज्या गुणा पृथक्[13] हारेण भक्ता फलद्वयस्य[14] चापद्वयं[15] कर्तव्यं । अक्षांशक्रांत्योरेकदिक्त्वे[16] चापयोर्योगो नतांशाः अभीष्टा नतांशा भवन्ति । अक्षांशक्रान्त्योर्भिन्नदिक्त्वे[17] फलचापयोरन्तरं[18] क्रमशो नतांशा अभीष्टाः[19] स्युः । स्पष्टक्रान्तिरुत्तरगोलेऽक्षांशाधिका भवति ।

अथ च पूर्वदिगंशा अपचिता भवन्ति । पश्चिमदिगंशा उपचिता भवन्ति ।

(घ) १२. + ज्या +

(ङ) १. नतांसद्विविधाः for (नतांशा द्विविधाः)
२. कच्चिनमताः for (क्वचिन्मताः) ३. वर्गः for (वर्ग)
४. महोन्नतज्या for (मिहोन्नतज्या) ५. दृगजयोद्धृता for (दृग्ज्ययोद्धृता)
६. पलचापं for (फलचापं) ७. यलब्धं for (यल्लब्धं)
८. जायाः for (ज्यायाः) ९. रशंज्ञः for (परसंज्ञः)
१०. पलस्य for (फलस्य) ११. तजीवा for (तज्जीवा)
१३. प्रथक् for (पृथक्) १४. पलद्वयस्य or (फलद्वयस्य)
१५. + चापद्वयस्य + १६. क्रान्तो for (क्रान्त्यो)
१७. भिनदिक्त्वे for (भिन्नदिक्त्वे) १८. पलचापयो for (फलचापयो)
१९. अभिष्टाः for (अभीष्टाः)

Indira Gandhi National Centre for the Arts

तदा आनीत स्पष्टक्रान्त्यंशान् भार्द्धांशकेभ्यः संशोध्य शेषेण नीतेष्टाक्षांशाः संस्कार्यास्ते नतांशा भवन्ति। निरक्षदेशे क्रान्तिजीवा त्रिज्या गुणा दृग्ज्या भक्ता फलस्य चापं नतांशाः स्युः। ते खांकच्युता उन्नतांशा भवन्ति।

इति।

अत्र उपपत्तिः—षोडशेन शकलेन। कखगं क्षितिजं। खलधमायनवृत्तं। कलगं नाडीवलयं। हचिह्नं खमध्यः। वं ग्रहस्थानं। जहवं दृग्वृत्तं। धवं बिंबोपरिगतंध्रुववृत्तं। धं ध्रुवः। धजदं दृग्वृत्तं नाडीवृत्तसंपातात्त्रिभांतरे ध्रुववृत्तं। कतं दिगंशकोटिः। जधं फलं। जदं फलकोटिः। वमं ग्रहबिंबक्रान्तिः। अत्र बजदत्रिभुजं बहलत्रिभुजं बबम त्रिभुजं चैतानि सजातीयानि। यदि जदेन जवं लभ्यते। तदा हलेन किमिति लब्धं हवं। पुनर्जदेन यदि जवं लभ्यते तदा वमेन किमिति। लब्धं बवं। हवबवयोगेन्तरे वा हवं नतज्या। शकलं।

अथ दिग्भागकोटयंशकसिंजिनीघ्नीत्यस्योपपत्तिः खण्डन्यासेन सा यथा। त्रिज्यया लंबज्या लभ्यते तदा दिगंशकोटिज्यया किमिति। अस्मिन्ननुपाते लम्बज्यास्वरूपमिदं। प०। उ० १ त्रि० अनेन दिक्कोटिजीवा गुण्या त्रिज्यया भाज्या

(घ) १२. यहां से आगे समस्त लिखे पर स्याही पोत रक्खी है। कुछ भी स्पष्ट नहीं।
१८, यहां से कुछ २ दिखाई देने लगा है।

(ङ) १. + अक्षांशकांत्यो भिनदिक्त्वे पलचापयोरन्तरं। क्रमसो नतांसाः अभीष्टाः स्युः स्पष्टक्रांतिरुत्तरगोलेक्षांसाधिका भवन्ति। अथ च पूर्वदिगंसा अपचिता भवन्ति -.-

२. संस्कारा for (संस्कार्या)   ३. दृक्ज्या for (दृग्ज्या)
४. पलस्य for (फलस्य)   ५. उनतांस. for (उन्नतांशा)
६. कखगतिं for (कखगं)   ७. दृगवृत्तं for (दृग्वृत्तं)
८. दृगवृ for (दृग्वृत्तं)   ९. 'ता' लुप्त
१०. त्रिभान्ततरे for (त्रिभांतरे)   ११. 'जधं फलं' लुप्त
१३. दिगभाग for (दिग्भाग)   १४. कोटयंसक for (कोटयंशक)
१५. शिजिनी for (सिंजिनी)
१६. अस्मिन्नुपाते for (अस्मिन्ननुपाते)
१७. उ० त्रि०१ for (उ० १ घि०)   १९. दिकोटि for (दिक्कोटि)

Indira Gandhi National Centre for the Arts

एवं कृते [1]एकस्मिन् खण्डे दिक्कोटिजीवैवा[2]वशिष्टा, द्वितीयखण्डे [3]पलोत्क्रमज्या दिक्कोटिजीवा गुणा त्रिज्याभक्तेति सिद्धं । अत इदं [4]फलं दिक्कोटिजीवायां शोधितं शेषस्य धनुः कोटिः परसंज्ञः स्यादित्युपपन्नं ।

इति दिगंशोपरिनतांशानयनं सोपपत्तिकं संपूर्णम् ॥६॥[5]

अथोन्नतांशेभ्यो लग्नानयनम्—

तत्रादावुन्नतांशेभ्यो नतकालः साध्यते स यथा ।

दिनार्द्धमानोत्क्रमसिंजिनी स्यान्मध्यांत्यका[6] तद्गुणितोन्नतज्या[7] ।
भक्तातु मध्योद्भव शंकुनासौ स्वेष्टांत्यका सन्मति नावगम्या ॥१॥
[8]स्वेऽष्टांत्ययो नामध्यांत्यानतकालोत्क्रमज्यका ।
अस्या उत्क्रमचापं [9]यन्नतकालः स एव हि ॥२॥
यदोत्क्रमज्या त्रिभसिंजिनीतोधिका तदा त्रिज्यकया विहीना ।
शेषस्य चापं वियदंकयु[10]तं नताख्यकालो भवति स्फुटोत्र ॥३॥
स्फुटापमांशैरथलंबभागाः पृथग्युतो नास्त्वनयोरिहज्ये ।
तयोश्चयोगार्द्धमितोहरः स्याल्लंबांशकाः क्रांतिसमा यदि स्युः ॥४॥
तदा हरः स्यात्परमोन्नतांशज्यार्द्धं यदा लम्बलवाधिका स्यात् ।

(घ) १०. युक्तं for (युतं)

(ङ) १. एभित त्रिज्यावृत्तदिजीवोकोटि for (एवं कृते एकस्मिन् खण्डे दिक्कोटि)
२. + वा +
३. खंडो for (खण्डे)
४. पलं for (फलं)
५. '॥६॥' लुप्त
६. मध्यांतका for (मध्यांत्यका)
७. दुणितानतज्या for (तद्गुणितोन्नतज्या)
८. स्वेष्टांतयो for (स्वेष्टांत्ययो)
९. चापाय नतकाल for (चापं यन्नतकालः)



Indira Gandhi National Centre for the Arts

क्रांतिस्तदा चोन्नतभागकाश्च वारद्वयं यांति तयोर्ज्यके[1] ये ॥५॥
तयोर्वियोगार्द्धमितो हरो वा स्पष्टापमज्याक्षलवज्यकाघ्नी।
त्रिज्याहृताप्तं परमोन्नतांशज्यायामृणं स्वंक्रमतो विधेयं[2] ॥६॥
क्रांत्यो[3]रुदग्याम्यगयोर्हरः[4] स्याद्वा क्रांति कोटिज्यकया विनिघ्नी।
लंबांशजीवा त्रिभजीवयाप्ता लब्धं हरः स्यादिति वेदितव्यं ॥७॥

चतुर्भिः कालापकं—
परोन्नतांशोद्भव सिंजिनीतो संशोधनीयोन्नतभागजीवा।
शेषं त्रिभज्यागुणितं हराप्तं नताख्यकालोत्क्रमसिंजिनी[5] स्यात् ॥८॥
अस्या[6] भवेदुत्क्रमतो धनुर्यन्नताख्यकालो[7] भवति स्फुटोयं।
पूर्वे कपाले दिनमानखंडे नताख्यकालः परिशोधनीयः ॥९॥
शेषं भवेदुन्नतकालसंज्ञं[8] पश्चात्कपाले दिनमानखंडे।
नताख्यकालः खलु योजनीयो दिनस्य कालो गतसंज्ञकः स्यात् ॥१०॥
स आक्षदृक् संस्कृतभोदयांशयुक्तस्तनोस्ते निजदेशभागाः।
भवंत्यथो वायनदृष्टिकर्मयुतस्य लंकोदयके नताख्यः ॥११॥
कालो विशोध्यः[9] खलु पूर्वसंज्ञश्चेत्पश्चिमस्तत्र युतो विधेयः।
शेषं ख[10]लग्नोदयं काल[11]मानं खांकैर्युतं ते निजभोदयांशाः[12] ॥१२॥
भवन्ति लग्नस्य पुर्नविलग्नमेभ्यः प्रसाध्यं सुधियोक्तरीत्या[13]।

इति

(घ) १. 'ज्यंके—हरो वा' तक अस्पष्ट, स्याही पुती हुई है।
११. अस्पष्ट   १२. अस्पष्ट

(ङ) १. तयोर्वियोकेय for (तयोर्ज्यंकेये)   २. विदेहं for (विधेयं)
३. क्रांतो for (क्रांत्यो)   ४. मगयोर्हरः for (म्यगयोर्हरः)
५. क्रमिराजजिनी for (त्क्रमसिंजिनी)
६. अस्य for (अस्या)   ७. यंनताख्य for (यंन्नताख्य)
८. दुनतकाल संज्ञं for (दुन्नतकालसंज्ञं)
९. विधोः for (विशोध्यः)   १०. 'ख' लुप्त
१३. रित्या for (रीत्या)

अथार्थः श्लोकानां क्रमेण लिख्यते ।

उन्नतांशज्या दिनार्द्धोत्क्रमज्यया मध्यांत्यया गुण्या[1] मध्याह्नशंकुना भक्ता फलमिष्टांत्या । अनया हीनांत्या नतकालोत्क्रमज्या भवति । अस्या उत्क्रमचापं[2] नतकालो भवति । यदोत्क्रमज्या त्रिज्यातोधिका तदा तस्यां त्रिज्यां विशोध्य[3] शेषस्य[4] चापं नवतियुतं नतकालो भवति ।

अथ प्रकारान्तरं । स्पष्टक्रान्त्यंशाः लंबांशेषु युतोनाः कार्याः उभयोर्ज्ये साध्ये[5] । ज्ययोर्योगार्द्धं[6] हरो भवति । यत्र स्पष्टक्रान्तिर्लंबांशसमा[7] भवति । तदा परमोन्नतांशज्यार्द्धं हरो भवति । यत्र लंबांशेभ्योधिका क्रान्तिस्तत्रोन्नतांशा वारद्वयं परमतां यान्ति । तत्रोन्नतांशद्वयज्यान्तरार्द्धं[8] हरो भवति । अथवा स्पष्टक्रांतिज्या अक्षांशज्या गुणा त्रिज्याभक्ता लब्धं परमोन्नतांशज्यायां[9] शोध्यं[10] यदा[11] स्पष्टक्रान्तिरुत्तरा स्यात् । दक्षिणा चेत्तदा परमोन्नतांशजीवायां योज्यं वा हरो भवति । स्पष्टक्रान्तिकोटिज्यालम्बांशज्या गुणात्रिज्याभक्ता वा हरो भवति । उन्नतांशज्या परमोन्नतांशजीवायां शोध्या, शेषं त्रिज्यागुणं हरभक्तं फलं[12] नतकालस्योत्क्रमज्या भवति । अस्या[13] उत्क्रमचापं नतकालः । पूर्वकपाले नतकालो दिनार्द्धे[14] शोध्यः शेषमुन्नतकालो भवति । पश्चिमकपाले दिनार्द्धे योज्यः दिनगतकालो भवति । स आक्षदृक्कर्म संस्कृतग्रहोदयांशयुतो लग्नस्य विषुवांशा भवन्ति[15] । आयनदृक्कर्म

(घ) ८. तरार्धं for (तरार्धे)

(ङ) १. गुणा for (गुण्या) २. + ज्या +

३. विसोध for (विशोध्य)

४. शेषचापं for (शेषस्य चापं) ५. साधे for (साध्ये)

६. जयोर्योगार्द्धं for (ज्ययोर्योगार्द्धं) ७. समाना for (समा)

९. + ज्यार्द्धं हरो भवति यत्र लम्बांशेभ्यो धिकाक्रांतिस्तत्रोनतां तासावारद्वयं परमतां यांति ततो नतांद्वस +

१०. साध्यं for (शोध्यं) ११. य for (यदा)

१२. पलं for (फलं) १३. तस्या for (अस्या)

१४. दिनार्द्धसाध्ये for (दिनार्द्धे शोध्य)

१५. भवं for (भवन्ति)

Indira Gandhi National Centre for the Arts

संस्कृतोदये पूर्वनतकालः शोध्यं[1] पश्चिमनतकालो योज्यः दशमोदयो भवति। अस्मि-न्नवतियुंता चेल्लग्नस्य विषुवांशा भवन्ति। एभ्यः पुनर्लग्नमानेयं उक्तप्रकारेण[2] यदापमांशैरित्यस्योपपत्तिः[3] सप्तदशशकलेन[4]। कखगघमायनवृत्तं। कगंनाडीवल-योर्ध्वाः[5] धर सूत्रम्। चछं ऊर्ध्वाधर स्वस्तिकसूत्रं। चं[6] खमध्यः। खघं[7] समचिह्नसूत्रं। झभं ध्रुवद्वयनिबद्धसूत्रं। संघजं द्युज्यावृत्तसूत्रं। कघं लवांशाः। कसं क्रान्त्यशाः लम्बांशक्रान्त्यंशान्तरं घसं इदमेव[8] परमोन्नतांशचापं। तज्जीवातसं। पुनः खगं-लम्बांशाः। गजक्रान्त्यंशाः। अनयोर्योगः खजं। योगज्याजवं। योगज्यां[9]तरज्या-[10] योगोलसं। तदर्द्धं लनंवानसंहरो भवति। घमं इष्टोन्नतांशा। तज्यामथं। मथसतयोरन्तरं[11] सदं[12]। सनघत्रिभुजं सट्टत्रिभुजं[13] च मिथः सजातीयं। यदि सनेन सघं[14] त्रिज्या लभ्यते। तदा सदे न किमिति लब्धं सट[15] इदम् नतकालोत्क्रमज्या-भवतीत्यु[16]पपन्नं[17]। इदं दक्षिणक्रान्तौ ज्ञेयं। उत्तरक्रान्तौ तु अष्टादशक्षेत्रेणोपपत्ति-रूहनीया, अत्र सजलत्रिभुजं वृत्तान्तः पतितं अस्ति। एतावान् विशेषः। शेषं

(घ) १. शोध्यः for (शोध्यं)
२. अस्पष्ट
३. 'यदा—स्वस्तिक सूत्रं' लुप्त
६-९. 'चंख—योगज्यां' समस्त लुप्त
१०-१६. 'तरज्या—त्युप' समस्त लुप्त
१७. 'पन्नं—क्षेत्रं यथा' लुप्त.

(ङ) ४. 'श' लुप्त
५. विसर्ग लुप्त
७. खगं for (खघं)
८. इहमेव for (इदमेव)
११. सययो for (सतयो)
१२. + सदं +
१३. 'सट्टत्रिभुजं' लुप्त
१४. सधि for (सघं)
१५. सदं for (सटं)





Indira Gandhi National Centre for the Arts

सप्तदशक्षेत्रवत् ज्ञेयं। लम्वांश तुल्या यत्र क्रान्तिस्तत्रोपपत्तिरेकोनविंशतितम-क्षेत्रेण[1]। क्षेत्रं यथा[2]। अत्रैतावान्[3] विशेषः। सखं द्युज्यावृत्तसूत्रं। सतं लम्बांश-क्रान्त्यंशयोगज्या इयमेव परमोन्नतांशज्यापि भवति। लवांशक्रान्त्यंशयोरन्तरज्या-भावः। अतः सतार्द्धमेव सनं[4] हरो[5] जातः। शेषं पूर्ववत् ज्ञेयं। तदेवमुपपन्नं परमो-न्नतांशज्यार्द्धं हरो भवतीति। लम्वांश[6]का[7]धिका यत्र क्रान्तिस्तत्रोपपत्तिर्विंशतितम[8]-क्षेत्रेण। अत्र लम्वांशाधिक[9]क्रान्तौ सजं[10] द्युज्या[11]वृत्तसूत्रं। सतं लम्बांशक्रान्त्यंशयोग[12]-ज्या अन्तरज्याराजं भवतीति। राजसतयो[13]रन्तरं सलं भवति। सतजखेच[14] परमो-न्नतांश ज्येपि भवतः। तदेवमुपपन्नं परमोन्नतांश ज्यान्तरार्द्धं[15] हरो भवतीति[16]।

अथ स्पष्टापमज्याक्षलवज्यकाघ्नीत्यस्योपपत्यर्थं। अत्र क्षेत्रं पूर्वोक्तमेव। सतं परमोन्नतांशज्या। अधं क्रान्तिः। भथं अक्षज्या[17], अत्र अधमत्रिभुजं अभथ[18] त्रिभुजं च मिथः सजातीयं[19]। यदि त्रिज्ययाक्षज्या लभ्यते। तदा क्रान्तिज्यया

(घ) २. '···क्षेत्रं यथा' समस्त लुप्त ३-६. 'अत्रै—लम्बां' समस्त लुप्त
७-१५. 'शकाधि – तरार्द्धं ह' समस्त लुप्त।
१६. 'रोभवतीति—किमिति' लुप्त

(ङ) ७. + क्षेत्रेण +
४. त्पनं for (सनं)
५. हारो for (हरः)
६. लंका for (लंवां)
१५. सकादिका for (शकाधिका)
८. विंतितम for (विंशतितम)
९. साधित for (शाधिक)
१०. सज्यं for (सजं)
११. द्यु जा for (द्यु ज्या)
१२. क्रान्त्यं सयोर्योगज्या for (क्रान्त्यंश-योगज्या)
१३. राजस्ततयो for (राजसतयो)
१४. स्तजखे for (सतजखे च)
१७. भधं अज्या आत्र for (भथं अक्षज्या सत्र)
१८. 'अभथत्रिभुजं' लुप्त
१९. सजातियं for (सजातीयं)



किमिति[१] [२]लब्धं धमं उन्मण्डलशंकुः स यदि दक्षिणगोले मध्यशंकौ योज्यते, उत्तर-गोले शोध्यते तदा यष्टिर्भवति स एव हर इत्युपपन्नं । अत्र सर्वत्र हरो यष्टि[३]र्भवतीति बुद्धिमद्भिर्ज्ञेयं । अथवा क्रान्तिकोटिज्यकया विनिघ्नीत्य[४]स्योपपत्तिः । त्रिज्या कर्णो लम्बज्या[५] को[६]टिस्तदा द्यु[७]ज्याकर्णो काकोटिः लब्धं यष्टिः । स एव हरो भवतीत्युपप[८]न्नं ।

अथ लग्नादुन्नतांशानयने श्लोकाः—

ग्राह्यो ध्रुवश्चाक्षदृगाऽऽख्यकर्मसु संस्कृतोस्योदयभागकार्ये।
तनोर्विशोध्या द्यु[६]दयांशकेभ्यः शेषेण खेटस्य दिनार्द्धकेन ॥१॥
सहांतरं बिंबनताख्यकालस्तस्योत्क्रमाख्यज्यकया विहीना ।
दिनार्द्धमानोत्क्रम सिंजिनीतच्छेषं दिनार्द्धोत्क्रमजीवयाप्तम् ॥२॥
संताडितं तत्परमोन्नतांशज्ययाऽत्र लब्धोन्नतभागजीवः ।
अस्या धनुश्चोन्नतभागकास्ते भवन्त्यथो वच्मि बहुप्रकारैः ॥३॥
अथो भवेयुर्विषुवांशकाश्च ये सुसंस्कृतस्यायनदृष्टिकर्मणा ।
खमध्यलग्नस्य च येंतरन्तयोर्नताख्यकालः सुधियावगम्यते ॥४॥

(घ) १. '...किमिति' समस्त लुप्त
६-८. 'टिस्तदा—त्युपपन्नं' लुप्त
२-५. 'लब्धं—ज्याको' समस्त लुप्त ।
६. द्युदयांश for (द्युदयांश)

(ङ) ३. यष्टी for (यष्टिर्)
७. द्युजा for (द्युज्या)
४. स्य for (त्य)





प्राक्साधिते नाथ हरेण निघ्नी नताख्यकालोत्क्रम सिंजिनीव ।
त्रिभज्यया प्राप्तफलस्य कार्यं मध्योन्नतांशज्यकयांतरं च ॥५॥
शेषं भवेदुन्नतभागजीवा तच्चापमत्रोन्नतभागकास्ते ।
अथ प्रकारं कथयामि पूर्वैः संसाधितं चोन्नतभागकानां ॥६॥
वाणाभावो यत्र खेदस्य[1] तत्र कार्या जीवो[2] खेटतन्वंतरस्य ।
सा त्रिज्याप्ता दृग्गति ध्न्यून्नतांशज्यास्यादस्याश्चाप मत्रोन्नतांशाः ॥७॥
यत्रास्ति बाणः शरकोटिसिंजिनी त्रिभोनलग्नग्रहजांतरज्यया ।
गुण्या त्रिभज्या विहृता फलस्य यच्चापं तदाद्यं खनवच्युतं भवेत् ॥८॥
अथाद्यचापज्यकया विभक्ता शरज्यका त्रिज्यकया विनिघ्नी[3] ।
लब्धस्य चापं भवति द्वितीयं दृक्क्षेपबाणौ यदि भिन्नदिक्कौ ॥९॥
द्वितीयचापस्य च दृग्गतेश्च चापस्य योगः सुधिया विधेयः ।
ऐक्ये दिशोरन्तरमेतयोश्च तृतीयचापं भवतीति वेद्यं ॥१०॥
तृतीयचापज्यकया विनिघ्नी त्रिज्याहृता चाद्य धनुर्ज्यका यत् ।
लब्धं फलं तद्धनुषस्तु भागा भवन्ति ते वोन्नतभागसंज्ञाः ॥११॥
भोगो ग्रहस्य यदि लग्न समोथवास्ततुल्यो भवेदिह शरज्यकया विनिघ्नः ।
दृक्क्षेपचापजगुणस्त्रिभजीवयाप्तो लब्धं फलं भवति चोन्नतभागसंज्ञं ॥१२॥
भोगो ग्रहस्य यदि बित्रिभलग्नतुल्यश्चेत्स्यात्तदात्र शर एव धनुर्द्वितीयं ।
तद्दृग्गतौ च खलु संस्कृतमुन्नतांशास्ते वा भवन्ति सुधियोति[4] विचारणीयं ।१३

अथैतेषां पद्यानां व्याख्या—

तत्रादौ । ग्राह्यो ध्रुव इत्यादिश्लोकत्रयस्य व्याख्या । आक्षदृक्कर्म संस्कृत-ध्रुवको ग्राह्यः । तस्य उदयांशा लग्नोदयांशेभ्यः शोध्याः, शेषस्य ग्रहदिनार्द्ध[5]नान्तरं कार्यं । स बिबनतकालो भवति । तस्योत्क्रमज्या दिनार्द्धोत्क्रमज्यायां शोध्या । शेषं

(घ) १. खेटस्य for (खेदस्य) २. जीवा for (जीवो)
३. विघ्नी for (विनिघ्नी) ४. सुधियेति for (सुधियोति)
५. दिनार्द्धं for (दिनार्द्ध)

Indira Gandhi National Centre for the Arts

परमोन्नतांशज्यया गुणितं दिनार्द्धोत्क्रमज्या भक्तं लब्धा उन्नतांशज्या। अस्याश्चापं उन्नतांशाः इतिः ॥३॥

अथान्यत्प्रकारान्तरं श्लोकत्रयेणाह । अथो भवेयुरिति । आयनदृक्कर्म संस्कृतस्य विषुवांशा ग्राह्याः। तेषां दशमविषुवांशैरन्तरं कार्यं। स नतकालो भवति। अस्योत्क्रमज्या पूर्वानीतहरेणगुणिता त्रिज्या भक्ता । लब्धस्य[1] परमोन्नतांशजीवया सहान्तरं कार्यं। शेषमुन्नतांशज्या ऽस्याश्चापमुन्नतांशाः इति ॥६॥

अथान्यत्प्रकारांतरमाह—

बाणाभाव इत्यादिभिः सप्तश्लोकैः। यदा ग्रहस्य शराभावस्तदा लग्नग्रहान्तरज्या दृग्गतिगुणा त्रिज्या भक्ता लब्धमुन्नतांशज्या भवति। अस्याः चापमुन्नतांशाः। यदा शरः स्यात्तदा शरकोटिज्या वित्रिभलग्नग्रहभोगान्तरज्या गुणा त्रिज्या भक्ता फलस्य चापं नवतिशुद्धं प्रथमचापसंज्ञं भवति।

अथ शरज्या त्रिज्यागुणा प्रथमचापज्या भक्ता लब्धस्य चापं द्वितीयचापं भवति । शरदृक्क्षेपयोर्भिन्नदिक्त्वेदृग्गतिचापद्वितीयचापयोर्योगः कार्यः । दिगैक्येंतरं कार्यं, तृतीयचापं भवति। अस्य ज्या प्रथमचापज्या गुणा त्रिज्या भक्ता फलचापमुन्नतांशाः । यदि ग्रह[2]लग्नतुल्योथवा सप्ततुल्यो भवति। तदा शरज्या दृक्क्षेपज्या गुणात्रिज्या भक्ता फलचापमुन्नतांशाः।

अथ च ग्रहभोगः वित्रिभलग्नतुल्यो भवति। तदा शर एव द्वितीयचापं तत् दृगातौ[3] संस्कार्यं उन्नतांशा भवन्ति। यत्रास्ति बाण इत्यस्योपपत्तिर्द्वाविंशतितमक्षेत्रेण। कबजदं क्षितिजं। हंखमध्यः। कबजं क्रान्तिवृत्तम्। झं कदम्बः। बहदं दृक्क्षेपबलयं। जंलग्नं। तंबिंबं। झतलं कदम्बवृत्तं। हतम्रं दृग्वलयं। मतजं लग्नबिंबोपरिगतं चलवृत्तं। तलः शरः। झतं शरकोटिः। हतं नतांशाः । अतमुन्नतांशाः। हवं दृक्क्षेपः। वबं दृग्गतिः। वं वित्रिभं। लं स्पष्टग्रहः। लंवमन्तरं। यदि झलज्यया लवज्या प्राप्यते तदा झतेन तमं प्राप्यते, एनं नवतेः शोध्यशेषं तजं प्रथम-

(घ) १. लब्धेम for (लब्धस्य)   २. ग्रहः for (ग्रह)
३. दृग्गतौ for (दृगातौ)

Indira Gandhi National Centre for the Arts

चापं। प्रथम[1]चापेन तजेन तलं प्राप्यते तदा मजे [2]त्रिज्यया मवं प्राप्यते। अस्य बवस्य योगः मबसंज्ञं तृतीयचापं। मजेनमवं प्राप्यते। तदा तजेन तअं प्राप्यते तअं उन्नतांशाः।

अथ क्षेत्रं। भा[3]गो ग्रह[4]स्योपपत्तिस्त्रयोविंशति[5]मं क्षेत्रेण। कबजदं क्षितिजं। हं[6]खमध्यं। दझवं क्रान्तिवृत्तं। ब[7]कदम्बः। कहजं दृक्क्षेपवलयं। अं बिंबं। वअवं कदम्बवृत्तं। हअलं दृग्वलयं। वं लग्नं। तदेव ग्रहध्रुवकः। अबंशरः। अलं उन्नतांशाः बजंदृक्क्षेपः कुतः सहं हवं च नवत्यंशमितं तुल्यमस्ति। उभयोस्तुल्ययोर्वहतुल्यं शोधितं। चेच्छेषं हसंवजं च तुल्यं भवति। असंदृक्क्षेपो भवति। तदा वजमपि दृक्क्षेपः बवेन बजं प्राप्यते। तदा अबन अलं प्राप्यते त एवोन्नतांशाः।

अथ यदि लग्नस्थाने लग्नविषुवांशा गृह्यन्ते स्पष्टस्थाने आयनदृक्कर्म संस्कृतस्य विषुवांशा गृह्यन्ते शरस्थाने स्पष्टक्रान्तिर्गृह्यते। दृक्क्षेपस्थलेऽक्षांशा गृह्यन्ते। तदाप्युक्त प्रकारेणोन्नतांशा आयान्ति।

इति लग्नादुन्नतांशानयनं।

(घ) १. प्रथमचापेन for (प्रथचापेन) २. तदामजेन for (तदामजे)
३. भोगो for (भागो) ४. ग्रहस्येत्यस्योपपत्ति for (ग्रहस्योपपत्ति)
५. त्रयोविंशतितम for (त्रयोविंशतितमं)
६. हखमध्यं for (हंखमध्यं) ७. वंकदम्बः for (बकदम्बः)





Indira Gandhi National Centre for the Arts

अथ ग्रहयोरन्तरचापज्ञानमाह—

नभोगयोश्चेच्छरयोरभावो विस्पष्टखेटांतरमन्तरं स्यात् ।
ग्रहस्य चैकस्य शरस्य सत्त्वेन्यस्याप्यभावेत्वथवोभयोश्च ॥१॥
बाणस्य सत्त्वेन्तरचापमत्र खेचारिणो[1] पंचविधं ब्रवीमि ।
न भोगयोः स्यात् ध्रुवकस्य साम्यं यद्वा खनन्दाल्पकमन्तरं च ॥२॥
खनन्दभागोन्मितमन्तरं वा भार्द्धांशकेभ्योनधिकं तथा च ।
खनन्दभागाधिकमन्तरं वा भार्द्धांशतुल्यं विवरं यदा वा ॥३॥
अथैकस्य शरासत्त्वे शरसत्वे परस्य च ।
द्वयोः समकलत्वं चे च्छर एवांतरं भवेत् ॥४॥
भार्द्धांशतुल्यं ध्रुवकांतरं चेद्बाणेन भार्द्धांशमितांतरं स्यात् ।
स्पष्टांतरं[2] खांकमितं यदा स्याद्बिंबांतरं चापि तदेव वेद्यम् ॥५॥
यदा नवत्यूनकमन्तरं स्याद्विस्पष्टयोस्तच्छरकोटिजीवा ।
त्रिज्या हृता चांतर कोटिजीवा गुणाऽऽप्तचापं नवतेर्विशोध्यं ॥६॥
स्पष्टांतरं स्याद्यदि खांकतोधिकं फलस्य चापं नवतौ युतं भवेत् ।
विश्लेषचापं ग्रह[3] बिंबयोरथो पंच प्रकारा उभयो शरे सति ॥७॥
स्पष्टध्रुवकयोः साम्ये दिक्साम्ये शरयोस्तथा ।
तत्र बाणांतरं खेटबिंबयोरन्तरं भवेत् ॥८॥
यदा बाणौ भिन्नदिक्कौ योगः स्याद्बाणयोस्तदा ।
बिंबद्वयांतरधनुर्गोलविद्भिरुदाहृतं ॥९॥
यदि स्पष्टयोरन्तरं भार्द्धभागैः समं स्याच्छरौ चैकदिक्कौ भवेतां ।
तदा बाणयोगश्च भार्द्धांशशुद्धो भवेदन्तरं बिंबयोः शेषकं यत् ॥१०॥
यदा भिन्नदिक्कौ शरौ तत्र बाणांतरं भार्द्धभागेषु संशोधितं च ।
यदत्रावशेषं तु विश्लेषचापं भवेत्खेटयोरंबरे तारकाणां ॥११॥

(घ) १. चारिणोः for (चारिणो) २. यदांतरं for (स्पष्टांतरं)
३. ग्रह for (ग्रह)

Indira Gandhi National Centre for the Arts

तुल्यौ यदा शरौ स्यात्[1] खेटयोरन्तरं तदा ।
भार्द्धभागसमं प्रोक्तं गोलागमविशारदैः ॥१२॥
यदा खेटयोरन्तरं खांकतुल्यं तदा चक्रबाणस्य जीवा विनिघ्नी ।
द्वितीय[2] बाणज्यया त्रिज्ययाप्ता बिललस्य[3] चापं खनंदाशशुद्धं ॥१३॥
द्वयोर्बाणयोरेक्‌दिक्त्वेऽथभिन्ने दिशौ बाणयोश्चेद्युतं तन्नवत्या ।
भवेत्खेटयोः स्पष्टयोरन्तरं तन्निरुक्तं च गोलागमज्ञैः पुराणैः ॥१४॥
यद्यन्तरं स्पष्टखगद्वयस्य भवेन्नवत्यूनमथोधिकं च ।
एकस्य कार्या शरकोटिजीवा स्पष्टांतरज्या गुणिता विभक्ता ॥१५॥
त्रिभज्ययाप्तस्य फलस्य चापं संशोधितं तन्नवतौ च शेषं ।
चापं भवेत्तत् प्रथमाभिधानं तस्यैव बाणज्यकया विनिघ्नी ॥१६॥
त्रिज्याद्यचापज्यकया विभक्ता फलस्य चापं भवति द्वितीयं ।
स्पष्टांतरं स्यात्खनवोनमेकदिक्कौ शरौ चेद्ग्रहयोर्भवेतां ॥१७॥
स्पष्टांतरं वा खनवाधिकं चेद्बाणौ यदा भिन्नदिशौ भवेतां ।
द्वितीयखेटस्य च बाणकोटौ द्वितीयचापं खलु योजनीयं ॥१८॥
ततो भवेत्तद्धि तृतीयचापं स्पष्टांतरं चेन्नतेरथोनं ।
विभिन्नदिक्कौ च शरौ भवेतां स्पष्टांतरं शून्यनवाधिकं च ॥१६॥
बाणौ भवेतां यदि वैकदिक्कौ द्वितीयचापस्य सहांतरं[4] च ।
द्वितीयखेटस्य शरस्य कोट्या कार्यं[5] भवेत्तद्धि तृतीयं चापं ॥२०॥
अथाद्यचापज्यकया विनिघ्नी तृतीयचापोद्भूर्वासिजिनी च ।
त्रिज्या हृताप्तस्य फलस्य चापं चतुर्थचापं भवतीति वेद्यं ॥२१॥
स्पष्टांतरं भवति यत्र खनन्दतोनं बाणौ तथैव यदि वैक दिक्कौ ।
दिग्भिन्नता भवति वाशरयोस्तथा चेत्स्याद्बाणकोटिरधिकात्र द्वितीय चापात् ॥

(घ) १. स्यातां for (स्यात्) २. द्वितीयस्य for (द्वितीय)
३. विलब्धस्य for (विललस्य)
४. 'सहातरं च' स्याही से पुता होने के कारण अस्पष्ट ।
५. 'कार्यं भवे' स्याही से पुता होने के कारण अस्पष्ट ।

Indira Gandhi National Centre for the Arts

स्पष्टांतरं स्यान्नवतेरथोधिकं बाणौ तथैकां दिशमाश्रितौ यदा।
द्वितीयचापं शरकोटितोऽधिकं तदा तुरीयं नवतेर्विशोधयेत् ॥२३॥
यदत्रशेषं ग्रहबिंबयोस्तद्विश्लेषचापं भवतीति वेद्यं।
स्पष्टांतरं स्यात्खनवोनमत्र बाणावुभौ भिन्नदिशि स्थितौ वा ॥२४॥
स्याद्बाणकोटेरधिकं द्वितीयचापं तथा स्पष्ट खगांतरं च।
खांकाधिकं भिन्नदिशिस्थबाणौ वाऽभिन्नदिक्कौ शरकोटिरत्र ॥२५॥
द्वितीय चापादधिका तदा तु चतुर्थचापं नवतौ तु योज्यं।
यदत्रशेषं ग्रहबिंबयोस्तद्विश्लेषचापं भवतीति वेद्यं ॥२६॥

अथैषां श्लोकानामर्थो लिख्यते—

यद्युभयोः शराभावस्तदा स्पष्टयोरेवान्तरमंतरचापं भवति। अथैकस्य शर-सत्त्वे ऽन्यस्य शराभावे। अथोभयोः शरसत्त्वे चापांतरस्य ज्ञानं पंचप्रकारं। तद्यथा। उभयध्रुवकसाम्यमित्येकः। स्पष्टयोरंतरं नवत्यूनमिति द्वितीयः। स्पस्पटयोरंतरं नवतिरिति तृतीयः, स्पष्टयोरंतरं नवत्यूर्ध्वं भार्द्धांशोनमिति चतुर्थः। भार्द्धांशसम-मिति पंचमः। एकस्यशरसत्त्वेन्यस्य शराभावे तावल्लिख्यते। उभयोः समकलत्वे-तयोः शर एवांतरचापं। यदि स्पष्टयोरंतरं १८० तदा शरं भार्द्धांशेषु संशोध्य तयोरंतरं भवति। यदि स्पष्टयोरन्तरं नवतिस्तदा तयोः सशरविशरयोरन्तरं नवतिरेव। यदि नवत्यूनमधिकं वा स्पष्टयोरन्तरं तदा शरकोटिज्या अंतर-कोटिज्यां गुणा त्रिज्या भक्ता फलचापं नवतिमध्ये शोध्यं, यदि स्पष्टांतरं नवत्यूनं। यदि स्पष्टांतरं नवत्यधिकं तदा फलचापं नवतियुतं उभयोरंतरचापं भवति। उभयोः शरसत्वे पंचप्रकाराः प्रदर्श्यंते। उभयोः स्पष्टसमत्वं। उभयोः-शरावेकदिक्कौ तदा शरांतरमेव तयोरंतरचापं। यदि भिन्नदिक्कौ तदा शर-योग एव ग्रहांतरचापं। उभयोः स्पष्टयोः अंतरं १८० शरावेकदिक्कौ भवतस्तदा शरयोगो भार्द्धांशशुद्धः शेषं तयोर्ग्रहयोरंतरं। यदि भिन्नदिशौ शरौ तदा शरांतरं भार्द्धांशशुद्धं शेषं ग्रहयोरंतरं। यदि शरौ तुल्यौ तदा भार्द्धांश १८० मितमेवांतरं

(घ) १. 'नवते' स्याही से पुता, अस्पष्ट। २. 'यदत्रशेषं गृ' स्याही से पुता अस्पष्ट,
३. स्पष्टयोरन्तरं for (स्पयोरन्तरं) ४. 'ज्या—शोध्यं' अस्पष्ट

Indira Gandhi National Centre for the Arts

यदि स्पष्टांतरं नवतिमितं तदा एकशरज्या द्वितीयशरज्यया गुण्या त्रिज्या भक्ता फलचापं नवतिशुद्धं कर्तव्यं यदि शरावेकदिशौ भवतः। भिन्नदिशौ चेन्नवतियुतं तद्ग्रह योरंतरं भवति।

अथ स्पष्टांतरं नवत्यूनमधिकं वा भवति। एकस्य शरकोटिज्या स्पष्टांतरज्या गुणा त्रिज्याभक्ता फलचापं नवतिशुद्धं शेषं प्रथमचापं। तस्यैव शरज्या त्रिज्यागुणा प्रथमचापज्या भक्ताफलचापं द्वितीयचापं।

अथ स्पष्टांतरं नवत्यूनं शरावेकदिशौ। स्पष्टांतरं नवत्यधिकं शरौ भिन्नदिशौ। तदा द्वितीयस्य शरकोटौ द्वितीयफलचापं योज्यं इदं तृतीयचापं। यदि स्पष्टांतरं नवत्यूनं शरौ भिन्नदिशौ भवतः। स्पष्टांतरं नवत्यधिकं शरावेकदिशौ तदा द्वितीयचापस्य द्वितीय शरकोटेरंतरं कार्यं। इदमपि तृतीयचापं। तृतीय चापज्या प्रथमचापज्या गुणा त्रिज्या भक्ता फलचापं चतुर्थचापं। यत्र स्पष्टांतरं नवत्यूनं शरावेक दिशौ वा भिन्नदिशौ शरकोटिरधिका द्वितीय चापात्।

अथ स्पष्टांतरं नवत्यधिकं शरावेकदिशौ द्वितीयचापमधिकं शरकोटेः। द्वितीय ग्रहस्य झंग्रहस्थानं। घहखं क्रान्तिवृत्तं। कंगौ कदंबौ तदा चतुर्थचापं नवतिशुद्धं शेषमुभयोर्ग्रहयोरंतरं। स्पष्टांतरं नवत्यूनं उभौ भिन्नदिशौ द्वितीयचापमधिकं शरकोटेः। स्पष्टांतरं नवत्यधिकं उभौ भिन्न दिशौ वा एक दिशौ द्वितीयचापाछरकोटिरधिका तदा चतुर्थचापं नवतियुतं तद्ग्रहयोरन्तरं भवति। यदा खेटयोरित्यस्योपपत्तिश्चतुर्विंतितमक्षेत्रेण। कखगघं कदंबवृत्तं। वं ग्रहस्थानं। हं ध्रुवस्थानं ग्रहगं कदम्बवृत्तं। वभतं ग्रहांतरवृत्तं। घहचापं नवतिमितं स्पष्टान्तरम्।



Indira Gandhi National Centre for the Arts

बस्थानं ध्रुवं प्रकल्प्य नवत्यंशांतरे वृत्ते कृते वफघग चापे नवतिमिते भवतः । घकचापमपि नवतिभागमितं । धवचापं वग्रहस्य शरः । अयं गफतुल्यः । हझचापं द्वितीयग्रहस्य शरः । हझतत्रिभुजं हफगत्रिभुजं च सजातीयं । यदि गहवेनगफं लभ्यते तदा हझेन किमिति लब्धं झतं । झतं तवे शोध्यं वा योज्यं तदा बझ उभयोरंतरचापं भवति । इत्युपपन्नं । ग्रहांतरं नवत्यूनमधिकं वा भवति इत्यस्योपपत्तिः पंचविंशादि क्षेत्रत्रयेण । कखगघं कदंबवृत्तं । वं ग्रहः । हं ध्रुवः कतगं कदंबवृत्तं । द्वितीयग्रहस्य । तं ग्रहः । खहघं क्रान्तिवृत्तं । कंगं कदंबौ । बंध्रुवं कल्प्यनवतिमितं वृत्तं । लहनसंज्ञं कार्यं । वलं वनं उभौ नवत्यंशमितौ । वतं ग्रहांतरवृत्तं । वतमंतरचापं हतअवृत्तं प्रथमकदंबवृत्तध्रुवात् द्वितीय ग्रहोपरिगतं कार्यं घं स्पष्टस्थानं वग्रहस्य । धवं शरोवग्रहस्य । मस्पष्टः तग्रहस्य । मतं शरः तग्रहस्य । घमग त्रिभुजं अतग त्रिभुजं उभे सजातीये । घमं स्पष्टयोरंतरं । नवतिमितेन गमेन मघं लभ्यते तदा गतेन शरकोटया किमिति लब्धं, तअं इदं नवतिशुद्धं शेषं तहसंज्ञं प्रथमचापं । घअहत्रिभुजं तमहत्रिभुजं उभे सजातीये । हतेन तमं प्राप्यते तदा हअेन अघमिति द्वितीयं चापं । अघं धले संयोज्य द्वितीयचापं अलसंज्ञं भवति । हअलत्रिभुजं हतयत्रिभुजं उभे सजातीये । यदि हअेन अलं प्राप्यते तदा हतेन तयमिति चतुर्थचापं । तयं नवतिशुद्धं शेषं तवसंज्ञमंतरं ग्रहयोः । अथान्यल्लकलद्व-





(घ) १. कखगहं for (कखगघं)

वं। हतं प्रथमचापं। छकं वकं द्वितीय चापं। धकछलयोर्योगोंतरं वा कलसञ्ज्ञ तृतीयचापं। वफवनयोर्योगोंतरं वाफनसंज्ञमपि तृतीयचाप। हफलं। हतयं। हफनं। एतानि सजातीयानि त्रिज्यया। फलजीवा वाफनजीवा तृतीय चापस्य प्राप्यते तदा हतप्रथमचापज्यया किमिति तयजीवा चतुर्थचापस्य प्राप्यते। तयसज्ञं चतुर्थचापं। वयमितं नवतौ युतमूनितं वातवसंज्ञमतरचापं भवति ग्रहयोः।

अथ यदा ग्रहयोः शरयोः समत्वं तदान्तरचापायनमाह। समशरौ यदि समदिक्कौ तदा अन्तरार्द्धज्या शरकोटिज्या गुणात्रिज्या भक्ता फलचापं द्विगुणं अन्तरचापं भवति। यदि समशरौ भिन्नदिक्कौ तदा ग्रहान्तरार्द्ध कोटिज्या शरकोटिज्या गुणा त्रिज्या भक्ता फलचापं द्विगुणं भाद्यांशशुद्धमन्तरचापं भवति।

अत्रोपपत्तिः। कगजं क्रान्तिवृत्तचापं दहौ कदम्बौ। वतो अभीष्टग्रहौ एकदिक्समशरौ अचिह्नं ग्रह भिन्नदिक्समशरोस्ति। तत्रान्तरं चापज्ञानं। वतमन्तरचापं एकदिक् समशरग्रहयोरस्ति। भिन्नदिक् समशरयोस्तु व असंज्ञं अन्तरचापमस्ति। कजचिह्नचापं स्पष्ट। ग्रहान्तरमस्ति। कगचापं गजचापं च ग्रहांतरार्द्धचापमस्ति। दवहं प्रथमकदम्बवृत्तं। दगहं स्पष्टान्तरार्द्धकदम्बवृत्तचापं। तदहं[1] अतग्रहयोः कदम्बवृत्तं। कहगत्रिभुजं। वहज्ञत्रिभुजं च सजातीयं। कहजीवया





१. दतहं for (तदहं)

कगजीवा लभ्यते। तदा हवजीवया किमिति लब्धं वझजीवा। तस्य चापं द्विगुणं वत संज्ञं। कगवत्रिभुजं जग अत्रिभुजं सजातीयं। त्रिज्यया कगकोटिज्या लभ्यते। तदा कवकोटिज्यया किमिति लब्ध्वा गवकोटिज्या तस्याश्चापं द्विगुणं भार्द्धांशशुद्धं अवसंज्ञमन्तरचापं भवति।

अथ प्रकारान्तरमन्तरचापानयने। स्पष्टग्रहस्थाने आयनदृक्कर्म संस्कृतोदयांशाः ग्राह्याः। शरस्थाने स्पष्टक्रान्तिर्ग्राह्या। उक्तवत् क्रिया कार्या अन्तरचापं भवति।

अथाभीष्टनगरान्तरचापानयनमाह—

देशान्तरं स्पष्टग्रहान्तरं कल्पनीयं अक्षांशान् शरांशान् प्रकल्प्य पूर्वोक्तप्रकारेण क्रियायां कृतायां सत्यां नगरान्तरचापज्ञानं भवति।

अथाक्षज्या क्रांतिज्या ज्ञाने नतांशेभ्यो नतकालानयनमाह—

गुणखव्यंशगुणितः शंकुः सैकः समन्वितः।
गुणवर्गेण तद्भुक्तानतांशज्याकृतिस्ततः॥१॥
पदमिष्टापसंज्या[1] सौगुणघ्नीष्टपलज्यका[2]।
इष्टाक्षज्याक्षसिजिन्योर्वर्गांतरपदं हतं॥२॥
त्रिज्यया लंबया भक्तं नतांशज्या गुणं हृतं।
इष्टाक्षज्यकया निघ्नं त्रिज्यया द्युज्यया हृतं॥३॥
तच्चापं षट् हृता नाड्यो नतकालसमुद्भवाः।

अथैतेषां श्लोकानामर्थो लिखिते[3]—

अक्षज्या क्रांतिज्यया भाज्या फलं गुणो भवति। गुणकस्य त्रिंशदंशेन गुणितः शंकुः[4] सैकः गुणकवर्गेण समविन्वतश्च कार्यः। तद्भक्तानतांशज्याकृतिः कार्या। अस्याः पदं इष्टापमज्या भवेद्। असौ इष्टा अपमज्या गुणघ्नौ इष्टाक्षज्या भवति।

(घ) २. पमज्या for (पसज्या)   ३. फलज्यका for (पलज्यका)
४. लिख्यते for (लिखिते)   ५. + कार्यः +

Indira Gandhi National Centre for the Arts

इष्टाक्षज्यावर्गः। अक्षज्यावर्गयोरन्तरस्य मूलं त्रिज्यागुणं लंवज्याभक्तं। पुनर्नतांशज्यागुणं। इष्टाक्षज्यकया भक्तं पुनस्त्रिज्यागुणं द्युज्याभक्तं कार्यं। फलस्य चापं षट्भक्तं नतकालसमुद्भवा नाड्यो भवन्ति ।

अस्योपपत्तिरेकोनत्रिंशेन क्षेत्रेण—कखगघं दृग्वृत्तार्द्धं। कघं व्यासः। कचं व्यासार्द्धं। कखं इष्टक्रांतिर्दृग्वृत्ते। कगं दक्षिणगोले नतांशाः। खजं इष्टक्रान्तिज्या। छगं नतांशज्या। खथं इष्टाक्षज्या। इयं साध्यास्ति। चगं त्रिज्या। अस्यां जझं लम्बोस्ति। अस्मिन् खथं लंबो भवति। चगछत्रिभुजं। जझचत्रिभुजं। खय जत्रिभुजं। एतानि त्रिभुजानिस जातीयानि सन्ति। अक्षज्याभुजः। खमध्यात् दृग्वृत्ते इष्टाक्षज्यातुल्यं नतांशखण्डकर्णः। याम्योत्तरवृत्तान्नाडी वृत्तखण्डं कोटिः। इदमेकं।

अथ द्वितीयं। नाडीवृत्ता[1] क्रान्तिज्या भुजः। नाडीवृत्तखंडं कोटिः इष्ट क्रान्तिज्या कर्णः। इमे सजातीये। अत्र क्रान्तिज्याक्षज्ययोर्निष्पत्तिः। सैवेष्टक्रन्तिज्येष्टाक्षज्ययोर्निष्पत्तिर्भविष्यति। तस्मादक्षज्या क्रान्तिज्यया भाज्या फलं गुणसंज्ञं भवति। तेनेष्टक्रान्तिज्या गुणिता इष्टाक्षज्या भवति। दक्षिणगोले इष्टक्रान्तिज्येष्टाक्षज्ययोर्योगेन उत्तरगोलेंतरेण नतांशा भवन्ति। तत्रेष्टक्रान्तिज्या अज्ञातास्ति। अस्याः प्रमाणं या १।

अथ चापांतरज्यानयनप्रकारेणेष्टाक्षज्या दक्षिणगोले साध्यते। तत्र पूर्वो-



(घ) १. वृत्तात्क्रांति for (वृत्ताक्रांति)

क्त क्षेत्रे गचं ६० कर्णे। चछं उन्नत ज्या लभ्यते तदा यावत्तावता किमिति लब्धं जयं। या० उ० १ त्रि० १ इदं गुणगुणितयावद्रूपखथरेखा तुल्यझयरेखायुतं जातं, जझरेखा प्रमाणं या० उ० १ या० त्रि० गु त्रि० १ अथास्याः वर्गः याव० उन्न० व० १ या० व० उ० त्रि० गु० २ (याव० उन्न० व० १ या व उ० त्रि० गु० २ या० व० त्रि० व० गु० २१ त्रिव १) प्रकारांतरेण जझवर्गः साध्यते। यदि गचत्रिज्यावर्गेण गछरूपनतज्या वर्गो लिभ्यते तदा जचरूपेष्टक्रान्तिकोटिज्यावर्गेण किमिति लब्धं, जझ वर्गः याव० न० व० त्रिव १ त्रि० १ एतौ जझवर्गौ समौ। अत्रोपरि तनपक्षे उन्नतज्यावर्गस्य स्वरूपं इदं नव १ त्रिव १ एतौ त्रिज्या वर्गापवर्त्तितौ जातौ पक्षौ यावगुव १ याव १ यावउगु १ नव १ ३० अत्र उपरितन अव्यक्तपक्षे गुणत्रिंशांशेत्यादिना हर उत्पन्नः, तेन रूपे शेषे भक्ते फलमूलं यावत्तावन्मानं इष्टापमज्या भवतीत्युपपन्नं। पुनरियं इष्टापमज्या गुणगुणिता सतीष्टाक्षज्या भवतीति पूर्वं प्रतिपादितमेव। इष्टाक्षज्याक्षवर्गांतरपदं तु लंबज्याग्रे भवति, अपेक्षितं त्रिज्याग्रे, तदर्थमनुपातः लंबज्याग्रे, इदं तदा त्रिज्याग्रे किमिति फलचापं नाडीवृत्तदृग्वृत्तसंपातादायनवृत्तपर्यंतं नाडीवृत्तखंडं भवति। इदं तु इष्टाक्षांशज्याग्रेऽस्ति। नतांशज्याग्रेकरणार्थं पुनरनुपातः। इष्टाक्षज्याग्रे इदं तथा नतांशज्याग्रे किमिति लब्धं भसदृशवृत्तखंडस्य बिंबादायनवृत्तपर्यंतं स्थितस्य ज्यारूपं भवति। पुनरहोरात्रवृत्ते ऽस्य चापकरणार्थमनुपातः। द्युज्याप्रमाणेनेदं तदा त्रिज्याप्रमाणेन किमिति फलस्य चापं नतकालो भवतीत्युपपपन्नं। गुणत्रिंशांशेति–उत्तरगोले चापैक्यज्या प्रकारेणोपपत्तिर्ज्ञेया श्री महाराजाधिराजमहाराजजयसिंहदेवकृतमक्षज्याक्रान्ति ज्याज्ञाने सति नतांशेभ्यो नतकालान-

---

(घ) १. लभ्यते for (लिभ्यते)

२. या० व० त्रि० व१ गु० व१ त्रि० व० १ for (याव० उन्न० व० १ या० व उ० त्रि० गु० २ या० व० त्रि० वगु० २१ त्रि व१)

३. याव० न० घ० १ न० व० त्रिव० त्रि० व१ for (याव० न० व० त्रि० व० १ त्रिव१)

Indira Gandhi National Centre for the Arts

यनं। छ। अत्र प्रकारांतरेणाक्षांशक्रान्त्यंश ज्ञाने नतांशेभ्यो नतकालानयनमाह— नतांशानामक्षांशानां च योगः कार्यः। एकत्रांतर च कार्यं। योगांतरयोर्ज्ये कार्ये। ज्ययोर्योगार्द्धं प्रथमसंज्ञं। ज्ययोरंतरार्द्धं[1] द्वितीयसंज्ञं दक्षिणगोले द्वितीयेन क्रान्तिज्ययोर्योगः कार्यः उत्तरगोलेंतरं कार्यं तत्तृतीयसंज्ञं भवति। तृतीयेन नतज्यागुणं प्रथमेन भक्तं फलं भुजो भवति। भुजवर्गनतांश ज्यावर्गांतरपदं त्रिज्यागुणं द्युज्याभक्तं फलचापं नतकालो भवति। अस्योपपत्त्यर्थं क्षेत्रं। कखगघं याम्योत्तरवृत्तं। छजं नतांशचापं। छकं अक्षांशचापं। कजं अंतरचापं कझं योगचापं। तजमंतरज्या। चझं योगज्याजलं ज्ययोर्योगः। जनं ज्यायोगार्द्धं प्रथमं। तनं ज्यांतरार्द्धं द्वितीयं। सवं दक्षिणगोलेक्रान्तिः। सथं तृतीयं। शयं उत्तर गोले क्रान्तिः। सथं तृतीयं। शयं उत्तरगोले क्रान्तिः। पयं तृतीयं। जमभं नतांशज्या द्विगुणा। छधं खमध्यसूत्रं। कगं नाडीवलयसूत्रं। यदि जनेन जमं लभ्यते तदा सथेन किमिति लब्धं समं भुजः। पुनर्यदि जनेन जमं लभ्यते तदा पयेन किमिति लब्धं सयं अयमेव भुजः। भुजनतांशज्या वर्गांतरपदं उन्नतवलये कोटिर्भवति। इयमहोरात्रवृत्तखंडस्यापि जीवा भवति, इयं यदा त्रिज्यया गुण्यते द्युज्यया भाज्यते तदा नतकालज्या भवति। अथवा[2]। दक्षिणगोले जभं भवति। उत्तर गोले रझं भवति। यदि जनेन जमं लभ्यते तदा जभेन किमिति लब्धं जसं। अथवा लंबज्यया त्रिज्या लभ्यते तदा

(घ) १. रन्तरार्द्धं for (रन्तरार्द्धं)
२. + दक्षिणगोले अन्तरज्याक्रांतिज्ययोरन्तरकार्यं। उत्तरगोले योगज्या क्रांतिज्ययोरन्तरं कार्यं +



जभेन किमिति लब्धं जसं। इद नतज्यायां शोध्यं भुजो भवति। भुजवर्ग नत-ज्या वर्गांतरपदं आयनवृत्ताद् बिंबपर्यंतं द्युरात्रवृत्तखंडस्य जीवारूपं भवति। परं त्विदं द्युज्याप्रमाणे नास्ति, त्रिज्याप्रमाणेन करणार्थमनुपातः। द्युज्या प्रमाणे-नेदं तदा त्रिज्याप्रमाणेन किमिति फलस्य चापं नतकालो भवतीत्युपपन्नं। अथवा। उन्नतांशज्या भुजकोटिज्यागुणा त्रिज्या भक्ता फलस्य चापं नवतौ शो-ध्यं, शेषस्य ज्या भुजकोटिज्या गुणाद्युज्या भक्ता फलस्य चापं नतकालो भवति।

अथ भुजज्ञानमपि दिगंशज्ञानेन भवति तद्यथा त्रिज्यया द्युज्या लभ्यते तदा नतज्यया किमिति फलं भुजो भवति। अथवाऽग्रा शंकुतलसंस्कारादपि भुजो भवति इत्यलं पल्लवितेन।

इत्यक्षज्या क्रान्तिज्याज्ञाने नतांशेभ्यो नतकालानयनम्।

अथ विषुवांशस्पष्टक्रान्त्योर्ज्ञाने शरानयनमाह—

ग्रहस्य विषुवांशेभ्यः साध्याः क्रांतिर्द्वितीयका।
अस्या उदग्दक्षिणत्वं विषुवद्भागगोलतः ॥१॥
स्पष्टापमान्यापमयोर्दिगैक्ये विवरन्तयोः।
दिग्भेदे च तयोर्योगः कार्यो यच्चात्र शेशकं ॥२॥
अस्य ज्या विषुवांशानां कोटिद्युज्यागुणा हृता।
त्रिज्ययाप्तस्य यच्चापं पृशक्तः शेष दिग्भवेत् ॥३॥
अन्यक्रांतिर्यदा वा स्यात्स्पष्टक्रांत्यधिका तदा।
शरस्य दिग्विलोमत्वं ज्ञेयं गोलविशारदैः ॥४॥
अथवा शेषकस्य ज्या विषुवांशज्यया गुणा।
विहृतानयनदृक्कर्म[1] संस्कृतस्य ज्यया फलं ॥५॥

अथ श्लोकानामर्थो लिख्यते। ग्रहस्य विषुवांशेभ्यः अन्यक्रान्तिः साध्या। क्रांतेरुदक्दक्षिणत्वं विषुवांशगोलवशात् ज्ञेयं। अन्यक्रान्तेः स्पष्टक्रान्तेश्च दिगैक्यें-तरं दिग्भेदे योगः कार्यः। शेषं विपुवांशकोटि द्युज्यागुणं त्रिज्याभक्तं फलचापं

(घ) १. विहृतायन for (विहृतानयन)

शरो भवति। शरदिक्शेषवशात् ज्ञेया। अन्यक्रान्तिः स्पष्टक्रान्त्यधिका चेत्तदा-शरो विपरीतदिग्ज्ञेयः। अथवा शेषस्य ज्याविषुवांशज्यागुणाऽऽयनदृक्कर्म संस्कृतस्य ज्यया भक्ता फलस्य चापं वा शरो भवति। अस्योपपत्तिज्ञानार्थं एक-त्रिंशतमं क्षेत्रं। कखगघं कदंबवृत्तमायनदृक्कर्म संस्कृतस्य सत्रिभस्य। हं आय-नदृक्कर्मसंस्कृतः। तदेवकृत् वृत्तस्पष्टकेंद्रं[1] भवति। कगं नाडीवलयं। खघं क्रान्ति वृत्तं। तं बिंबस्थानं। धं ध्रुवः। दं कदंबः। सं गोलसंधिः। धतहमं बिंबीयध्रुव-वृत्तं। दतवं कदंबवृत्तं। वं ध्रुवकः। वतं शरः। तमं स्पष्टक्रान्तिरुत्तरगोले। मसं विषुवांशाः। महं विषुवांशान्यक्रान्तिः। हतं स्पष्टः शरः गद्यं सत्रिभायनदृक्क-र्मसंस्कृतस्य अन्यक्रान्तिः।

अथवा[2] सत्रिभविषुवांशद्युज्या। अथानुपातः। यदि हथेन ६० पथं लभ्यते तदा हतेन किमिति लब्धं वतं शरः अयमेवास्माकमभीष्ट इति विषुवांश स्पष्टक्रान्त्योर्ज्ञाने शरानयनं।

अथाकाश गोलानां भूगोलस्य स्वरूपमुच्यते—

तत्र तावद्ग्रहाकाशा गोलरूपाः सन्ति। आकाशानां गतिरपि गोलरूपास्ति। भूरपि गोलरूपास्ति। इयं भूराकाशमध्यगा वृत्तमध्यस्थकेन्द्रमिवास्ति। पुनरियं नक्षत्र कक्षापेक्षया चिह्नमिव भाति। मध्यान्न प्रचलति स्थिरैवास्ति। आकाशानां सरला गतिः, तिर्यग्गतिश्चक्राकारा गतिश्च ज्ञेया। अक्षांशानां न्यूनाधिक्येन तिर्य-



(घ) १. वृत्तस्य पृष्ठकेन्द्रं for (वृत्तस्पष्टकेन्द्रं)

२. + सत्रिभविषुवांशाद्यक्रांतिः कदम्बवृत्तेः। धथं +

Indira Gandhi National Centre for the Arts

गतेर्बह्वः प्रकारा भवन्ति तेपि ज्ञेयाः । ततः सूर्यगतेर्निश्चयः कार्यः । ततश्चन्द्रस्य गतेर्निश्चयः कार्यः । ततः सूर्यांचन्द्रमसोर्गत्युत्पन्नग्रहणादीनां निश्चयः कार्यः । क्वचित्क्रमः आवश्यकोस्ति, क्वचिदुपयुक्तोस्ति । अयं क्रमः स्वकृतवेधेन प्राचीनाचार्यकृतवेधेन च रेखागणितेन च निश्चितोस्ति ।

अथाकाशगोलरूपागतयश्च गोलरूपाः संतीति प्रतिपाद्यते । पूर्वाचार्यैः प्रकाशवन्ति बिंबानि दृष्टानि, तानि पूर्वस्यां दिश्युदयं प्राप्य शनैः शनैरून्नतानि भूत्वा परमोन्नतत्वं प्राप्नुवन्ति । ततः शनैः शनैर्नतानि भूत्वा पश्चिमस्यां दिश्यस्तं प्रयान्ति । ततः कंचित्कालमदर्शनं प्राप्य पुनः पूर्वस्यां दिश्युदयन्ति । यानि भानि नाडीवलयाद्यावतान्तरेणोत्तरस्थानि तेषां यद्दिनमानं रात्रिमानं च यद्भवति नाडीवलयात्तावतान्तरेण दक्षिणतः स्थितानां दिनमानं रात्रिमानं च तद्व्यत्ययाद् भवति । तेषां अग्रापि तुल्यैव भवति ।

अथ च ध्रुवसमीपस्थानां भानां अस्तोनभ भवति । एतानि कस्यचिच्चिह्नस्य परितः समानान्तराणि भवन्ति । तच्चिह्नं ध्रुवत्वेन निश्चितं । ध्रुवसमीपस्थानामहोरात्रवृत्तानि अल्पप्रमाणानि भवन्ति । ध्रुवा दूरस्थानां महत्परिमाणानि भवन्ति । येषां ध्रुवान्महदन्तरमस्ति तेषां उदयोस्तश्च भवति । दिनमानं महद् भवति रात्रिमानमल्पं भवति । यथा यथैषां महदन्तरं स्यात्तथा तथा होरात्रवृत्तानि बृहत्परिमाणानि भवन्ति । रात्रिमानं वर्धिष्णु भवति, दिनमानं क्षीयमाणं भवति । एवमग्रे सर्वेभ्योधिकमहोरात्रवृत्तं भवति । तत्र दिनमानं रात्रिमानं च समानं भवति । मतो यदाऽधिकमन्तरं यथा यथा भवति तथा तथाहोरात्रवृत्तानि लघूनि भवन्ति । रात्रिमानमधिकं वर्धिष्णु च भवति, दिनमानमल्पं क्षयिष्णु च भवति । एवं पूर्वक्रमाद्विपरीतं भवति । एतै प्रकारैराकाशगोलरूपास्तेषां गतिरपि गोलरूपास्तीति निश्चितं । यैर्नदीजलप्रवाहवन्नक्षत्राणां पश्चिमगमनमंगीकृतं, तेषां बुद्धिशून्यानां मतं समीचीनं न भवति । कुतः । अस्तंगतस्यैव पुनरुदयदर्शनात् । यदि तानि पश्चिमस्यां सरलगत्यैव गच्छन्ति तदातिदूरगतानां

(घ) १. १. न for (नभ)

बिंबाल्पत्वं स्यात् । तत्तु न भवति । किन्तु अस्तमये महद्बिंबमेव दृश्यते । अस्तमये च बिंबचतुर्थांशो मग्नः बिंबार्द्धमग्नं पादोनं बिंबमग्निमिति[1] प्रतीयते अल्पं भूत्वा दर्शनं यातीत[2] न प्रतीयते ।

अथ चान्यैरप्यल्पबुद्धिभिरेवमुच्यते—

भूमेरुत्थितो धूमोग्निगोलं प्राप्य प्रकाशवान् भवति । तदा किंचिदुदितमिति प्रतीयते । स प्रकाशः ज्वलन् पश्चिमदिशं समागत्य नाश प्रयाति । तदा अस्तोजात इति प्रतीयते । इति यदुक्तं तदपि बाधितमेव । कुतः । तत्स्थानात्पश्चिमस्थानां तत्प्रकाशदर्शनात् । यदि स धूमो नष्टः तदा पश्चिमस्थानां दर्शनं स्यात् । मनद्वयाश्रिताः ध्रुवासन्नतारकाणां सदोदितानां संस्थां विलोक्य किं वदन्तीति न विद्मः । यदि च ग्रहर्क्षाश्रिताकाशाः गोलरूपा न स्युस्तर्हि उदयादस्तपर्यंतं ग्रहर्क्षाणां बिंबस्य दर्शनं एकरूपं न स्यात्, दर्शनं तु एकरूपं भवति । अतस्तेषामाकाशागोलरूपा भवन्तीति ज्ञायते । क्षितिजासन्नबिंबं यद्बृहद्दृस्यते तत्रेदं कारणम् । तत्र क्षितिप्रदेशे जलबाष्पा बहवः संन्ति, तैराच्छिन्नं बिंबं जलान्तर्गतवस्तुवत्प्रतिनेत्रादर्षवच्च महत् दृश्यते । तत्रापि यादृशजलमधिकं स्यात्तादृशं बृहत् दृश्यते ।

अथ च यैर्गोलयन्त्रादिपदार्थैर्वेधः कृतस्ते पदार्था गोलरूपा एव तस्मादपि च ज्ञायते । आकाशा गोलरूपा एव नोचेत्तर्हि गोलादिना तेषां गतयो मिलिता न भवेयुः, तस्माद्गोलरूपा आकाशा एवेति निश्चितं ।

अथात्र तावद्भूमेर्गोलरूपत्वं प्रतिपाद्यते, तत्र पूर्वाश्रितानां क्षितिजानामुपरिग्रहर्क्षबिंबदर्शनमुत्तरोत्तरकालेन जायते । अस्तक्षितिजे च स्वस्वदेशान्तरमितकालेन बिंबादर्शनं भवति । ततः प्रतीयते इयं भूर्गोलरूपास्ति । यदि कचोलोदरसन्निभा स्यात् । तदा भूमध्यस्थानां महता कालेनोदयाद् बिंबदर्शनं स्यात् । पश्चिमस्थानां पूर्वमेव स्यात् । यदि च मुकुरतलनिभा समा चक्राकारा भूरपि[3]

(अ) १. मग्न for (मग्नि) २. यातीति for (यातीत)

३. भूरस्ति for (भूरपि)

Indira Gandhi National Centre for the Arts

तर्हि सर्वेषां भस्थानां युगपदेव बिंबदर्शनं स्यात् । तच्चैत्र न संभवति तस्मात्पूर्व-त्वाद् ग्रहबिंबदर्शनादर्शनविचारेण भूर्गोलरूपास्तीति फलितं । ननु चैवं पूर्वपश्चिम-स्थानामुपपन्नं भूमेर्गोलरूपत्वं उच्यते । याम्योत्तरप्रदेशस्थानां केन प्रकारेण दर्शना-दर्शनेन गोलरूपत्वं भूमेः प्रतिपादितं । तत्र भूरस्ति स्वस्थानादुत्तरतः गमन-शीलस्य पुंसः भचक्रस्यौन्नत्यं ध्रुवाश्रितानां तारकाणां च सदोदितत्वं भवति । तस्मादपि च ज्ञायते याम्योत्तरेणापि भूर्गोलरूपास्ति ।

अथ भूः खमध्ये वृत्तमध्यस्थ केन्द्रमिवास्तीति प्रतिपाद्यते, तत्र यदि खमध्ये भूः ध्रुवसूत्र केन्द्रे न स्यात् । उपरि चाधोभागेस्ति । तदा निरिक्षक्षितिजे दिनरात्रिसमत्वं न स्यात् । कुतः । निरक्षक्षितिजं नाडीवलयाहोरात्रवृत्तानां समानानि खण्डानि न करिष्यति ।

अथ च । निरक्षादन्यत्रदेशे यदा रविर्नाडीवृत्ते समायाति तदा दिनरात्र्योः साम्यं न स्यात् । अन्यस्मिन्नहो रात्रवृत्ते रविप्रवेशेन दिनरात्रसाम्यं स्यात्, तन्न भवति । सर्वदेशेषु नाडीमण्डल प्रविष्टे रवौ दिनरात्र्योः साम्यं भवतीति दृष्टं । तस्मात् ध्रुवसूत्रादूर्ध्वाधरस्था भूर्नास्ति । यदि ध्रुवसूत्रात्पूर्वाऽपरविभागे भूरस्ति । तदा उदयेस्ते बिंबस्य एकरूपं दर्शनं न स्यात् । अयमभिप्रायः । यदा ध्रुवसूत्राद्भूः पूर्वतस्तिष्टति तदा उदये विंबं महत् दृष्टं स्यात्, अस्तेऽल्पं दृष्टं स्यात् । यदा पश्चिमस्था भूस्तदोदये बिंबमल्पं दृष्टं स्यादस्ते महद्बिंबं दृष्टं स्यात् । अन्यत्र । पूर्वापरकपाले नतांशसाम्ये नतकाल साम्यं न स्यात् । दिनार्द्धसाम्यं च न स्यात् । तस्मात् भूकेन्द्रं ध्रुवसूत्र एव तिष्ठति । ध्रुवसूत्रार्द्धप्रदेशाद्यदि भूर्दक्षिणो-त्तरस्थास्ति तदा निरक्षक्षितिजमाकाशगोलस्य समानं भागद्वयं करिष्यति । साक्षक्षितिजं विभागद्वयं न करिष्यति । तत्रायमभिप्रायः । यदा भूरुत्तरतो भवति तदोपरितनमाकाशगोल खण्डमल्पं स्यात् । यदा दक्षिणतो भवति तदोपरितनं खण्डं महद् भवति । अधस्तनमल्पं भवति । इयं व्यक्षादुत्तरस्थानां स्थितिः । व्यक्षा-द्दक्षिणस्थानां तूक्तवैपरीत्येन भवति । अन्यच्च नाडीवलयस्य साक्षक्षितिजसमानं खण्डद्वयं न करिष्यति । अन्यच्च उत्तरस्थाहोरात्र वृत्तस्यदिनखण्ड रात्रिखण्डं

(घ) १. अन्यच्च for (अन्यत्र)

च तत्तुल्यदक्षिणस्थाहोरात्रवृत्तस्य रात्रिखण्डेन दिनखण्डेन च साक्षदेशे समानं न स्यात्। समानता तु दृष्टास्ति। अन्यच्च। विषुवद्दिने शंकुछाया रवेरुदयेस्ते च पूर्वापरसूत्रे न पतिष्यति। तद्दिने पूर्वापरसूत्रे प्रत्यक्षं पतिता दृष्टास्ति। तस्माद् भूमिः ध्रुवसूत्रार्द्ध एव तिष्ठति, तत्केन्द्रं सर्वग्रहाकाशगोलानां केन्द्रमस्ति।

अथ ग्रहकाशगोलेषु भूमिश्चिह्नरूपास्तीति प्रतिपाद्यते। कुतः सर्वदेशेषु एककाले वेधेन बिंबप्रमाणकलानां समत्वात्। एकदेशे अनेककालवेधेनापि बिंब-प्रमाणकलानां समत्वात्। अन्यच्च। यदि भूर्महत्प्रमाणा स्यात् तदा खमध्यात् भूप्टष्ठस्थानां निकटे स्यात्। क्षितिजं दूरे स्यात्। क्षितिजे बिंबप्रमाणमपि दृष्टं स्यात्। खमध्ये बिंबप्रमाणं महद्दृष्टं स्यात्तादृशं तु न दृश्यते। एकरूपप्रमाणं बिंबं दृश्यते। अन्यच्च, भूपृष्ठे या शंकुछाया भवति, गणितेनापि सैवायाति। किंचिदप्यंतरं नायाति। अन्यच्च वेधार्थं कृतानां धात्वादिगोलयन्त्राणां केन्द्राणि भूमिपृष्ठे भवन्ति, अपेक्षितं तु भूकेन्द्रे। गोलादियन्त्रकेन्द्रं तु भूकेन्द्राद् दूरेऽस्ति। भूपृष्ठस्थैर्गोलादियन्त्रैः सम्यक् निष्पादितैर्वेधो यदा क्रियते भूकेन्द्राभिप्रायेण ग्रहध्रुवकशरक्रान्त्यादिसर्वं निरन्तरं मिलति। एतैः प्रकारैर्ग्रहगोलाकाशापेक्षया भूरल्पप्रमाणास्तीति निश्चितं।

अथ भूराकाशगोलमध्यात् न चलति। किन्तु निश्चलास्ति। यदि भू-मध्याच्चलिता भवेत्तदा पूर्वोक्तान्येव दूषणानि समायान्ति। यानि गुरुणि वस्तूनि तान्याकाशगोलकेन्द्राभिमुखमेव प्रयान्ति। यदि भूरावरणं न स्यात्तदा गुरु वस्तु आकाशकेन्द्रगतमेव स्यात्। पृथ्वी सर्ववस्तुभ्योतिगुर्व्यस्ति। अस्याः केन्द्रं आकाश केन्द्रे मिलितमस्ति। तेन पृथिव्या आकाशगोलः सर्वतः समानान्तरश्चास्ति। अनेनेयं भूरतिभाराक्रान्ता कथं निश्चला[1] तिष्ठतोति भ्रान्तिरपास्ता।

अथ केचिद्वदन्ति भूरधो याति, तन्न। यदि भूरधोधो याति। तदाकाश-क्षिप्तं वस्तु भूसंलग्नं न स्यात्।

अथ च। केचिदेवं वदन्ति भूरेव नाक्षत्राहोरात्रेण परिभ्रमणं करोति।

(घ) १. निश्गला for (निश्चला)

तेनैव ग्रहर्क्षाणामुदयास्तादिकं भवति। नत्वाकाशचलनेनेति। तन्न यदि भूः पूर्वतो याति तदा शरपक्ष्यादीनां पूर्वगमनं न स्यात्। अपि तु पूर्वं क्षिप्तानां शरपाषाणादीनां पश्चिमगमनमेव प्रतीयेत। पुनः। शरादीनां वेगस्य असुमात्रकालेन क्रोशमात्रं गच्छंत्या भूमेर्वेगाल्पत्वात्। यदि भूसंलग्नो वायुरपि पूर्वतो याति। तेनाकृष्टं पूर्वदिशि क्षिप्तं शरादिकं पूर्वतो यातीति चेत्, तदा केषामपि पश्चिमगमनं न स्यात्। कुतः सन्मुखागतं वायुं निर्भिद्य गंतुमशक्यत्वात्। तस्मात् पृथ्वी निश्चलास्तीति निश्चितं।

अथाकाशस्य द्विविधागतिरस्तीति पाद्यते। आकाशस्यैकाऽहोत्रगतिः पूर्वतः[1] पश्चिमपर्यंतमस्ति। अनया गत्या यस्य कस्यचिद्[2] बिंबादिचिह्नस्याहोरात्रवृत्तं स्यात्। एवमनेकान्यहोरात्रवृत्तानि स्युः। एतेषां ध्रुवद्वयं निश्चलं तत्प्रसिद्धमेवास्ति। यत्सर्वेभ्योऽहोरात्रवृत्तेभ्यो महत् द्वयोर्ध्रुवयोः समानान्तरं वृत्तं तन्नाडीवलयसंज्ञमस्ति। आकाशस्य पश्चिमगतिः प्रकाशमद्ग्रहबिंबानामुदयास्तादिना निश्चितास्ति। द्वितीया गतिरेतद्विपरीता पश्चिमतः पूर्वपर्यंतमस्ति। पूर्वगमनशीला नामाकाशगोलानां ध्रुवौ भिन्नौ स्तः। ध्रुवद्वयमध्यवर्त्तिवृत्तमपि प्रत्येकं भिन्नमेवास्ति। इयं पूर्वगतिः कथं ज्ञाता इति चेत्। सप्तग्रहाणां नक्षत्रचारेणोपलक्षिता। अन्यदपि एते ग्रहा नाडीवलयात्कदाचिदुत्तरस्थाः कदाचिद्दक्षिणस्थाः कदाचिन्नाडीवलय एव भवन्ति, तेन ज्ञातं। एतेषां मध्यवृत्तानि भिन्नानि ध्रुवाश्च भिन्ना इति।

अथ यस्मिन् वृत्ते रविर्भ्रमति। तद्वृत्तं क्रान्तिवृत्तसंज्ञं। तन्नाडीवलयेऽन्तरितस्थानद्वये संलग्नमस्ति। तत् ध्रुवौ कदम्बसंज्ञकौ स्तः। यावदेव नाडीवृत्तक्रान्तिवृत्तयोः परममन्तरं परमक्रान्तिसंज्ञमस्ति। तावदेव ध्रुवकदम्बयोरन्तरमस्ति।

अथ चन्द्रादयो ग्रहाः कदाचित् क्रान्तिवृत्तादुत्तरतः कदाचिद्दक्षिणतो दृष्टाः। अतस्तेषां वृत्तानि ध्रुवाश्च क्रान्तिवृत्तकदम्बाभ्यां भिन्नाः संतीति ज्ञातं।

(घ) १. 'पूर्वतः, लुप्त
२. कस्यकिंद्बिंबादि for (कस्यचिद्बिंबादि)

Indira Gandhi National Centre for the Arts

अथैकं वृत्तं ध्रुवद्वयकदम्बद्वयोपरिगतं क्रान्तिवृत्तनाडीवृत्तसंपातात्त्रिभान्तरे क्रान्तिवृत्तनाडीवृत्तलग्नं परमक्रान्त्युपरिगतं तदायनवृत्तं ज्ञेयं।

अथ क्रान्तिवृत्तस्यायनवृत्तसंपातेन नाडीवृत्तसंपातेन च चिह्नचतुष्टयाच्चत्वारि पदानि जातानि। नाडीवृत्तक्रान्तिवृत्तसंपाते उत्तरगोलादौ मेषादि चिह्नं ज्ञेयं [१]दक्षिणायनादौ कर्कादिचिह्नं ज्ञेयं। एकैकस्मिन्पदे राशित्रयमस्तीति ज्ञेयं। एवं सर्वस्मिन् क्रान्तिवृत्ते द्वादशराशयो ज्ञेयाः।

अथ पश्चिमगमनरूपा प्रथमगतिः। सर्वानाकाशगोलान् पश्चिमतो भ्रमयति। सर्वगोलानां ध्रुवान् च ध्रुवस्यासमं ततो भ्रामयति। क्रान्तिवृत्तमायनवृत्तं च भ्रमयति।

अथ यद्वृत्तं अहोरात्रवृत्तानां दिनखण्डस्य च समानं भागद्वयं करोति। तद्याम्योत्तरवृत्तं ज्ञेयं। यथा। अयनवृत्तं नाडीवृत्तेस्ति। तथा याम्योत्तरवृत्तमप्यस्ति। इदं याम्योत्तरवृत्तं कदम्बोपरिगतं भवति। यदायनवृत्तं अहोरात्रेण वारद्वयं याम्योत्तरवृत्ते समायाति तदा याम्योत्तरवृत्तं कदम्बगतं भवति।

अथ द्वितीयगतिस्तुनवमगोलाधः स्थितेषु सर्वगोलेषु प्राप्तास्ति। श्री महागणपतये नमः। पुष्पवतोर्ग्रहणे उदयास्तयोर्ग्रह स्पष्टीकरणे चांतरं दृष्टं तदा यन्त्ररचना कृता। इंद्रपस्थे अवन्त्यां तथा काश्यां मथुरायां सवाईजयपुरे च सर्वत्र यंत्ररचना कृता। पूर्वं प्राचीनमिजस्तिकर्त्रा मतलमजूषेन यन्त्रैर्ग्रहनक्षत्रवेधं कृत्वा निश्चयः कृतः। तदनन्तरं समरकंदनगरे उलूकवेगनाम्ना यन्त्रैर्ग्रहनक्षत्रवेधं कृत्वा निश्चयः कृतः। ततो वर्षशतत्रयानन्तरं श्री महाराजाधिराज जयसिंह प्रभुवर्याणामाज्ञया यन्त्ररचना जाता। पूर्वं यवनैर्जातुल् हलकं नाम गोलापरपर्याय धातुमयं यन्त्रं कृत्वा वेधः कृतः। तत्रायं दोषः यद्धातूनामतिभारतया क्रान्तिवृत्तं कदम्बस्थानान्नमति। तस्य नम्रतया वेधे त्रिंशत्कलात्मिका अशुद्धता भवति, एवं दृष्टं तदा श्रीमहाराजाधिराजजयसिंहदेवैर्नवीनया युक्त्या जयप्रकाशयन्त्रं कृतं,

(घ) १. +एवंद्वितीयसंपाते दक्षिणगोलादौ तुलादिचिह्नं ज्ञेयं। आयनवृत्तक्रान्तिवृत्तसंपाते मकरादिचिह्नं ज्ञेयं+

अस्य कर्तव्यता यन्त्राध्याये द्रष्टव्या । गोलयन्त्रेण यत्कार्यं सिध्यति तदनेनापि सिध्यति। इदं यन्त्रं स्थिरमस्ति। अस्मिन्नशुद्धता ग्रहाणां न भवति। यावन्मितः स्पष्टखेट आकाशे भवति स एव जयप्रकाशयन्त्रेण शुद्ध आयाति इति वेधेन ज्ञात। गणितं कृत्वा दृश्यते चेदन्तरं पतति। अस्मिन् जयप्रकाशे यथास्थितः स्पष्ट आयाति। अन्यच्च। यन्त्रराजात्समयज्ञानं वायनदृक्कर्मग्रहज्ञानं भवति। स यन्त्रराजो महान् भवितुं नार्हति यतस्तत्र वृत्तानिष्पादनार्थं महती यष्टिः कृता चेत्, सा नमति वृत्तं शुद्धं न भवति तेन वेधेन ध्रुवकः शुद्धो नायाति।

अथ पुनर्यंत्रसम्राडाख्यं अर्द्धचन्द्रसदृशं अष्टादशकमंकारहस्तव्यासार्द्धमितं कृतमस्ति। तत्करणप्रकारो वेधप्रकारश्च यन्त्ररचनाध्याये द्रष्टव्यः। अनेनक्रान्तिज्ञानं नतघटिकाज्ञानं च भवति।

अथ क्रान्तिनतघटीभ्यां ध्रुवकज्ञानं मुक्तमेवास्ति।

अथ यवनैर्दिगंशोन्नतांशज्ञानार्थं जातुः शुकबतैनाख्यं यन्त्रमुक्तमस्ति। तस्य वेधपट्टी अतिमहती भवति।[1] वेधपट्टी च महत्त्वान्नमति, तेन वेधः शुद्धो नायाति। नतांशेष्वन्तरं भवतीमं दोषं ज्ञात्वास्माभिर्दिगंशोन्नतांशज्ञानार्थं रामयन्त्र स्थिरं कल्पितमस्ति। अस्मिन्यन्त्रे यथास्थितं दिगंशोन्नतांशज्ञानं भवति। रामयन्त्रद्वयं कार्यं। तस्मिन्वेधार्थं यावदंशमिता वीथी स्थाप्या भवति, तावती स्थापनीया। यावान्वीथी विस्तारस्तत्तुल्या पट्टी चूर्णेन पाषाणेन वा कार्या। एवमेव द्वितीयरामयन्त्रमपि कार्यं। परन्तु प्रथमरामयन्त्रे यत्र पट्टीकृता द्वितीयरामयन्त्रे तत्र वीथी स्थाप्या। यदा वेधं कर्तुमपेक्षा भवति तदैव वेधः कार्यः। एकस्मिन् रामयंत्रे वेधावरोधश्चेत् द्वितीययन्त्रवीथीषु ग्रहर्क्षादिकं वेध्यं, ईदृशः प्रकारः कृतः येनाशुद्धता न भवति। अनया रीत्या सर्वत्र यन्त्रैर्वेधः कारितः, सूर्यस्य निश्चयः कृतः। इन्द्रप्रस्थे सवाई जयपुरे च नित्योद्भवा मध्यनतांशा विद्धाः। मेषासन्नराशिमीनवृषकन्यातुलागतेषु भास्करेषु वेधत्रयं शुद्धं गृहीतं, तस्माद्वेधत्रयात्पूर्वोक्त प्राचीनप्रकारेणापि फलं मन्दकेन्द्रं मध्यमग्रहश्च निष्कासितः। स मध्यमः वेधितो[2] यवनग्रहान्नव ९ कलामितोधिक आगतः।

(घ) १. +तच्चालनार्थं मनुष्यबाहुल्यं चलगतितदातिकष्टेन वेधो भवति सोपि यथासमये न भवति। +

२. वेधित for (वेधितो)

Indira Gandhi National Centre for the Arts

अथैतत्प्रतीत्यर्थं प्रात:सायंकालयो: नक्षत्रै: कृत्वा सूर्यस्यान्तरं यन्त्रसंम्राजा निश्चितं। तन्मेषादिराशिषु सर्वत्र सूर्यघटिका गणितेन यवनमतेन ताभ्यो घटीभ्यो वेधितनक्षत्रोपरि रविघटिका: पलद्वयं २ कदाचित्पलं १ अनयोर्योगार्द्धं १। सार्द्धं पलं । एतस्य कला: ६ नवनिश्चिता:। तद्यदेंद्रप्रस्थे यस्मिन् दिने भ्रं जातं तस्मिन् दिने सवाई जयपुरे वेधो दृष्ट:। सवाई जयपुरे यदा भ्रादिकं जातं तस्मिन् दिने इन्द्रप्रस्थे वेध: कृत: दृष्टश्च। एवमवंत्यां मथुरायां काश्यां च सर्वत्र निश्चय: कृत:। अभ्रस्यायं नियमो नास्ति यत्सर्वत्रैवाभ्रं भवतीति। काबिले वर्षाकाले भ्रं न भवति। पौषादिमासेषु अभ्रं भवति। तेनायं नियमो न[1]।[2] जयप्रकाशाद्वेधं कृत्वा साधयेत्।

अथांतरनिष्कासनं ग्रहाणां बहुकालसाध्यं वर्त्तते तेन वेधे आयाति, स एव ग्रह: फलदाने। अयनांशा: १६।४७ शके १६५२ वेधितग्रहेषु शोध्यास्तदा ते ग्रहानिरयना अवशिष्यंते[3]। अयनांशानां गतिस्तु सप्ततिभिर्वर्षैरेकोंशो निश्चितोस्ति। निरवयवानां जातकादिके फलं ग्राह्यं।

अथ यदि कश्चित्पूर्वपक्षं करोति य: ग्रहोस्तंगतस्तस्य वेध: कथं संभवति। तत्र मुख्यं तु अस्तंगतो ग्रह: निर्बलो जातस्तेनास्य फलं न्यूनमेवास्ति। अन्यच्च। यंत्रादिकेषु बहुकाले नास्तंगतग्रहस्यापि ज्ञानं भवति। गणितेनास्तं गत-ग्रहस्यापि ध्रुवक: साध्यो भवति। एवं प्रकारैर्ग्रहशोधने देशाधिपेन राज्ञा देशे देशे यंत्ररचनां कृत्वा निश्चय: कार्य:। अत्र यंत्रै: परमक्रान्तिनिश्चय: कृत:, क्रान्ति २३।२८ अन्योपि कश्चिदग्रे निश्चयं कर्तुमिच्छति चेत्तेनापि यंत्रै: क्रांत्यादीनां निश्चय: कार्य:। यतोस्य कालांतरेण व्यवस्था भिन्ना भिन्नास्ति। अन्यच्च। फिरंगदेशे। श्रीमहाराजाधिराजैर्महंमदशरीफनामा यवन: प्रेषित: स्थित:तेन महैलद्वीपे गत्वाऽक्षांशा ४।१२।। निश्चितास्ते दक्षिणा: दक्षिण देशे यत्राग्ने दक्षिणध्रुव उन्नतो दृष्ट:, तत्रत्यानां तारकाणामाकृतिर्दृष्ट्वा शुद्धा: कृत्वा आनीता:।

---

१. तास्ति for (न)

२. +अथ य: कश्चिदिष्टग्रहान्साधयितुमिच्छति स+

३. 'अ' लुप्त

Indira Gandhi National Centre for the Arts

तेषां ध्रुवकाः शराः क्रांतिद्युज्यावा देशदेशीया मध्यनतांशाश्च दृष्टाः। एवमेव सूरतिदेशात् फिरंगदेशोद्भवा गोलाः समानीताः। तथा महमदमैहदीनामा यवन अग्रेद्वीपेषु प्रेषितः। एवं देशे देशे पूर्वदक्षिण पश्चिमोदक्दिशासु सर्वत्र निश्चयः कृतः। अग्रेपि यो राजा देशाधिपतिर्भविष्यति तेनाप्येवमेव[1] देशे देशे यंत्राणि कारयित्वा वेधेन निश्चयः कार्यः। तदा यो ग्रहः नक्षत्रं[2] च यादृशं वेधेनायाति स एव प्रमाणं। कालभेदेन वाऽऽकाशगोलस्य गतावनेकरूपतयांतरं पतति तस्य निश्चयः कर्त्तव्यो यः कश्चित् ज्ञाता भवति (भविष्यति)[3] तेन। आकाशे ग्रहगतिरन्यथा सिद्धान्तेभ्योप्यन्यथा ज्ञाता भवति। यदार्षग्रंथेष्वपि ब्रह्मसिद्धान्तजा ग्रहा अन्यथा सूर्यसिद्धान्तजाश्चान्यथा ऽऽ यांति। तेनेदं ज्ञायते आकाशे एकरूपता नास्तीति। यद्याकाशे एकरूपता स्यात्तदा सर्वकाले सर्वसिद्धांतेभ्यश्च ग्रहा अपि एकरूपा एव स्युरिति। एवं सत्यपि लोकव्यवहार्थं प्राचीनोक्ता मध्यमक्रिया प्रोच्यते।

अथ च तेषु बीजं दत्वा फलसंस्कारेण यथा दृक्तुल्यतां यांति तथात्र ग्रहाः साधिताः ॥६॥ श्रीमहागणपतये नमः[4] ॥६॥

अथ मध्यमाधिकारः—

ब्राह्मचं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा।
सौरं च सावनं चांद्रमार्क्षं मानानि वै नव ॥१॥
भूतानामंतकृत्कालः कालोन्यकलनात्मकः।
सद्विधास्थूल सूक्ष्मत्वात् मूर्त्तश्चामूर्त्त संज्ञकः ॥२॥
मूर्त्तः प्राणादिक स्त्र्युद्यादिकश्चामूर्त्तसंज्ञकः।
द्युरात्रवृत्ते तच्चक्रकला एवासवः स्मृताः ॥३॥
खेंदुगुर्वक्षरोच्चारः श्वासकालो ह्यसुश्च तैः।
इत्थं नाक्षत्रमानं स्यात्प्रवाहानिलजभ्रमात् ॥४॥

(घ) १. तेनाप्येवमेवमेव for (तेनाप्येवमेव) २. सक्षत्रं for (नक्षत्रं)
३. '(भविष्यति)' लुप्त ४. 'श्री महागणपतये नमः' लुप्त

Indira Gandhi National Centre for the Arts

विकलानां कलाषष्ट्या तत्षष्ट्या भाग उच्यते।
तत्त्रिंशता भवेद्राशिर्भगणो[1] द्वादशैव ते ॥५॥
इत्थं भमण्डले क्षेत्रविभागास्तद्विदोदिताः।
पूर्वक्रमादजादीनां तथा भानां च दस्रभात् ॥६॥
पलं षड्भिः सषड्भिस्तैर्घटी तत्षष्टि संख्यया।
दिन तत्त्रिंशता मासो वर्षं द्वादशभिश्च तैः ॥७॥
पश्चिमभ्रमणाद्भानां ग्रहाणा प्रावकुजे बुधैः।
उदयादुदयं वारः सावनाहः प्रकीर्तितः ॥८॥
भानां भभ्रमसंज्ञः स्याद्ग्रहाणां सावनाह्वयः।
तस्य सूर्यस्य[2] दिनसंज्ञोप्युदीरितः ॥९॥
सूर्यचन्द्रमसोर्योगो दर्शांतः परिकीर्तितः।
अमांतादग्रिमामांतं चान्द्रो मासः प्रकीर्तितः।
एतत्पंत्रं द्युरात्रं स्यात्सौरः सूर्यस्य संक्रमात् ॥१०॥
त्रिंशता दिवसैर्मासः सावनः परिकीर्तितः।
खवह्निभिस्तथाभागैः सौरस्तिथिभिरैंदवं[3] ॥११॥
चक्रैकभोगात् सूर्यस्य सौरं वर्षं प्रकीर्तितं।
देवानां दितिजानां च दिनरात्र विपर्ययात् ॥१२[4]॥
खांगाग्निभि द्युरात्रैश्च दिव्यं वर्षं तथासुरं।
गुरोर्मध्यैकराशेश्च भोगे संवत्सरं[5] विदुः ॥१३॥
लंकानिशीथ चलिताग्रहोच्चपातादयः सर्वे।
नाडीभवृत्तयोगात्[6] दैवसृष्ट्यादिसमयोभूत् ॥१४[7]॥

(घ) १. भगणो for (भगणे)
२. + भूसंज्ञो +
३. रैन्दवः for (रैन्दवं)

नोट—यहाँ एक श्लोक १२ वां कटा हुआ है।

४. ॥१३॥ for (॥१२॥)
५. ॥१४॥ for (॥१३॥)
६. योगात्त for (योगात्)
७. ॥१५॥ for (॥१४॥)

Indira Gandhi National Centre for the Arts

कालेन येन योगः स एव यदि याति कल्पसृष्टिं तां ।
प्रवदन्ति पूर्वऋषयः सिद्धांतार्थैकनिष्णाताः ।।१५।।[1]
भगणाः सर्वमानानि सौरचांद्रादिकानि च ।
येन संपूर्णतां याति स कालः कल्पसंज्ञकः ।।१६।।[2]
सृष्टेः स कालः कमलोद्भवस्य निद्रात्ययाद्वेदनगाब्धितुल्यैः ।
शताहतैर्वर्षगणैश्च दिव्यैर्भवेत्ततोहर्गणखेटसिद्धिः ।।१७।।[3]
महायुग सहस्रेण कल्पस्तत्तु महायुगम् ।
चतुर्युगमितं तानि चतुर्लघुयुगानि च ।।१८।।[4]
कृताह्वयं तथा त्रेताह्वयं द्वापरसंज्ञकं ।
तथा कल्पाह्वयं ज्ञेयं धर्मांघ्रिह्रासतः क्रमात् ।।१९।।[5]
खाभ्राभ्ररदवेदैश्च कृताग्निकरभूगुणैः ।
रव्यब्दैश्च क्रमेणैते स्युः कृताद्यायुगांत्रयः ।।२०।।[6]
कृतं १७६८००० त्रेता १२९६००० द्वापरं ८६४००० कलि ४३२००० एषां
स्वार्काशकैस्तुल्यौ संध्या संध्याशकौ सदा ।
आद्यंतयोर्युतौ तेषामयुतघ्नरदाब्धयः ।।२१।।[7]
४३२०००[8] महायुगं मनुस्तैश्च युगैः वज्रद्विमितैस्तथा ।
आदिमध्यावसानेषु कृताब्दैः १७२८००० संधयः स्मृताः ।।२२।।[9]
मनूनां तिथि संख्याकास्तत्रावश्यं जलप्लवः ।
अर्काब्दैरिन्द्रसंख्याकमनुभिर्ब्राह्म एव सः ।।२३।।[10]
कल्पः प्रोक्तः फलार्थं तु कालविद्भिर्मुनीश्वरैः ।

(घ) १. ।।१६।। for (।।१५।।) २. ।।१७।। for (।।१६।।)
३. ।।१८।। for (।।१७।।) ४. ।।१९।। for (।।१८।।)
५. ।।२०।। for (।।१९।।) ६. ।।२१।। for (।।२०।।)
७. ।।२२।। for (।।२१।।) ८. ४३२०००० for (४३२०००)
९. ।।२३।। for (।।२२।।) १०. ।।२४।। for (।।२३।।)

Indira Gandhi National Centre for the Arts

सर्संधिर्मुनुभिश्चैव[1] कोटिघ्नास्ते रदाब्धयः ।।२४।।[2]

४३२०००००००० प्रवदन्ति दिनं ब्राह्ममहोरात्रं च तद्वयं ।

वर्षाहोरात्रसंख्या तु खांगाग्नि प्रमिताविधेः ।।२६।।[3]

भूस्थितानां च जीवानां न स्थिरांबरवासिना ।

अनीदृशं जगदिदं न कदापीति वाग्बलात् ।।२७।।[4]

तल्लये संशयो नैव कार्यो निगमवेदिभिः ।

भूमेरेव विभागास्ते भूर्भुवः स्वः सदोदिताः ।।२८।।[5]

व्यक्षाद्याम्ये तथा सौम्ये तथा मेरुरिति क्रमात् ।

तद्गतब्रह्मसृष्टेः स्याद्विलयस्तद्दिनांत्यजः ।।२९।।[6]

सर्वदैव महाकाले महर्लोकादि खेस्तिहि ।

मार्कंडेयपुराणादौ सच्छ्रीभागवतेपि च ।

स्वीयप्रमाणवचनान्यपि स्पष्टानि सन्ति वै ।।३१।।

सौरेतु सृष्टिवर्षोक्तौ ग्रहर्क्षस्रजनं कजं ।

उक्तं ते भस्थिरा सृष्टिः कथं युवतेति चे छृणु ।।३२।।

जपपूजनहेतोस्ते निर्मिता देवतांशकाः ।

विधिना बिंबरूपा ये तद्भिन्नास्त्वव्ययाः सदा ।।३।।[7]

ब्राह्ममानमिदं प्रोक्तं तादृशाः कमलोद्भवाः ।

कालेस्मिन् बहवो जाता भविष्यन्ति सनातने ।।३४।।

आयुषोर्द्धं गतं तस्य वर्तमानस्य चाग्रिमात् ।

कल्पादितः प्रमाणार्कपूर्वशास्त्रानुसारतः ।।३५।।

स्वायंभुवो मनुः स्वारोचिषश्चोत्तमजस्तथा ।

तासमो रैवतस्तद्वच्चाक्षुषस्ते गतास्तु षट् ।।३६।।

(घ) १. मनुभिश्चैव for (मुनुभिश्चैव) २. ।।२५।। for (।।२४।।)

३. + परमायुः शतं तस्य तयाहोरात्रसंख्यया ।
दैनदिनसुसृष्ट्यर्थमनिरुद्धार्कजो विधिः ।।२७।। +

४. ।।२८।। for (।।२७।।) ५. ।।२९।। for (।।२८।।)

६. ।।३०।। for (।।२९।।) ७. ।।३३।। for (।।३।।)

Indira Gandhi National Centre for the Arts

वैवस्वतो मनुश्चायं सप्तमोस्त्यधुना किल ।
इत्थं कादेश्च मनवः षड् व्यतायुगानि[1] वै ॥३७॥
अमितानि तथा चांघ्रित्रयं तद्वत्कलेर्गताः ।
नन्दांद्रींदुगुणाः ३१७६ सौराश्चाब्दास्त्वित्थं शकानने ॥३८॥
ससंधिसर्वयोगे स्युः सौराब्दाविधिवत्कृतः[2] ।
गोद्रीन्द्वचडचब्धि नन्दाश्विशैलनन्देन्दु १६७२९४७१७६ संमिताः ॥३६॥
शकाब्दसहितास्ते तु वर्षारम्भे गताः समाः
खत्रयाब्ध्यतु खात्यष्टि १७०६४००० हीनाः सृष्टयादितो गताः ॥४०॥
यतः सर्वग्रहादीनां सृष्टयादौ संयुतिः किल ।
मेषादौ मुनिभिः प्रोक्ता दिनादौ ब्राह्मणेन हि ॥४१॥
अनाद्यनंतकालेस्मिन् भचक्रं प्रवहभ्रमात् ।
शश्वद्भ्रमणसंयुक्तं प्रत्यक् चलति वायुना ॥४२॥
तदल्पगत्येन्द्रदिशं प्रचलन्ति नभश्चराः
महद्गतौ स्वल्पगतेर्भानं लोके न जायते ॥४३॥
तस्मात्पूर्वोदयश्चारतः प्रतीच्यां दृश्यते बुधैः[3] ।
पूर्वक्रमाद् ग्रहर्क्षाणां भोगं कुर्वन्ति खेचराः ॥४४॥
चन्द्रादयस्ततः पूर्वैः प्राग्गतिः परिकल्पिता ।
पादोनगाक्षधृतिभू ११८५८।४५। योजनैः सा समा मता ॥४५॥
लंकानिशीशे दिननाथवारे चैत्रे सितादौ ग्रहपातपूर्वं ।
ऋणायनादौ समयानुरोधान्मेषाश्विवक्त्रे प्रथमं बभूव ॥४६॥
सृष्टयादेः सृष्टिकल्पांतं भगणाः पूर्वयायिनां ।
रव्यादीनां निरग्रान्स्तान्प्रवदाम्यर्कशास्त्रतः ॥४७॥
कल्पेर्कशुक्रेंदुजपर्यया मता कोटिघ्ननेत्राग्निकृता ४३२०००००० स्त एव ।
प्रोक्ताः कुजार्कीज्यचलोच्चकानां भ्रमास्तु सूर्यादिमहर्षितन्त्रे ॥४८॥

(घ) १. व्यतता for (व्यता) २. वक्त्रतः: for (वत्कृतः)
३. जनैः for (बुधैः)

षड्वह्निदेवेषु नगाद्रि पंच प्रोक्ताः सहस्रेण हता[1] कुजस्य ।
५७७५३३६००० दन्ताष्टयद्[3]गोयमवाहवः[2] स्युः कल्पे सहस्रेण हताः कुजस्य ॥४९॥
२२९६८३२००० रस्राभ्रसप्ताग्नि नवाद्रिभूमयो,
युता हता १७९३७०६०००० श्चांद्रिचलोच्चपर्ययाः ।
द्विबाहुवेदर्त्तु गुणा ३६४२२०००० गुरोस्तथा,
युता हताः कल्पभवाश्च पर्ययाः ॥५०॥
खषट्कसप्तागि यम द्विस्वाश्वाः[4] शताहताः,
७०२२३७६ ००० शुक्र चलोच्चजाताः ।
खभ्राष्टषट्वं चरसा युगेंदवो दशाहताः १४६५६८००० सूर्यसूतस्य पर्ययाः ।५१।
गनाष्टरामा ३८७ मृदुतुंगपर्यया रवेश्च कल्पे शशिनोथ तुंगजाः ।
खराशून्या खिगजाष्टवेदाः[5] ४८८२०३००० शताहताः श्रीरविणा प्रयुक्ताः ।५२।
वेदाभ्रदस्राश्च २०४ गजर्त्तु रामाः ३६८
ख शून्यरंध्राणि ९०० शराग्नि पंच ५३५ ।
नन्दाग्नयः ३९ कल्पमृदूच्चपर्यया कौजादिकानां रविणा निरूक्ताः ॥३५॥
चन्द्रस्य पातभगणाः खखखाष्टरामद्वि,
द्वयग्निनोचनमिता २३२२३८००० स्तु कुजस्य कल्पे ।
शक्राश्विनो २१४ थशशिजस्य गजाष्टवेदा
४८८ जीवस्य वेद नगचन्द्र १७४ मिता विलोमाः ॥५४॥
रामाभ्रनन्दा २०३ भृगुजस्य सौरेस्तथा द्विषट्कर्म[6] ६६२ मितास्तु कल्पे ।
मानानि सौरेंदव सावमानि ब्रुवे तथार्क्षं रवितन्त्ररीत्या ॥५५॥
सूर्योदय द्वितयमध्यगतो हि कालस्तत्सूर्य सावनदिनं कुदिनं च तत्स्यात् ।
अष्टाश्विनागघनगोद्रिनगेषु चन्द्र १५७७९१७८२८
स्तुल्या भवन्ति धरणी दिवसास्तु कल्पे ॥५६॥

(घ) १. हताः for (हता) २. ५७७५३३३६००० for (५७७५३३६०००)
३. षड्गो for (यद्गो) ४. स्वाश्वाः for (स्वाश्वाः)
५. शून्याश्विगजाष्ठ for (शून्याखिगजाष्ट)
६. द्विषट्क for (द्विषट्कर्म)

भानांग गजवाजि गुणाश्विदस्रा नागेषुरूपकमिता दिवसा
१५८२२३७८२८ विधोस्तु ।
खाष्टौ खरवाभ्र खगुणाभ्रनृपाः १६०३०००८० रवेश्च मासाः
खखाभ्रखयुगाष्ट कुपंच तुल्याः ५१८४०००० ॥५७॥
अथाधिमासा रसरामदेव गोपं च चन्द्रप्रमिता १५९३३३६ स्तु कल्पे ।
तिथिक्षया बाहुशराश्विदस्रनागाभ्रतत्वैश्च २५०८२२ भवन्ति तुल्याः ॥५५॥
भानांभ्रमा यद्गुगणैर्विवर्जिताः प्रजायते तद्ग्रहसावनौघः ।
तथा रवींद्वोर्भगणांतरं यद्भवे द्विधोर्मास समुच्चयो वा ॥५९॥
सूर्यमासरहिताः शशिमासाः संभवेदधिकमाससमूहः ।
सावनानि रहितानि च चांद्रैर्जायते वमदिवासमुदायः ॥६०॥

इति भगणाध्यायः ।

अथाहर्गणानयनम्—

सृष्टेर्गतो वर्षगणो रविघ्नश्चैत्रादिमासैः सहितो गतैश्च ।
खरामनिघ्नास्तिथिभिर्विमिश्रः पृथक्तनश्चाधिकमासनिघ्नात् ॥६१॥
आदित्यमासैर्विहृतात्प्रलब्धगताधिकैः खाग्नि हतैस्तु युक्तः ।
चान्द्रो गणोऽस्मात्पठितावमघ्नाच्चांद्रैर्हृताल्लब्धगतावमैश्च ॥६२॥
विवर्जितः सावनवासरौघः सृष्ट्यादितः स्यात्पुरि रावणस्य ।
निशीथके सिद्धदिनार्द्धके वानगावशेषो रवितो दिनेशः ॥६३॥
अथाधिशेषावमशेषकाभ्यां ग्राह्यं फलं नैव यतस्त्वमांतात् ।
संक्रांतिकालावधिकाधिशेषं तिथ्यतर व्यूदययोः परं च ॥६४॥
स्फुटोधिको न लभ्यतेनुपाततश्च लभ्यते ।
इतोन्यथाधिका यदा तदा गताधिमासकात् ॥६५॥
अरूपकात्[2]सरूपान्विधाय साधयेद्[3] गणं ।
अथा वमाधिशेषके त्यजेत निः प्रयोजने ॥६६॥

(घ) १. भानांगजाक्षिगजवाजि for (भानांगगजवाजि)
२. सरूपकान् for (सरूपान्)   ३. साधयेद्गुणं for (साधयेद्गणं)

Indira Gandhi National Centre for the Arts

अहर्गणः स्वैर्भगणैं विनिघ्नः क्वहैर्हृतः स्याद् भगणादिको ग्रहः ।
मध्याह्नके सिद्धपुरस्य मध्यः सूर्योदये वा यमकोटिपुर्यां ॥६७॥
सप्ततष्टे गणे चैव वारो यदि न लभ्यते ।
गणं सैकं निरेकं च कृत्वा संसाधयेद् ग्रहात् ॥६८॥
गोक्षास्तथाष्टौ ५९।८ तरणेर्गतिः छून्यांकसप्तेषु गुणाविधोश्च ७९०।३५ ।
चन्द्रोच्चभुक्तिऋतवः कुवेदा ६।४१ रामाः शिवा ३।११ राहुगतिर्विलोमा ॥६९॥
कुवह्नयः षडयमलाः ३१।२६ कुजस्य ज्ञोच्चस्य वै पंचजि नारदाश्च २४५।३२
गुरोः शरा ५ भार्गवतुंगभुक्तिःषडंकलिप्ताश्च गजा ९६।८ शनेर्द्वे २ ॥७०॥
कल्पोक्तसौरेन्दवसावनानि ग्रहस्य चक्राणि तथेतराणि ।
भक्तानि कल्पोद्भवसौरवर्षैः सौरैकवर्षप्रभवानि तानि ॥७१॥
गतेष्टवर्षैर्गुणितान्यभीष्टवर्षोद्भवानीह भवन्ति तानि ।
सप्तावशिष्टो द्युगणो दिनाद्यं तदग्रिमः स्याच्च समाधिनाथः ॥७२॥
वर्षादितो दिनगणं कृत्वा साध्या ग्रहास्ततः ।
वर्षारम्भध्रुवैर्युक्ताः स्वाभीष्टास्ते भवन्ति वै ॥७२॥
रविघ्ना गुरोः पर्यया वर्तमानैर्युता राशिभिः षष्ठितप्टावशिष्टाः ।
विपूर्वाजयाद्याश्च संवत्सराः स्युः रवेः संक्रमाच्चांद्रमासाश्च शुद्धाः ॥७४॥
संक्रांतिहीनोधिकमाससंज्ञश्चान्द्रो द्विसंक्रांति युतो वनाख्यः ।
यदा कदाचित्प्रभवेदवश्यं तद्वर्षमध्ये धिकमासयुग्मं ॥७५॥
वेदर्तुनागाभ्रगजाभ्र सूर्यनगाष्टचन्द्राः १८७१२०[1]८६४०००० प्रयुता[2] हताश्च ।
भवेत्खकक्षा रविरश्मिचारस्तावन्मितोंतस्तमसावृत्तेंडे ॥७६॥
भक्ता ग्रहाणां भगणैः खकक्षा भवेत्स्वकक्षामितिरस्फुटेयं ।
ज्ञशुक्रयोस्तुंगभवा स्वकक्षा तत्रार्कगत्या भ्रमणं तयोश्च ॥७७॥
अथ ग्रहाणां भगणाऽऽश्रितानि वृत्तानि मध्यानि च तच्छ्रुतीश्च[3] ।
वक्ष्येर्कशास्त्रा छशिनः क्रमेण भानां ग्रहोर्ध्वस्थित कक्षिकां च ॥७८॥

(घ) १. १८७१२०८०८६४०००० for (१८७१२०८६४००००)
२. प्रत्युता for (प्रयुता)   ३. तद्ध्रुतीश्च for (तच्छ्रुतीश्च)

Indira Gandhi National Centre for the Arts

खखाभ्र वेदाश्विगुणा ३२४०००० हिमद्यु ते,
विदोंकशून्य द्विगुणाब्धिपंक्तयः ४३२०६ ।
भृगोर्नगाग्न्यंग युगर्त्तु षड्यमा २६६४६३७ रवेः खखप्राणशशी सुराऽब्धयः ।७९।।
कुजस्य गोभ्रांकरसेंद्रसिंधुरा ८१४६९०६, [1]द्युगांकसप्तेषु
नगाग्निभूशराः ५१३७५७६४ । गुरोः शनेरक्षशराश्विसिंधुरारसर्त्तु
सप्तार्कमिता १२७६६८२५५ च कक्षिका ।।८०।।
खखाभ्रशून्यां कगजांकतत्त्वैं २५९८९०००० मिता च पूर्वैः कथिताभकक्षा ।
अर्कस्य कक्षा खरसैर्विनिघ्नी यद्वा भकक्षाहि भवेत्समैव ।।८१।।
ऊर्ध्वस्थितस्य महती तदधः स्थितस्य कक्षाल्पिका भवति भागमितिस्तु तद्वत् ।
तेनाल्पमण्डलगतो भगणं हि शीघ्रं भुंक्ते महद्वृत्तिगतोतिचिरेण खेटः ।८२।
बिधोर्मध्यकर्णौ कवस्रार्कबाणा ५१२२९,
बुधस्येषुवेदांक वेदर्त्तु चन्द्राः १६४९४५ ।
कवेर्भू पुरा मेंदुदस्राब्धयः स्या ४२१३१६,
द्रवेः खाद्रिसर्पाऽब्धिनागर्त्तवश्च ६८४८७० ।।८३।।
कुजस्यांकरामेंदुनागाष्टसूर्या १२८८१३९,
[2]गुरोऽस्वर्गदन्तार्क नागप्रमाणाः ८१२३२२१ ।
शने रामसूर्यागधृत्यभ्रदस्रा २०१८६१२३,
भकर्णाः खखद्विद्विगोरवेंदुवेदाः ४१०९२२०० ।।८४।।
खखेष्वर्त्तवो ६५००० बिंबविष्कंभमानं,
खरांशोः शशांकस्य खाष्टाब्धयः ४८० स्यात् ।
कुजस्याब्धि पंचाद्रयस्त्र्यंशयुक्ता ७५४२०,
बुधस्येषु शक्रादशांशेन हीनाः १४४।५४ ।।८५।।
गुरोः पंचदंतद्विपा अंघ्रिहीना ८३२४।४५,
भृगोराम तानाभलिप्ता युताश्च ४९३।२७ ।
शनेर[3]ङ्गसप्त्यद्रिवेदेंदवश्च भवेत्तत्त्वलिप्ता युता [4]१४७७।२५ व्यासमानं ।।८६।।

(घ) १. युगांक for (द्युगांक)   २. गुरोः for (गुरोऽ)
३. सप्ताद्रि for (सप्त्यद्रि)   ४. १४७७६।२५ for (१४७७।२५)

भौमादिकानां किल बिंबमानं हिमांशुमध्य श्रवणेन निघ्नं ।
खमध्यकर्णेन हृतं यदाप्तं बिंबप्रमाणं हिमरश्मिगोले ॥८७॥
खवह्नयः पंच युगाश्च ४५ सार्द्धदस्रेषवः ५२।३० शून्यरसा निरुक्ता ।
सार्द्धाद्रिरामाश्च ३७।३० कुजादिकानां तिथ्युद्धृता बिंबकलाः स्वगोले ॥८८॥
त्रिज्या चलश्रवणयोगदलं श्रुतिः स्यात्स्पष्टतया विनिहिताद्युचरस्य कक्षा ।
त्रिज्योद्धृता च भवति स्फुटबिंबकक्षा तेनैव गच्छति यथाग्रहबिंबगोलः ॥८९॥
त्रिज्या गुणा बिंबकला स्फुटेन कर्णेन भक्ता स्फुटबिंबमानं ।
शाकल्यवाक्यादथदृक् प्रतीतेर्ग्राह्यं त्विदं नान्यसमीरितं वै ॥९०॥
अथ ग्रहाणां शशि पूर्वकाणां नीचोच्चकर्णान्परमान्ब्रवीमि ।
श्री सूर्यतन्त्रात्किल योजनाद्यास्तथैव शीघ्रांत्यफलज्यकाश्च ॥९१॥
चन्द्रस्य नीचश्रवणः शराभ्रनगांगवेदा रसदस्रलिप्ताः ४६७०५।२६ ।
ज्ञस्येषु शून्याद्रियुगत्रिचन्द्रारूपार्कभागेन युता श्रुतिः स्यात् ॥९२॥
युगघनांकरसाश्विमितो भृगोर्नगकलासहितः २६९१७४।७ श्रवणोऽल्पकः ।
युगशराष्टगजा क्षरसा रवेर्भकलिकासहितः ६५८८५४।२७ परमाल्पकः ॥९३॥
द्व्यगाभ्ररामाद्रिगजाः ८७३०७२ कुजस्य,
गुरोर्नदांकाष्टदिगग्निसप्त ७३१०८९९ ।
दिगंशकोना रविजस्य सार्द्धं ववङ्यंगवेदांगनभोंकचन्द्राः १९०६४६७१।३० ॥९४॥
द्विपंच सप्तेषुशराः ७५२ शराष्ठकुसायकांकेंदु मितास्तथैव १९५१८५ ।
गजाक्षवेदाग्निनगेषवः ५७३४५८ स्यात्षडष्ट-
नागाभ्रकुपर्वताश्च ७१०८८६ ॥९५॥
अंगाभ्रदन्ताभ्रघनाः २७०३२०६[1]
स्त्रिवेदपंचाक्षवह्न्यंकगजा ८९३५५४३ स्तथैव ।
वेदाश्वपंचाद्रिनभोग्निचन्द्रदस्रा २१३०७५७४ स्तु चन्द्रात्परमोच्चकर्णाः ॥९६॥
भौमस्य शीघ्रांत्यफलज्यका स्याद्वेदाग्निभूखाग्निगजा ८३०१३४ बुधस्य ।

(घ) १. १७०३२०६ for (२७०३२०६)

शून्याष्टवेदाभ्ररसागुरोस्तु ६०४८० वेदाब्धि,
षट्सिद्धनृपाः सपादाः १६२४६६४४।१५ ।।९७।।
भृगोर्युगाष्टा ऽऽश्विनृगाष्टवह्नयः ३०४२८४ शनेस्त्रिखांकाश्वियुगद्विबाहवः ।
६२४२९०३ रवेर्नृपाभ्रांगयमाः प्रकीर्तिता,
२६०१६ युगाब्धिबाणाब्धिमिता हिमद्युतेः ।।९८।।
रूपं भुवः कर्णमिति प्रकल्प्य तन्मानतो ये किल रोमकोक्ताः ।
नीचोच्चकर्णा अथ तान् ब्रवीमि बिंबार्द्धमानानि च तत्प्रमाणात् ।।९९।।
चन्द्रस्य नीचश्रवणस्त्रिरामाः शक्राश्च विश्वे ३३।१४।१३ पुनरुच्चकर्णः ।
त्रिषट् च वेदाग्नय अक्ष चन्द्रा ६३।३४।१५ ग्रातोच्च[1],
कर्णोश्वरसा नखाश्च ६७।२० ।।१००।।
बुधस्य नीचश्रवणोश्वतकयिप्ताश्विनः[2] सप्तकृताः ६७।२२।४७ प्रदिष्टाः ।।
भूपाश्विनोगोशशिनोंगरामा २१६।१९।३६,
स्तदुच्चकर्णः किल रोमकोक्तः ।।१०१।।
शुक्रस्य नीचश्रवणः प्रदिष्टो भूपाश्विनो वेदकृतानभोक्षाः २१६।४४।५० ।
दस्राक्षवेदेंदव अंक चन्द्र[3] १४५२।१९ स्तदुच्चकर्णः कथितः पुराणैः ।।२।।[4]
सूर्यस्य नीचश्रवणोंकपंचशक्रास्तथा वेदगुणाः खरामाः १४५९।३४।३० ।
तदुच्च कर्णोंगगजाक्षचन्द्रा गोबाहवः खांबुधयः प्रदिष्टाः १५८६।२९।४० ।।३।।[5]
भौमस्य नीचश्रवणोब्धिगोक्षचन्द्रास्तथादस्रशरागुणाश्च १५९४।५२।३ ।
तदुच्चकर्णो युगखांगरुद्रा द्वयं खशीतद्युतयः प्रदिष्टाः ११६०४।२।१०।१०।४० ।।[6]
गुरोस्तु ५१[7] नीचश्रवणो भवांगरुद्राः शराब्जाः,
खकृता ११६ ११।१५।४० स्तथैव ।
तदुच्चकर्णो ऽब्धियुगाष्टनाग चन्द्रा खरामाः,
प्रकृतिः १८८४४।३०।२१ प्रदिष्टा ।।१०५।।

(घ) १. पातोच्चकर्णो for (ग्रातोच्चकर्णो)   २. माश्विनः for (प्ताश्विनः)
३. चन्द्रा for (चन्द्र)   ४. ।।१०२।। for (।।२।।)
५. ।।१०३।। for (।।३।।)   ६. ।।१०४।। for (।१०।४०।।)
७. '५१' लुप्त

Indira Gandhi National Centre for the Arts

शनेस्तु नीचश्रवणोक्षयं च गजाष्टचन्द्राः शरवाण्यवश्च १८८५५।५५ ।
तत्तु ंगजो द्विद्विगुणांगदस्रा नागेषवः ।
पंचगुणाः प्रदिष्टाः २६३२२।५८।३५ ॥१०६॥
भनीचकर्णोष्टरदांगदस्रा अष्टाग्नयोगो निगमाः २६३२८।३६।४६ प्रदिष्टाः ।
तत्तु ंगजः खाब्धि गुणांगदस्राः पंचाब्धयः सप्त,
कृताः २६३००।४५।४७ प्रदिष्टाः ॥१०७॥
एते ग्रहाणां कथितोच्चकर्णास्तथैव नीचाभिधकर्णकाश्च ।
बिंबार्द्धमानेन युतो नितास्ते परोच्चनीचश्रवणा भवन्ति ॥८॥
खं सप्तचन्द्रामनवो ०।१७।१४ हिमांशोर्व्यासार्द्ध मानं किल रोमकोक्तं ।
खंदस्रकौ वेदगुणा ०।२।३४ बुधस्य खमाकृतिः,
सप्तगुणाः ०।२२।३७ सितस्य ॥६॥
खेरसाः पक्षशराः शराक्षा ६।५२।५५ भूर्गोश्विनः पिंडमिताः कुजस्य १।२६।२८ ।
गुरोः शरा वेदकृता द्वयं च ५।४४।२ शनेः शराः,
खांबुधयो युगाब्जाः ५।४०।१४ ॥१०॥
खशून्यखांगप्रमितैश्च योजनैर्भू गोलमानं कथितं तु रोमके ।
खभूमिगोचन्द्रमितं तु तस्य व्यासप्रमाणं गणितोपयुक्तं ॥११॥
खखांगचन्द्रप्रमितैश्च योजनैर्भू व्यासमानं गदितं पुराणैः ।
दशाहता तत्कृतितः पदं स्याद् भूवृत्तमानं किल स प्रमाणं ॥१२॥
लंबज्यकाघ्नं त्रिभजीवयाप्तं भवेत्स्वदेशे परिधिश्च तेन ।
देशान्तरघ्नीखचरस्य भुक्तिर्विभाजिता यत्कलिकादिलब्धं ॥१३॥
देशांतराख्यं स्वमृणं ग्रहे स्याद्रेखा प्रदेशात्परपूर्वभागे ।

(च) १. पंच for (यंच) — २. ३८।४६ for (३६।४६)
३. १०८ for (८) — ४. १०६ for (६)
५, ११० for (१०) — ६. १११ for (११)
७. ११२ for (१२) — ८. ११३ for (१३)

रक्षोनिवासात्किल मेरुलग्नं सूत्रं भवेन्मध्यमरेखिका सा ।।१४।।[1]

उन्मीलनाच्च शशिनो गणिताद्यदि प्राग्दृत्तुल्यता स्वनिलयं भवति प्रतीच्यां ।

प्राच्यामतीत्य गणितागतमेवमत्र सम्मीलनादपि तदंतरनाडिका स्युः ।।१५।।[2]

ताभिर्हतः स्वपरिधिः स्वरसैर्विभक्तो देशांतरं भवति तत्किल योजनाद्यं ।

वारप्रवृत्तिरधिके भवति क्षपार्द्धे प्राक्न्यूनकेत्वपरकेंतरनाडिकाभिः ।।१६।।[3]

मेषाग्निरक्षोदयजासवो ये स्फुटार्कतो मध्यरवेः कलाश्च ।

तदन्तरघ्नी द्युनिशा सुभक्ता गतिर्यदाप्तं कलिकादिकं च ।।१७।।[4]

कलागणात्प्राणगणेधिकोने ऋणं धनं दोरुदयांतराख्यं ।

तत्संकृतो मध्यखगो निरक्षे स्याद् गर्भभूजे स्फुटभास्करे हि ।।१८।।[5]

अथ गोलबन्धप्रकारमाह—

अथ गोलं प्रवक्ष्यामि दृष्टांताहं सुवृत्तजं ।

यस्य विज्ञानतो वेत्ति सम्यग्गणिवासनां ।।१९।।[6]

ताम्रवंशादि वृत्तैश्च खगोलं स्वीयदेशजं ।

बध्वा स्थिरं तदन्तस्तु भंगोलं कारये स्थिरं ।।२०।।[7]

पूर्वापरं च याम्योदक्कोणकद्वितयं तथा ।

एतद्योगौ निजोर्ध्वाधः संस्थितौ स्वस्तिकाभिधौ ।।२१।।[8]

स्वस्तिकाद्यन्नवत्यंशैर्वृत्तं स्वक्षितिजं भवेत् ।

तद्याम्य सौम्ययोगौ हि गदितौ समसंज्ञकौ ।।२२।।[9]

ध्रुवचिह्नं ततोक्षांशैरूर्ध्वं सौम्येत्वपागधः ।

तच्चिह्नकीलकप्रोतौ कार्यौ स्वाधारसंस्थितौ ।।२३।।[10]

(घ) १. ११४ for (१४) २. ११५ for (१५)
३. ११६ for (१६) ४. ११७ for (१७)
५. ११८ for (१८) ६. + ।।११९।। +
७. १२० for (२०) ८. १२१ for (२१)
९. १२२ for (२२) १०. १२३ for (२३)

Indira Gandhi National Centre for the Arts

एवं दृढं खगोलं तु कृत्वा याम्योत्तरे ध्रुवात् ।
परापमांशैश्च भवेत्तथा चिह्नं कदम्बयोः ।।२४।।[1]
ध्रुवकीला[2] उभौ देयौ वृत्तांतर्निःसृतौ दृढौ ।
तयोः प्रोतं भगोलस्य याम्योदगयनाभिधं ।।२५।।[3]
तत्कीलकेन्द्रात्खांकैस्तु वृत्तं तद्विषुवाभिधं ।
ततोद्यु रात्रवृत्तानि कुर्यात् द्युज्यांशकैर्बुधः ।।२६।।[4]
कदम्बकीलकप्रोत्तं गोलेंतः शरवृत्तकं ।
क्रात्यर्थं ध्रुववृत्तं च ध्रुवकीलगतं बहिः ।।२७।।[5]
अयनस्य कदम्बात्तु यद्वृत्तं खांकभागकैः ।
क्रांतिवृत्तं तदेव स्यादपमाभिधमण्डलं ।।२८।।[6]
गोलसंधीतु संपातौ विषुवत्क्रांतिवृत्तयोः ।
चलांशगत्या चलितौ प्राक्पश्चाद् भवतस्तदा ।।२९।।[7]
कदम्बभ्रमवृत्तं च भगोलध्रुवचिह्नतः ।
कुर्यात्परापमांशैश्च गोलतत्त्वविशारदः ।।३०।।[8]
भवृत्तेऽकं[9] विभागाश्च कृत्वा द्वादशराशयः ।
अंकनीयास्तथा भानि समभागानि च क्रमात् ।३१।।[10]

इति गोलवेधः[11] ।

अयनक्रान्ति वृत्तं च कदम्बद्वयमेव च ।

(घ) १. १२४ for (२४) २. कीलावुभौ for (कीला उभौ)
३. १२५ for (२५) ४. १२६ for (२६)
५. १२७ for (२७) ६. १२८ for (२८)
७. १२९ for (२९) ८. १३० for (३०)
९. ऽकं for (ऽक) १०. १३१ for (३१)
११. गोलवन्धः for (गोलवेधः)

Indira Gandhi National Centre for the Arts

याम्योत्तरं च विज्ञेयं वेधार्थं वृत्तपंचकं[2]।

अथैषां क्रमेण टीका[3]—

अथ ब्राह्मं दिव्यं तथा पित्र्यमित्यादि आयुषोर्द्धं गतमित्यंतं श्लोकाः सुगमाः। ततः षण्मनवः स्वारोचिषादयो गताः। वर्त्तमानस्य वैवस्वतमनोः सप्तविंशतियुगानि यातानि। वर्त्तमानस्याष्टाविंशतितमयुगस्य कृतत्रेताद्वापरयुगात्मकमंघ्रित्रयं। शालिवाहनशकादौ कलेर्गतवर्षाणि नंदाद्रीन्दुगुण ३१७९ मितानि। एषां योगः षण्मनूनां सप्तसंधिवर्षैः सप्तगुणितकृतवर्षसमैर्युतः। जातः शकादौ वर्षगणः ।।१९७२९४७१८९ अयमेतैः सृष्टिवर्षैः १७०६४००० हीनः ज्ञातो[3] युतिकालाच्छकादिपर्यंतं वर्षगणः १९५५८८३१८९ यतः ब्रह्मदिनादारभ्य एतैः सृष्टिवर्षैः सर्वग्रहपातमंदोच्चादीनां मेषादौ योगो जातः।

अथ च भचक्रं षष्टिघटीभिः प्रत्यग्गत्या एकं परिवर्तं करोति। ग्रहास्तु तदल्पगत्या स्वस्वगत्या प्राक्चलंति। अतो भूपृष्ठस्थानां पूर्वोदयः पश्चिमास्तश्च प्रत्यहं भवति। ग्रहाणां कक्षाभेदेन कलागतिस्तु भिन्ना भिन्नास्ति। योजनगतिस्तु सर्वेषां पादोनगोक्षधृतिभूमिता सर्वेषां समास्ति। कस्मिन्काले सर्वेषां युतिर्जाता इत्यपेक्षायामाह—लंकानिशीथेति। लंकार्द्धरात्रे चैत्रसितप्रतिपदि ऋणायनादौ ग्रहमंदोच्चपातादीनां मेषादौ योगो जातः। पुनस्तादृशो योगो येन कालेन भवति स कालः कल्पसंज्ञः। तद्वर्षाणि कोटिगुणिताः रदाब्धयः भवंति। तस्मिन्काले ग्रहाणां मंदोच्चादीनां च कियंतो भगणा भवंतीत्यपेक्षायामाह। कल्पेऽर्कशुक्रेंदुजेत्यादिभिरेकादशश्लोकैः। एते श्लोकाः सुगमार्थाः। अत्रोपपत्तिस्तु–एतावति काले एतावत्प्रमाणा भगणा भवंतीत्यागमप्रामाण्येनैव। अत्र भास्कराचार्यैः स्फुटग्रहं मध्यखगं प्रकल्प्येत्यादिनोपपत्तिरुक्तास्ति, तन्मंदजनप्रतारण मात्रमेव। यतस्तेन मंदोच्चं परममंदफलं परमशीघ्रफलं चागमप्रामाण्येनैव गृहीतं। अर्द्धजरतीयन्यायः समोचीनो न भवति। अत्रास्माभिः परममंदफ-

(घ) १-२ 'वृत्त – टीका' स्याही पोत कर मिटाया हुआ।

३. जातो for (ज्ञातो)

Indira Gandhi National Centre for the Arts

लानि परमशीघ्रफलानि मंदोच्चानि मध्यमाश्च वेधेनैव निष्कासिताः स्तदग्रे वक्ष्यामः।

अथ कल्पे सावनान् भभ्रमान् चांद्रदिवसान् रविमासान् चाधिमासानवमदिवसांश्च सूर्योदयद्वितयमध्येत्यादि श्लोकैराह—एते श्लोकाः सुगमार्थाः। भानांसभ्रमेति भानां भ्रमाः यद्भगणैर्विवर्जितास्तस्य कुदिनानि भवंति। रवींदुभगणांतरं चंद्रमासा। सूर्यमासशशिमासांतरं अधिमासा भवंति। सावनचान्द्रदिनांतरं अवमदिनानि भवंति।

इति भगणाध्यायः।

अथाहर्गणानयनमाह—सृष्टेर्गतो वर्षगण इत्यादिना। सृष्टेर्गतो वर्षगणः द्वादशगुणितश्चैत्रादिगतमासैर्युतः कार्यः। पुनस्त्रिशन्निघ्नो गततिथियुतश्च कार्यः। पुनर्द्विधा स्थाप्यः। ततोस्मादधिमासगुणिता द्रविमासभक्ताल्लब्धाधिमैस्त्रिशद्गुणितैः पृथक्स्थो युक्तः कार्यः। अयं चांद्रदिनगणो भवति। अयमपि पृथक् स्थाप्यः। अस्मात्कल्पावमगुणितात्कल्पचांद्रभक्ताल्लब्धावमैः पृथक्स्थो रहितः कार्यः सलंका निशीथे ऽहर्गणो भवति। अयं सप्ततष्टः शेषं रवेर्वारः गतः स्यात्। अत्रोपपत्तिः—गतवर्षगणो रविगुणितो इष्टवर्षादौ गतरविमासगणो भवति। चैत्रादिचांद्रगतमासतुल्यै रविमासैरयं युक्तश्चेद्गतसंक्रान्तिपर्यंतं रविमासगणो भवति। अयं त्रिशद्गुणितः गतसंक्रान्तिकालीनः सौरदिनगणो भवति। तस्य चांद्रदिनीकरणार्थमधिमासानयनं कार्यं। तद्यथा। कल्पसौरैः कल्पाधिमासा लभ्यंते तदेष्टसौरैः किमिति अनुपातेन लब्धकेवलाधिमासैस्त्रिशद्गुणितैर्युक्तः सौरगणः अमांते चांद्रगणो भवति। कुतः। अमांतसंक्रान्तिकालपर्यंतं अधिमासशेषं भवति। सावयवाधिमासास्त्रिशद्गुणितास्तत्र सौराहर्गणे योज्यंते, तदा संक्रान्तिकालीनश्चांद्राहर्गणो भवति। गणितसौकर्यार्थमपेक्षितो मांतकालीनो तोलाद्यवार्थं निरवयवा एवाधिमास्त्रिशद्गुणिताः सौरदिनेषु योजिताः। पुनस्तत्रगततिथयो योज्या इदं युक्तमेव। अयं चांद्रगण इष्टतिथ्यंते भवति। ननु पूर्वमेव गततिथयो योजितास्तेन किंचिदधिमासशेषेन्तरं पतिष्यति सत्यं। अधिमासशेषस्य प्रयोजनाभावान्न किंचिदहर्गणेंतरं पतिष्यति।

(च) १. रविमासांश्च for (रविमासान् च)

Indira Gandhi National Centre for the Arts

अथ चांद्राहर्गणस्य सावनाहर्गणकरणार्थं अवमानयनं । तद्यथा—कल्पचांद्रैः कल्पावमानि लभ्यंते, तदेष्टचान्द्रैः किमिति लब्धावमदिनै रहितश्चांद्रोगणः लंकार्द्धरात्रेऽहर्गणो भवति, यमकोटिसूर्योदये च । अत्राप्यवमशेषं त्यक्तं । यतस्तिथ्यंतसूर्योदयमध्ये सदैवावमशेषं भवति[1]। अपेक्षितस्तु रव्युदये तो ऽवमशेषं त्यक्तं ।

अथाधिमासावमशेषाभ्यां फं कुतो न गृहीतं इत्याशंकायामाह । संक्रान्ति कालेति—सुगमं गतार्थं च । तदुक्तं भास्कराचार्यैः । वर्षावधेः संक्रमकालतः प्राक्सदैव तिष्ठत्यधिमासशेषं । तिथ्यंतसूर्योदय ययोस्तु मध्ये सदैव तिष्ठत्यवमावशेषमिति ।

अथ किंचिदुच्यते । स्फुटोधिक इति—यदा स्पष्टाधिमासो न लब्धः गणितेन लब्धः तदा निरेकानधिमासान् कृत्वाहर्गणं साधयेत् । स्पष्टाधिमासो लब्धः गणितागतो न लब्धः तदा सैकानधिमासान्कृत्वा ऽहर्गणं साधयेत् । सप्ततष्टे गणे चेद्वारो नायाति तदा सैकं निरेकं वागणं कृत्वा ग्रहान्साधयेत् ।

अथ मध्यमानयनमाह । अहर्गणः स्वैर्भगणैरिति—अहर्गणः स्वैः स्वैः कल्पभगणैर्गुणितः कल्पकुदिनैर्भक्तः भगणादिको मध्यमग्रहः स्यात् । अयं लंकानिशीथे यमकोटिसूर्योदये सिद्धपुरमध्याह्ने मध्यमो भवति । अत्रोपपत्तिस्त्रैराशिकेन । कल्पकुदिनैः कल्पस्वस्वभगणा लभ्यंते । तदेष्टकुदिनैः किमिति । अत्र सर्वत्र त्रैराशिकं नाम निष्पत्तिः । कल्पकुदिनानां कल्पभगणानां च या निष्पत्तिरस्ति सैवेष्ट[2] भगणा अज्ञाताः सन्ति $\frac{\text{क० कुदि}}{\text{इ० कुदि}}$ $\frac{\text{क० भग}}{\text{इष्टभगणः}}$ । अत्र द्वितीयतृतीययोः कल्पभगणेष्टकुदिनयोर्घातः । प्रथमेन कल्पकुदिनैर्भक्तः चतुर्थमिष्टभगणा भवंति । एवं सर्वत्र त्रैराशिकोपपत्तिरूहनीया ।

अथ रव्यादीनां कलाद्यां गतिमाह । गोक्षास्तथाष्टावित्यादिना सुगमार्थाः ।

(घ) १. + सावयवावमशोधने तिथ्यंतेऽहर्गणो भवति +

२. + कुदिनानामिष्टभगणानां चास्ति, अत्रेष्ट +

Indira Gandhi National Centre for the Arts

अथ वर्षादौ ध्रुवकानाह—कल्पोक्तेत्यादिना । कल्पीयसौरदिनचांद्रदिनसावनदिनानि तथाधिमासावमदिनानि तथा ग्रहचक्राणि कल्पसौरवर्षैर्भक्तान्येकवर्षीयानि भवंति । एतान्यभीष्टवर्षैर्गुणितानि अभीष्टवर्षादौ भवंति। तत्र सावनदिनानि सप्ततष्टानि दिनादिको वाराद्यो ऽब्दपो भवति । यदि वर्षाऽऽरंभादहर्गणः कृतश्चेदब्दपाग्रिमवाराद् गणना कार्या ।

अथ वर्षा ऽऽ दितो ग्रहानयनमाह—वर्षादित इति । वर्षादितोभीष्टतिथिपर्यंततिथयो विगणय्य ग्राह्याः । यद्यधिमासश्चेत्तस्यापि तिथयो ग्राह्याः । ताः स्वचतुःषष्ठ्यंशहीना अहर्गणः स्यात् । अहर्गणः सप्ततष्टो ऽब्दपाग्रिमवाराद्वारः स्यात् । यदि वारो न मिलति तदा गणः सैको निरेको वा कार्याः[1] ।

अथाहर्गणेन स्वस्वगतिर्गुणनीया यद्राश्यादिकं भवेत्तद्वर्षारंभध्रुवैः युक्तं मध्यमग्रहो भवति ।

इति मध्यमग्रहानयनम् ।

अथ संवत्सरानयनमाह—रविघ्नेति । गुरोर्यातभगणाः द्वादशगुणाः षष्ठितष्टाः विजयाद्याः संवत्सरा भवंति । यतः सृष्ट्यादौ विजयसंवत्सर आसीत् । चांद्रसंवत्सरात्तु[2] कल्पादौ प्रमाथी आसीत् । कलियुगादावपि गुरुमानेनविजयसंवत्सरश्चांद्रमानेन प्रमाथी संवत्सर आसीत् । तस्मात् कलिगतवर्षाणि षष्ठितष्टानि प्रमाथीतो चांद्रसंवत्सरः स्यात् । सार्द्धाष्टषष्ठि[3]वर्षैर्गुरुसंवत्सरमानवमानसंवत्सरांतरं एकाधिकं भवति । यथा कलियुगादौ प्रमाथी संवत्सरः विजयसंवत्सरयोरंतरं चतुर्दशमितमासीत् । ततः सार्द्धाष्टषष्ठिवर्षैः पंचदशमितांतरं जातः । एवं च षष्ठिमितमंतरं भूत्वा पुनरेकाद्यमंतरं भवति । अधुना वर्त्तमानशके १६५३ मनुमानेन साधारणसंवत्सरोस्ति । गुरुमानेन दुर्मतिसंवत्सरः । अनयोरंतरं दशमितमस्ति । अग्रे एकादशमितं भविष्यति । इति सुबुद्धिभिर्ज्ञेयं । यस्मिन् चांद्रमासे रविसंक्रमो भवति स मासः शुद्धश्चैत्रादिसंज्ञो भवति ।

(घ) १. कार्यः for (कार्याः)   २. संवत्सरस्तु for (संवत्सरात्तु)
३. षष्टि for (षष्ठि)

Indira Gandhi National Centre for the Arts

अथाधिकमासावममासयोर्लक्षणमाह—संक्रांतिहीन इति संक्रान्तिद्वयं यस्मिन् भवति स न्यूनमाससंज्ञो भवति । अयं न्यूनमासस्तु कदाचिद्भवति तत्रापिकार्त्तिकादिमासचतुष्टय एव भवति नान्यत्र । तस्मिन्वर्षे ऽधिमासद्वयं भवति ।

अथ खकक्षामाह—वेदर्त्तुनागाभ्रेत्यादिना । सुगमार्थं । इयं स्वकक्षा[2] ग्रहाणां भगणैर्भक्तामध्यमास्व स्वकक्षा भवति[3] । तत्र तयोर्भ्रमणं रविगत्या भवति ।

अथ नक्षत्राणां ग्रहाणां च मध्यकक्षास्तच्छ्रुतीश्चंद्रात्कक्षाक्रमेणाह—खखाभ्रवेदाश्विगुणेति । सुगमार्थानि । पूर्वं चंद्रस्य ततो बुधस्य ततः शुक्रस्य ततो रवेः ततः कुजस्य ततो गुरोः ततः शनेः ततः सर्वोपरिष्टाद्भकक्षा । अथवार्ककक्षा षष्टिगुणिता भकक्षा भवति । ऊर्ध्वस्थितस्येति । ऊर्ध्वस्थितस्य ग्रहस्य महती कक्षा भवति । अधः स्थितस्य स्वल्पा भवति । तस्मान्महद्वृत्तस्थो ग्रहः भगणभोगं महता कालेन करोति । यथाशनिस्त्रिंशद्वर्षैर्भगणभोगं करोति । स्वल्पवृत्तस्थो ग्रहः स्वल्पेन कालेन भगणभोगं करोति । यथा चन्द्रो मासैकेन भगणभोगं करोति ।

अथ मध्यमकर्णानाह[4]—रवेर्मध्यकर्णोकदस्रेत्यादिना । श्लोकाः सुगमार्थाः ।

अथ सूर्याद्योजनात्मकानि बिंबान्याह । खखष्वर्त्तव इति । सुगमार्थं ।

अथ चन्द्रगोले भौमादिकानां बिंबानयनमाह—भौमादिकानां किलेति । चन्द्रगोले आनीतं भौमादिकानां बिंबमानं पंचदशभक्तं कलामानं भवति ।[5]

(घ) १. + संक्रान्तिहीनो मास अधिकसंज्ञो भवति +

२. ख for (स्व)

३. + ज्ञशुक्रयोस्तु शीघ्रोच्च कक्षैव कक्षा भवंति +

४. मध्यकर्णानाह for (मध्यमकर्णानाह)

५. +यतस्तत्र पंचदशयोजनैरेका कला भवति +

Indira Gandhi National Centre for the Arts

अथ स्पष्टकक्षानयनमाह—त्रिज्याचलश्रवणेति । त्रिज्याशीघ्रकर्ण योगार्द्धं स्पष्टकर्णो भवति । मध्यकक्षास्पष्टकर्णगुणा त्रिज्या भक्ताफलं स्पष्टकक्षा भवति । अन्यैराचार्यैः शीघ्रकर्णेनैव स्पष्टकक्षा आनीतास्ति सा समीचीना भवति । यतस्तत्र कक्षानां सांकर्यं भवति ।

अथ भौमादिकानां स्पष्टबिंबानयनमाह—त्रिज्यागुणा बिंबकर्णेति । बिंबकलास्त्रिज्यागुणाः स्पष्टकर्णभक्ताः स्फुटबिंबमानं भवति । तदुक्तं विष्णु धर्मोत्तरे शाकल्येन । त्रिचतुःकर्णयोगार्द्धं स्फुटकर्णोऽस्य मस्तके । ग्रहः संचरतीति ।

अथ चन्द्रादिग्रहाणां परमनीचोच्च कर्णानाह—चन्द्रस्य नीचश्रवण इत्यादिना । श्लोकाः सुगमार्थाः ।

अथ भौमादिकानां योजनात्मकाः शीघ्रांत्यफलज्यका आह–भौमस्य शीघ्रांत्यफलज्येत्यादिना । श्लोकाः सुगमार्थाः ।

अथ सूर्यचन्द्रयोर्योजनात्मके मांद्यांत्यफलज्ये आह—रवेर्नपाभ्रांगयमा इति । सुगमार्थं ।

अथ यवनाचार्यमतेन चन्द्रान्नीचोच्चकर्णानाह—रूपंभुव, इति । भूकर्णस्य रूपमितंमानं प्रकल्प्य तन्मानेन ये नीचोच्चकर्णा भवन्ति, तान्ततप्रमाणेन बिंबमानं च वदामि । चन्द्रस्य नीचश्रवणेत्यादिभिः । श्लोकाः सुगमार्थाः । [१]अत्र रविणा षोडशशत १६०० परिमितः भूव्यास उक्तस्तत्परिधिस्तु व्यासवर्गाद्दशगुणान्मूलं भूपरिधिः स्फुट इत्यनेन प्रकारेण स्थूलं भूपरिधिमानमुक्तं इदं तत्त्वविवेककारेण कमलाकरज्योतिर्विदा सूक्ष्मत्वेनांगीकृत्य सर्वत्र व्यासात्परिध्यानयने अयं प्रकारः स्वीकृतः स्वग्रन्थे उक्तमपि रूपमिते व्यासे दशमूलमितः परिधिरिति । अन्यच्च । व्यासे भनन्दाग्निहते विभक्ते खबाणसूर्यैः परिधिस्तु सूक्ष्म इत्यस्मिन् समीचीन सूक्ष्मप्रकारे भास्कराचार्योक्ते दूषणमपि दत्तम् । तदर्थं सम्राट् श्री

(घ) १-२ 'अत्र रविणा—सम्राट् श्री' लुप्त

Indira Gandhi National Centre for the Arts

राजाधिराजजयसिंहदेवैः सवाईजयपुरे स्वकृतयन्त्रशालायां शिल्पिभिः क्षेत्रज्ञैर्ज्योतिर्विद्भिश्च समेत्य निश्चयः कृतः। तेन व्यासे भनन्दाग्निहते विभक्ते खबाणसूर्यैः परिधिस्तु सूक्ष्म इत्ययं भास्कराचार्योक्तः प्रकारः समीचीनः।

इति सिद्धम्[2]।

अत्रोपपत्तिः—

सर्वकक्षाणां भूपरिध्युपयोगित्वादादौ भूपरिध्युपपत्तिरुच्यते। पुरीरक्षसां देवकन्याथकांचीसितः पर्वतः पर्यलीवत्सगुल्मं। पुरीचोज्जयिन्याह्वयागर्गराटं कुरुक्षेत्रमेरुभुवो मध्यरेखा। एतेष्वन्यतमे रेखानगरे याम्योत्तरभित्ति यन्त्रेण वेधेनाक्षांश निश्चयः कार्यः। पुनस्तत उत्तरतः पञ्चाशत्क्रोशाधिकान्तरे रेखानगरे एव तेनैव यन्त्रेणाऽक्षांश निश्चयः कार्यः। अनयोरन्तरं कार्यं। नगरान्तरयोजनानि भांशैर्गुण्यानि अक्षांशान्तरेण भाज्यानि फलं भूपरिधिर्भवति। पुनरस्मात्खबाणसूर्यैं १२५० र्हताद्भनन्दाग्नि ३९२७ भक्ताल्लब्धं भूव्यासो भवति। भूपरिधिस्तु यवनैः षट्सहस्रमितो निश्चितोस्ति।

अथ यवनैर्भूकर्णो योज[3]बाहुल्याद्रूपमितमेवमानं कल्पितं। तेन मानेन कक्षाः कर्णाश्चानेयाः। अत्र तु कक्षाणां प्रयोजना भावात्कर्णा एव लिखिताः। कक्षास्तु-तैरुपर्युपरिसंलग्ना एव कल्पिताः।

अथ पौर्णमास्यां याम्योत्तरभित्तियन्त्रेण याम्योत्तरवृत्तस्थस्य चन्द्रस्य वेधेन नतांशाः ग्राह्याः। पुनर्गणिते[4] च ग्राह्याः। अनयोरन्तरं दृग्लम्बनं भवति क्षेत्रं। अस्य ज्या कार्या। पुनर्वेधितनतांशज्यारूपगुणा दृग्लम्बनज्या भक्तालब्धं योजनात्मकः कर्णो भवति। पुनरयं परममन्दकर्णेन ६५।११ गुण्यः इष्टमन्दकर्णेन भाज्यः फलं परमोच्चकर्णो भवति। स चापं[5] ६३।३४।१५ पुनर्वेधसिद्धः कर्णः परमनीचकर्णेनानेन ३४।४ गुणितः वेधकालिकेष्टमन्दकर्णेन भक्तः फलं परमनीच-

(घ) १-२ 'भनन्दाग्नि—सिद्धम्' लुप्त
४. पुनर्गणितेन for (पुनर्गणिते)
३. योजन for (योज)
५. चापं for (चापं)

Indira Gandhi National Centre for the Arts

कर्णो भवति । एतदन्तरमिता चन्द्रकक्षायाः पृष्टताऽस्ति । चन्द्रपातोच्चकर्णस्तु । ६७।२० एतावन्मितोस्ति । अयं बुध बिंबार्द्धनानेन ०।२।३४ युतः ६७।२२।४४ अयं बुधस्य परमनीचकर्णो भवति । अयं परमोच्चकर्णगुणः परमनीचकर्णभक्तः योजनात्मकः परमोच्चकर्णो भवति । २२६।१९।३६ अयं शुक्रबिबार्द्धनानेन ०।२२। ३७ युतः २२६।४२।१३ किंचिदन्तरं कक्षयोरपेक्षितं । तेन किंचिदधिको लिखितः २२६।४४।५० अयं शुक्रनीचकर्णः । पुनरस्मादनुपातेन शुक्रोच्चकर्णः साध्यः[1]। पुनरयं प्रथमप्रमाणनक्षत्र बिंबार्द्धयुतो जातो भकर्णः तदेवमुपपन्नं यथोक्तं ।

अथ बिंबार्द्धमानान्याह—खंसप्तचन्द्रेत्यादिना । श्लोकाः सुगमार्थः[2] ।

अथ भूपरिधिमानमाह—खशून्यखांगेति । सुगमार्थं ।

अथ सौरोक्तं भूव्यासमाह—खरगांग चन्द्रेति । सुगमार्थं ।

अथ स्पष्ट भूपरिध्यानयने देशान्तरं चाह—लम्बज्यकाघ्नमिति । भूपरिधिमानं लम्बज्यया गुण्यं त्रिज्यया भाज्यं स्वदेशे स्पष्टं[3] परिधिर्भवति । ग्रहमुक्तिर्देशान्तरेण गुण्या स्पष्टपरिधिना भाज्या फलं कलात्मकं देशान्तरं भवति । तद्ग्रहे स्वं कार्यं स्वदेशे रेखा[4]प्रदेशात्पश्चिमस्थे सति । पूर्वस्थे ऋणं कार्यं ।

अथ रेखामाह—रक्षो निवासादिति । लङ्कातोमेरुगतं सूत्रं मध्यरेखा भवति ।

अथ स्वदेशः[5] पूर्वतो[6] वा पश्चिमतोस्तीति ज्ञानायोपायमाह—उन्मीलनाच्च-

(घ) १. + पुनरयं शुक्रोच्चकर्णः सूर्यबिंबार्द्धनानेन ६।५३ युतो जातः सूर्यनीचकर्णः पुनरनुपातेन सूर्योच्चकर्णः साध्यः । अयं भौमबिंबार्द्धेन युतो जातो भौमनीचकर्णः पुनरस्माद्भौमोच्चकर्णः साध्यः । अयं गुरुबिंबार्द्धयुतो जातो गुरुनीचकर्णः । पुनरस्माद्गुरुच्चकर्णः साध्यः । अयं शनिबिंबार्द्ध युतो जातः शनिनीचकर्णः । पुनरस्माच्छनेरुच्चकर्णः साध्यः ।+

२. सुगमार्था. for (सुगमार्थः) ३. स्पष्ट for (स्पष्टं)

४. रेप्रदेशात् for (रेखा प्रदेशात्) ५. स्वदेशेः for (स्वदेशः)

६. सूर्वतो for (पूर्वतो)

Indira Gandhi National Centre for the Arts

शशिन इति। यदा खग्रासो भवति तदा स्वदेशे देशान्तरफलदानं विना गुणितं[1] कृत्वोन्मीलनकालः साध्यः, यद्युन्मीलनं गणितागतकालात्पूर्वं भवति तदा स्वदेशे-रेखातः पश्चिमस्यामस्ति। यद्युन्मीलनं गणितागतकालानन्तरं भवति तदा रेखा-प्रदेशात्स्वदेशः पूर्वतोस्तीति ज्ञेयं। गणितागतकालदृक्कालयोरन्तरं घघाद्यं देशा-न्तरं भवति। इदं स्पष्टभूपरिधिना गुण्यं षष्ठया भाज्यं देशान्तरयोजनानि भवन्ति।

अथ वारप्रवृत्तिमाह—वारप्रवृत्तिरिति। प्राग्देशे स्वनिशार्द्धे देशान्तरपलै-र्न्यूने[2] वारप्रवृत्तिर्भवति। पश्चाद्देशे स्वनिशार्द्धे देशान्तरपलैरधिके वारप्रवृत्ति-र्भवति।

अथोदयान्तरभुजान्तरयोरानयनमाह—मेषाग्निरक्ष्वे[3] इति। स्पष्टार्कतो निरक्षासवो ग्राह्याः मध्यार्कस्य कला ग्राह्याः। अनयोरन्तरं ग्रहगत्या गुणनीयं अहोरात्रासुभिर्भाज्यं फलं कलाद्यं ग्रहे संस्कार्यं। यदि मध्यार्ककला असुभ्योधिका भवन्ति तदा ऋणं कार्यं न्यूनास्तदा धनं कार्यं। इत्युक्तप्रकारेण फलत्रयसंकृतो ग्रहः स्वक्षितिजे रविबिंबे सति भवति।

इति मध्यमाधिकारस्य टीका।

अथ गोलवंधमाह —

गोलवधं प्रदक्ष्यामीत्यादिभिश्चतुर्दश श्लोकैः। श्लोकास्तु सुगमार्थाः।

राजाधिराज प्रभुतोषणार्थे सम्राट् जगन्नाथ कृते सुशिल्पे।

सिद्धान्त संम्राजि महागभीरे मध्यक्रियाध्याय अगात्समाप्तिं॥

इति मध्यमाधिकारः सटीकः सोपपत्तिकः संपूर्णः।

अथ स्पष्टाधिकार आरभ्यते। तत्रादौ सर्वोपयोगित्वाद्राशित्रयस्य प्रत्यंश-जीवा कोष्ठका लिख्यन्ते॥ श्री ८।८।८॥

(घ) १. विनाग for (विनागु) २. पलन्यूने for (पलैन्यूने)

३. मेषान्निरक्षे for (मेषान्नरक्ष्वे)

Indira Gandhi National Centre for the Arts

१	२	३	४	५	६	७	८	९	१०
१	२	३	४	५	६	७	८	९	१०
२	५	८	११	१३	१६	१८	२१	२३	२५
४९	३८	२४	७	४५	१८	४३	१	९	८
४३	१७	३४	२३	३८	८	४६	२३	५०	०
१५	२९	०	५४	२६	५३	४१	२३	४०	२३
१	१	१	१	१	१	१	१	१	१
२	२	२	२	२	२	२	२	१	१
४९	४६	४३	३८	३३	२५	१८	८	५८	४८
११	१२	१३	१४	१५	१६	१७	१८	१९	२०
११	१२	१३	१४	१५	१६	१७	१८	१९	२०
२६	२८	२९	३०	३१	३२	३२	३२	३२	३१
५४	२८	४९	५५	४४	१७	३२	२७	२	१६
४४	५५	२५	७	५४	४०	७	४०	४३	२१
३५	३१	४०	४६	४९	८	१८	१५	१७	२३
१	१	१	१	१	१	०	०	०	०
१	१	१	०	०	०	५९	५९	५९	५८
३४	२१	६	४९	३३	१५	५५	३५	१४	४४
२१	२२	२३	२४	२५	२६	२७	२८	२९	३०
२१	२२	२३	२४	२५	२६	२७	२८	२९	३०
३०	२८	२६	२४	२१	१८	१४	१०	५	०
७	३५	२७	१५	२५	८	२१	५	१८	०
२८	१	५५	६	३२	१०	५६	५१	५२	०
३८	२७	२६	५४	४०	४	४३	२७	४१	०
०	०	०	०	०	०	०	०	०	
५८	५७	५७	५७	५६	५६	५५	५५	५४	
२८	५२	४८	१०	४३	१३	४४	१३	४२	
३१	३२	३३	३४	३५	३६	३७	३८	३९	४०
३०	३१	३२	३३	३४	३५	३६	३६	३७	३८
५४	४७	४०	३३	२४	१६	६	५६	४५	३४
८	४२	४२	५	५२	१	३२	२२	३३	२
१३	३३	१	४०	३०	३६	२	५२	१९	७
२७	४०	५४	२	३७	५२	४२	४३	१६	२५
०	०	०	०	०	०	०	०	०	०
५३	५३	५२	५१	५१	५०	४९	४९	४८	४६
३६	०	२३	४७	९	३१	५०	११	२९	४७

४१	४२	४३	४४	४५	४६	४७	४८	४९	५०
३९	४०	४०	४१	४२	४३	४३	४४	४५	४५
२१	८	५५	४०	२५	९	५२	३५	१६	५७
४८	५२	११	४६	३५	३७	५२	१८	५७	४५
४५	१२	३८	१२	३	२३	२३	१६	१६	३५
१	४०	४५	२९	५३	४९	५८	४६	१०	१८
०	०	०	०	०	०	०	०	०	०
४७	४६	४५	४४	४४	४३	४२	४१	४०	३९
४	१९	३५	४८	२	१५	३६	३९	४८	५८

५१	५२	५३	५४	५५	५६	५७	५८	५९	६०
४६	४७	४७	४८	४९	४९	५०	५०	५१	५१
३७	१६	५५	३५[१०]	८	४४	१९	५२	२५	५७
४३	५०	५	२७	४६	३२	१२	५८	४८	४७
३१	१९	१६	४०	५०	६	५०	२३	८	१९
४०	२२	१३	१५	३०	५६	३४	२०	१३	१४
०	०	०	०	०	०	०	०	०	
३९	३८	३७	३६	३५	३४	३३	३२	३१	
७	४५	२२	२९	३६	४०	४६	५०	५९	

६१	६२	६३	६४	६५	६६	६७	६८	६९	७०
५२	५२	५३	५३	५४	५४	५५	५५	५६	५६
२८	५८	२७	५१	२२	४०	१३	३७	०	२२
३७	३६	३७	३९	४२	४५	४९	५१	५३	५३
५१	४०	२४	३०	२८	४९	२	४२	२२	५६
२४	४८	३३	१०	५१	८	५४	४५	२०	२२
७१	७२	७३	७४	७५	७६	७७	७८	७९	८०
५६	५७	५७	५७	५७	५८	५८	५८	५८	५९
४३	३	२२	४०	४७	१३	२७	४१	५३	५

(घ) १. ३२ for (३५)

Indira Gandhi National Centre for the Arts

५२	४८	४१	३९	३९	३	४३	१९	५१	१८
•	१२	४९	३१	५८	४२	५२	५२	२८	२८
४४	२७	३८	३५	४३	३७	२	५४	५८	२९
८१	८२	८३	८४	८५	८६	८७	८८	८९	९०
५९	५९	५९	५९	५९	५९	५९	५९	५९	६०
१५	२४	३३	४०	४६	५१	५५	५७	५९	०
४०	५७	९	१६	१८	१३	३	४८	२७	०
४०	५४	५८	४३	३	५५	[1] ४६	[2] ७	[3] ७	[4] •
५४	०	८	४६	१७	५	७	५	४५	०

अथ ज्याकोष्ठकेभ्यो जीवानयनं —

ज्यकाभुजांशप्रमकोष्टकाधो पृथक् तदेष्यांतरकेन निघ्नं ।
कलादिकं षष्ठिविभाजितं च फलेन युक् सा भुजसिंजिनी स्यात् ॥१॥
ज्ञातज्यकायाः प्रविशोध्य जीवां शेषं विनिघ्नं खरसैर्हृतं च ।
या तैष्पजीवांतरकेन लब्धं विशुद्धजीवांकयुतं धनुः स्यात् ॥२॥

सुगमार्थे पद्ये

अथ मन्द परिधीनाह—

रवेर्मंदनीचोच्चवृत्तस्य भागाः पयोधींदवो रात्रिनाथस्य दन्ताः ३२ ।
शराश्वाः ७५ खरामाः ३० सुरा ३३ भास्करा १२ श्च,
नवांभोधयो ४९ युग्मकांते कुजादेः ॥३॥

सुगमार्थं ।

अयुग्मांत केखाश्विलिप्ता विहीनारवेः शीतरश्मेश्च पूर्वैर्निरूक्तः ।
गुणाश्वा ७३ गजाक्षा ५८ रदा ३२ भूर्भुव ११ श्च,
गजांभोधयो ४८ मंदभागाः कुजादेः ॥४॥

सुगमार्थं पद्यं ।

(घ) १. + ५८ +　　　२. + २ +
　　३. + ६ +　　　४. + • +

अथ शीघ्र परिधीनाह—

युग्मांतके शीघ्र परिध्यकांशा, अर्थाग्निदस्रा[1] गुणराम चन्द्राः १३३ ।
खांश्वा[2] द्विषड्लोचनसंमिताश्च[3], नन्दाग्नयः स्युः क्षितिजादिकानां ॥५॥

सुगमार्थं पद्यं ।

सू०	चं०	मं०	बु०	बृ०	शु०	श०	
१४ ०	३२ ०	७५ ०	३० ०	३३ ०	१२ ०	४६ ०	युग्मांते
१३ ४०	३१ ४०	७२ ०	२८ ०	३२ ०	११ ०	४८ ०	विषमांते
२ २०	५ २०	१२ ३०	५ ०	५ ३०	२ ०	८ १०	पु० अं० ज्या
२ १६ ४०	५ १६ ४०	१२ ० ०	४ ४० ०	५ २० ०	१ ५० ०	८ ० ०	ओ० अं० ज्या०

	मं०	बु	बृ	शु	श०
युग्मे	२३५	१३३	७०	२६२	३६
ओजे	२३२	१३२	७२	२६०	४०
[४] पु० अं० फलज्या	३६ १०	२२ १०	११ ४०	४३ ४०	६ ३०
[५] ओ० अं० ज्या	३८ ४०	२२ ०	१२ ०	४३ २०	६ ४०

(घ) १. + २३५ + (अर्थाग्नि) रेखांकित नीचे २३५

२. -- ७० + उपर्यंकित   ३. + २६२+उपर्यंकित

४. युग्मे अं क ज्या } for (पु० अं० फलज्या)

५. ओजे अं फलं ज्या } for (ओ० अं० ज्या)

अयुग्मकांते चल वृत्तभागा यमाग्निदस्रा[1] यमरामचंद्राः[2] ।
खाश्वाः[3] खषड्लोचनका २६० स्तथैव,
खांभोधयो ४० भूमिसुतात्प्रदिष्टाः ॥६॥
सुगमार्थं पद्यं ।

अथ मन्दशीघ्रपरिधि भागकोष्ठकाः[4]।

अथ रव्यादीनां मन्दोच्चान्याह—
द्वयं सप्तचंद्रा नृपाश्चंद्र बाणाभपूर्वं रवेर्मंदतुंगं प्रदिष्टं ।
कुजस्याब्धयो दिग् द्वयं दस्रदस्रौ तथाज्ञस्य सप्ताभ्रचन्द्राश्च पिंडाः ॥७॥
गुरोः पंच चन्द्राश्विनः स्वश्च तर्काभृगोर्द्वौ नवाब्जाः कुपंचत्रिदस्राः ।
शस्सप्ततर्काश्विनः सप्तरामाः खरामा अथो वच्मि पातान् कुजादेः ॥८॥
रूपं खचंद्राश्च गुणा द्विदस्रा भौमस्य पातः किल सांप्रतोयं ।
शून्यं नखा भूमिकृता बुधस्य द्वौ गोभुवः खांबुधयो गुरोश्च ॥९॥
शुक्रस्य भूर्गोनयनाः कुवेदाः शनेस्त्रयं शून्यभुवोक्षिदस्राः ।
ज्ञशुक्रयोः पातभवौ ध्रुवौ च स्वशीघ्रकेन्द्रेण युतौ स्फुटौ स्तः ॥१०॥
अथ रव्यदीनां मन्दोच्चानि भौमादीनां पाताश्च कोष्ठेषु लिख्यंते ।[5]

सू०	चं०	मं०	बु०	बृ०	शु०	श०
२		४	७	५	२	७
१७		१०	१०	२१	१९	२६
१६		२	२७	२१	५१	३७
५१		२२	४५	६	२३	३०

मं०	बु	बृ	शु	श
१	०	२	१	३
१०	२०	१९	१९	१०
३	४१	४०	४०	२१
२२	१९	१८	३३	३६

(घ) १. + २३२ + उपर्यंकित २. + १३२ +
३. + ७० +
४. यहां पर दी गई सारणी पिछले पृष्ठ ११९१ पर अंकित है ।
५. यहां पर दी गई सारणी इसी पृष्ठ ११९२ पर अंकित है ।

Indira Gandhi National Centre for the Arts

एते श्लोकाः प्रकटार्थाः—

अथ मन्दकेन्द्रचलकेन्द्रयोरानयनमाह—

मन्दतुरंगरहितः खचरः स्यान्मंदकेन्द्रमथ चंचलतुंगं ।
खेचरेण रहितं चलकेन्द्रं त्रित्रिभैः कृतपदानि च चक्रे ॥११॥
ओजयुग्ममिति तानि भवन्ति या तमोजचरणे च भुजः स्यात् ।
एष्यकं समपदे किल बाहुर्भत्रयं तदयुतं किलकोटिः ॥१२॥
जूकमेषवदने मृदुकेन्द्रे मांददोर्भवफलं धनमस्वं ।
शीघ्रजं फलमतो विपरीतं प्राक्तनैर्निगदितं निजतन्त्रे ॥१३॥

एतेषां पद्यानामर्थः ।

मन्दोच्चरहितो ग्रहः मन्दकेन्द्रं भवति ।

अथ शीघ्रोच्चं ग्रहेण रहितं शीघ्रकेन्द्रं भवति । केन्द्रस्य राशित्रयेण एकैकं पदं भवति । एवं चक्रे चत्वारि पदानि भवन्ति । ओजयुग्ममिति प्रथमं पदं विषमं द्वितीयं समं तृतीयं विषमं चतुर्थं समं एवमोजे चरणे प्रथमतृतीय-पदयोर्यातं भुजः स्यात् । द्वितीयचतुर्थपदयों एष्यं भुजः स्यात् । भुजरहितं त्रिभं कोटिर्भवति ।

अथ केन्द्रवशात्फलस्य धनर्णतामाह—जूकमेषवदने इति मन्दकेन्द्रे तुलादिके[1] सति मन्दफलं धनं भवति । मेषादिके[2] ऋणं भवति । शीघ्रकेन्द्रे मेषादिके शीघ्रफलं भवति । तुलादिके सति ऋणं भवति ।

अथ परिधिस्पष्टीकरणमाह—

ओजांतयुग्मांत परिध्यकांशविश्लेश[3]निघ्नी निजदोर्लवज्या ।
त्रिज्योद्धृता युग्मवृतावृणं स्वमोजाधिकोने परिधिः स्फुटः स्यात् ॥१४॥[4]

अस्यार्थः—ओज युग्मांतपरिध्यन्तरेण स्वभुजज्या गुण्या मन्दपरिध्यंतरं चेन्मन्द[5]दोर्ज्या ग्राह्या शीघ्रं परिध्यन्तरं चेच्छीघ्रकेन्द्रदोर्ज्या ग्राह्या, त्रिज्या भक्ता-फलं युग्मांत परिघौ ओजाधिके सति ऋणं कार्यं, ओजोनेधनं कार्यं परिधिः स्पष्टः स्यात् ।

(घ) १. + सति + २. + धनं +
३. विश्लेष for (विश्लेश) ४. ॥१४॥ for (१४)
५. + केन्द्र +

Indira Gandhi National Centre for the Arts

अथ स्पष्टपरिधेर्मांदांत्यफलज्याशीघ्रांत्यफलज्यानयनं ततो भुजफलकोटि फलानयनं चाह—

स्पष्टीकृतस्य परिधेः खलु षष्ठकांशः षष्टयामिते त्रिभगुत्यफलस्य जीवा।
स्पष्टतया[1] विनिहते भुजकोटिजीवे त्रिज्योद्धृते च भुजकोटिफले भवेतां ॥१५॥

अस्यार्थः—षष्ठिमितत्रिज्यायां स्पष्टपरिधेः षष्ठांशः अंत्यफलस्य जीवा स्पष्टा स्यात् तथा[2] गुणिते भुजकोटिजीवे त्रिज्याभक्ते भुजकोटिफले भवेतां।

अत्रोपपत्तिः—त्रैराशिकेन भांशपरिधौ षष्ठिमिता त्रिज्या[3] तदा मन्द-परिधिना वा शीघ्रपरिधिना किमिति अत्र षष्टया भांशानामपवर्त्त कृते सति हरस्थाने षड् भवन्ति। तदेवमुपपन्नं परिधिषष्ठांशोन्त्यफलज्या भवतीति पुनरनुपातः त्रिज्यया यद्यंत्यफलज्या लभ्यते तदेष्टया दोर्ज्यया इष्टकोटिज्यया च किमिति[4]।

अथ शीघ्रकर्णानयनमाह—

त्रिभज्यका कोटिफलज्ययोश्च, योगोंतरं नक्रकुलीरकेन्द्रे।
शीघ्रेथ तद्दोः फलवर्गयोगान्मूलं चलः स्याच्छ्रवणः फलार्थं ॥१६॥

अस्यार्थः—शीघ्रकेन्द्रे मकरादिगे सति त्रिज्याकोटिफलज्ययोर्योगः कार्यः, कर्कादिके सति ऋणं[5] कार्यं।

अथ योगवर्गस्य वांतरवर्गस्य भुजफल वर्गेण[6] योगः कार्यः, तस्मान्मूलं ग्राह्यं सफलार्थं शीघ्रकर्णः स्यात्।

(घ) १. स्पष्टा for (स्पष्ट)
२. तया for (तथा) ३. + लभ्यते +
४. + फलं इष्टभुजफलं इष्टकोटिफलं च भवति +
५. अन्तरं for (ऋणं) ६. वर्गेन for (वर्गेण)

Indira Gandhi National Centre for the Arts

अथ शीघ्रफलानयनमाह—

द्राग्दोः फलात्त्रिज्यकया विनिघ्नात्कर्णोद्धृताल्लब्धधनुर्लवाद्यं ।
शीघ्रं फलं स्यान्मृदुदोः फलस्य, चापं बुधैर्मंदफलं निरुक्तं ।।१७।।[1] [2]

अस्यार्थः—शीघ्रभुजफलात्त्रिज्या गुणात्कर्ण भक्ताल्लब्धफलस्य धनुर्लवाद्यं शीघ्रफलं स्यात्, मन्दभुजस्य चापं मन्दफलं स्यात् ।

अत्रोपपत्तिः—शीघ्रकर्णाग्रे भुजफलं[3] त्रिज्याग्रे किमिति फलस्य धनुः शीघ्रफलं भवतीत्युपपन्नं । अत्र मंदफलसाधनार्थं मन्दकर्णो रविणा स्वल्पांतरत्वान्नोक्तः, सोत्रावश्यमपेक्षितः । तं विना मध्ये शीघ्रफलस्यार्द्धमित्यस्योपपत्तिर्न सिध्यति ।

अथ[4] शीघ्रकर्णं विनैव फलानयनं—तद्यथा, स्पष्टकोटया भुजफलं लभ्यते । तदा त्रिज्यया किमिति फलस्य छायासु चापं शीघ्रफलं भवति[5] ।

अथ फलदानक्रममाह—

मध्ये चलार्द्धं किलमांदमर्द्धं दत्त्वा ततो मन्दफलं समस्तं ।
मध्यग्रहे तत्र फलं चलं च सर्वं प्रदेयं द्युचरः स्फुटः स्यात् ।।१८।।[6]

अस्यार्थः—आदौ मध्यग्रहे शीघ्रफलार्द्धं देयं, ततो मन्दफलार्द्धं शीघ्रफलार्द्धं संस्कृते देयं, एवं फलद्वयसंस्कृतान्मंदफलं समस्तं मध्यग्रहे देयं, तस्माच्छीघ्रफलं सम्पूर्णं मन्दस्पष्टे देयं, ग्रहः स्पष्टः स्यात् ।

अथ मन्दकर्णमंगीकृत्यार्द्धफलवासनोच्यते—अभीष्टत्रिज्यामितकर्कटेन कक्षावृत्तं कार्यं, तत्रोच्चनीचगा रेखा कार्या, तिर्यग्रेखा च कार्या, ऊर्ध्वरेखावृत्तसंपाते

---

१. ।।१७।। for (१७)
२. + अथ शीघ्रकर्णं विनैव फलानयनम्—तद्यथा स्पष्टकोटया भुजफलं लभ्यते तदा त्रिज्यया किमिति फलस्य छायासु चापं शीघ्रफलं भवति +
३. + तदा +
४-५. 'अथ—भवति' लुप्त (नोट—यह वाक्य इस प्रति में पहले आ चुका है—इसी पृष्ठ पर फुटनोट २ में अंकित है ।
६. ।।१८।। for (१८)

Indira Gandhi National Centre for the Arts

उच्चं अधः संपाते नीचं चांकनीयं, उच्चाद्वृत्ते मन्दकेन्द्रं दत्वा चिह्नं कार्यं, चिन्हान्मांद्यांत्यफलज्यया मन्दपरिधिः कार्यः, तत्केन्द्रभूकेन्द्रस्पष्टा रेखा लघुवृत्तपालिपर्यंतं कार्या। तत्राप्यूर्ध्वंपालिरेखा संपाते उच्चं अधः पालि रेखासंपाते नीचं चांकनीयं[1], मन्दपरिधौ भांशाः कल्पनीयाः, तत्राप्युच्चान्मंदकेन्द्र विलोमदिशि दत्वा चिह्नं कार्यं। अस्माच्छीघ्रांत्यफलज्यार्द्धेन शीघ्रपरिधिः कार्यः, अत्र शीघ्रांत्यफलज्यामन्दपरिधित्रिज्यामानेन ग्राह्या न तुमहत्त्रिज्यामानेन मन्दपरिधिशीघ्रपरिधिकेन्द्रगता रेखा उपरिशीघ्रपरिधिपालौ यत्र लगति तत्र शीघ्रोच्चं कल्पनीयं, उच्चाच्छीघ्रकेन्द्रं प्रथममन्दकेन्द्रविलोमदिशि दत्वा चिह्नं कार्यं, तच्चिह्नान्मन्दपरिधिकेन्द्रपर्यंतं रेखा कार्या, स शीघ्रकर्णो भवति। मन्दपरिधौ शीघ्रकर्णोच्चरेखयोरन्तरे शीघ्रार्द्धफलं भवति इत्यनेन मन्दकेन्द्रमेकफलं[2] संस्कृतं जातं, पुनः शीघ्रकर्णो[3] मन्दपरिधौ यत्र लग्नस्तत्र तथैव मांदांत्यफलज्यार्द्धेन[4] मंदपरिधिः कार्यः, अत्रोच्चरेखा तु शीघ्रकर्ण एवास्ति। अत्रापि पूर्ववदुच्चं कल्पयित्वा मन्दकेन्द्रं प्रथममन्दकेन्द्रदिशि दत्वा चिह्नं कार्यं, तच्चिह्नाद्बृहन्मंदकेन्द्रपरिधिकेन्द्रपर्यंतं[5] रेखा कार्या, स मंदकर्णो भवति। स मंदकर्णो[6] बृहन्मंदपरिधि पालौ यत्र लग्नस्तच्चिह्नशीघ्रकर्णांतरे मांदार्द्धफलं ज्ञेयं इत्यनेन बृहन्मंदपरिधौ मन्द-

(घ) १. कल्पनीयं for (चांकनीयं)
२. 'मन्द' लुप्त
३. शीघ्रकर्णः for (शीघ्रकर्णो)
४. मांद्यांत्यफलं for (मांदांत्यफल)
५. 'केन्द्र' लुप्त
६. मन्दकर्णः for (मन्दकर्णो)



केन्द्रं फलद्वयसंस्कृतं जातं, तस्य दोर्ज्यां कोटिज्यां विधाय मन्दकर्णः साध्यः, तस्मान्मंदफलमानेयं तन्मध्यमग्रहे[1] संस्कार्यं, स मन्दस्पष्टो भवति। मन्दकर्णः कक्षा-वृत्ते यत्रलग्नस्तत्र मन्दस्पष्टचिह्नं ज्ञेयं, तस्माच्चिन्हाच्छीघ्रांत्यफलज्यया वृत्तं कार्यं, तस्योर्ध्वाधररेखा तु मन्दकर्ण एव भवति । मन्दस्पष्टशीघ्रोच्चांतररूपं शीघ्रकेन्द्रं पूर्वदिशि दत्त्वा दोर्ज्या कोटिज्या च कार्या दोः फलं कोटिफलं चानेयं, कोटिफलं कर्कादिकेन्द्रे त्रिज्यायां शोध्यं, मकरादिकेन्द्रे योज्यं यतो मकरादि-केन्द्रे कोटिफलं त्रिज्याग्रादुपरि भवति। कर्कादिकेन्द्रे त्रिज्याग्रादधो भवति। एवं कृते स्पष्टा कोटिर्भवति। स्पष्टकोटि वर्गभुजवर्गयोगपदं[2] कर्णो भवति। कुतः जात्यक्षेत्रत्वात् पुनरागतं भुजफलं कर्णाग्रे भवति, तस्य धनुःकरणार्थमनुपातः क्रियते, कर्णाग्रे इदं तदा त्रिज्याग्रे किमिति लब्धफलस्य चापं कक्षावृत्ते मन्द कर्णशीघ्रकर्णांतरे शीघ्रफलं भवति। यत्र शीघ्रकर्णः कक्षावृत्ते लग्नस्तत्र स्पष्टो ज्ञेयः, तदेवमुपपन्नं मध्ये शीघ्रफलस्यार्द्धमिति।

अथ प्रकारांतरेणोच्यते—शीघ्रफलार्द्धमन्दफलार्द्धसंस्कृतग्रहान्मन्दकेन्द्र-मानीय पुनर्मंदशीघ्रफलाभ्यामसंस्कृतमध्यग्रह एव संस्कारः कृतोस्ति, तेनेदं ज्ञायते, ग्रहमन्दोच्चस्य शीघ्रफलार्द्धमन्दफलार्द्धाभ्यां मन्दशीघ्रफलसंस्कार उक्तो भवति । तत्र मन्दोच्चस्य ग्रहशीघ्रफलार्द्धतुल्यमेव मन्दफलं ग्रहमन्दफलार्द्ध-तुल्यमेव शीघ्रफलं भवति। एवं ग्रहशीघ्रपरिध्यर्द्धतुल्यो मन्दपरिधिर्ग्रहमन्द-परिध्यर्द्धतुल्यः शीघ्रपरिधिश्च ग्रहमन्दोच्चस्य भवतः, तत्र ग्रहान्मन्दोच्चो मन्द-गतित्वाद् ग्रहपृष्ठतो वस्तुतो गणनीयः। शीघ्रोच्चोपि ग्रहापेक्षया शीघ्रगतित्वात्पूर्व-भाग एव नियमेन गणनीयः। तत्र शीघ्रोच्चस्य ग्रहाच्छीघ्रगतिकत्वाच्छीघ्रोच्चाद् ग्रहं दूरीकृत्य परमार्थतः शीघ्रकेन्द्रं विज्ञेयं। एवं मन्दोच्चस्य मन्दगतिकत्वाद् ग्रहा-न्मन्दोच्चं निराकृत्य परमार्थतः मन्दकेन्द्रं विज्ञेयं। तत्र ग्रहमन्दोच्चे एव मन्दफल-शीघ्रफलसंस्कारः कर्त्तव्यो भवति। ग्रहकेन्द्रस्य स्पष्टस्य परिधिज्ञानाय परन्तु ग्रह-मन्दोच्चार्थमपि मन्दोच्चशीघ्रोच्चभगणतत्परिधि परिमाणादि कथने ग्रन्थगौरवा-पत्तेर्ग्रहमन्दशीघ्रफलार्द्धत एव लाघवेन कार्यस्याव्यभिचारेण सिद्धे मंदपरिधि-

(घ) १. मध्यग्रहे for (मध्यमग्रहे)   २. योगवर्गपदं for (वर्ग योगपदं)

जशीघ्रपरिधिजफलयोरर्द्धीकृतयोरेकरूपतया वैषम्याभावात्तयोर्मंदोच्चे संस्कारे क्रियमाणे मन्दोच्चीयमन्दोच्चशीघ्रोच्च तत्परिध्यादिगणनक्रियाभ्यावृत्त्या गौरवापत्तेर्लाघवान्मंदग्रह एव शीघ्रमन्दार्द्धफलयोर्यथामर्यादं संस्कारे कृते सति मांदकेन्द्रस्याव्यभिचारेण सिद्धे मध्य ग्रह एव संस्कारद्वयं यथायोगं धनर्णत्वेन समादृतं। एवं च तत्र ग्रहे मांदं शैघ्रं फलं धनं चेमन्दोच्चे ऋणमेव ग्रहे ऋणं चेन्मंदोच्चे धनमेवेति। मन्दोच्चविपरीतो ग्रहसंस्कारो ग्रहविपरीतो मन्दोच्चे इति भवति। तथा सत्येव केन्द्रस्याव्यभिचारेण सिद्धे:; एवं ग्रहशीघ्रोच्चभगणाः ग्रहमन्दोच्चग्रहभगणाभ्यामूनाः ग्रहमंदोच्चस्य प्रत्यग्गतेर्भगणा भवन्ति। एवं ग्रह भगणा एव ग्रहमन्दोच्चस्य शीघ्रोच्चभगणा भवन्ति, एवं च ग्रहमन्दोच्चस्य मन्दशीघ्रपरिधी मन्दशीघ्रोच्चौ तद्भगणाश्चेह मध्ये शीघ्रफलस्यार्द्धं मांदमर्द्धं फलं तथा इत्यनेन सूचिता भवतीति विवेचनीयं।

अथ धनर्णतोपपत्तिः—कक्षावृत्ते मंदपरिधिकेन्द्रं मंदकेन्द्रगत्या पूर्वतो गच्छति। मंदपरिधिगतकेन्द्रं स्वस्थान एव मंदकेन्द्रगत्या पश्चिमतो भ्रमति। तेन मंदकर्णो मेषादिकेन्द्रे मध्यमात्पश्चिमत एव भवति। तुलादिकेन्द्रे पूर्वत एव भवति। अतो मंदफलं मेषादावृणं तुलादौ धनं भवति। शीघ्रपरिधिकेन्द्रं मंदस्पष्टगत्या पूर्वतो गच्छति, शीघ्रपरिधिपालौ ग्रहबिंबं शीघ्रकेन्द्रगत्या पूर्वतो भ्रमति। शीघ्रकर्णरेखा मंदकर्णरेखातो मेषादिकेन्द्रे अग्रत एव भवति। तुलादिकेन्द्रे पृष्ठत एव भवति। तेन शीघ्रफलं मेषादौ धनं तुलादावृणं भवतीत्युपपन्नं।

अथ फलचतुष्टयं भौमादि पंचग्रहाणां देयं सूर्यचन्द्रयोस्तु।

मन्दफलमेव देयमित्याह—

उक्तप्रकारेण खलु स्फुटत्वं भौमादिकानां गणकैर्विधेयं।
मान्दं फलं केवलमेव देयं तिग्मद्यु तेश्चापि निशाकरस्य ॥१६॥

अदः पद्यं स्पष्टार्थं।

(घ) १. णनक्रिया for (गणनक्रिया) २. मध्यग्रह for (मन्दग्रह)
३. चेन्मन्दोच्चे for (चे मन्दोच्चे) ४. ग्रहमन्दमन्दोच्चस्य for (ग्रहमन्दोच्चस्य)
५. मेषादौ ऋणं for (मेषादावृणं) ६. ॥१६॥ for (१६)

Indira Gandhi National Centre for the Arts

अथ गतिस्पष्टीकरणमाह—मंदोच्चभुक्तिविधुमध्यभुक्ते विशोध्य दोर्ज्या विवरादि कृत्वा फलं पुरावत्स्वमृणं गतौ स्यान्मदस्फुटा कर्किमृगादि[1] अस्याः[2] दोर्ज्यांतरं साध्यं। तद्यथा अद्यतनमंदकेन्द्रभुजस्तु ज्ञात एवास्ति। तस्य दोर्ज्यापि ज्ञातास्ति, श्वस्तनमंदकेन्द्राद् भुजं विधाय दोर्ज्या कार्या, तदंतरं मांदांत्यफलज्यागुणं त्रिज्याभक्तं गतिमंद फलं भवति, तत्फलं मध्यगतौ कर्कादिकेन्द्रे धनं मकरादिकेन्द्रे ऋणं कार्यं, मन्दस्पष्टा गतिर्भवति। एवं सर्वेषां मंदस्पष्टा गतिः कार्या।

अथ धनर्णतोपपत्तिः—अद्यतनश्वस्तनमध्यग्रहयोरंतरं मध्यमा गतिर्भवति। मंदस्पष्टयोरंतरं मंदस्पष्टा गतिर्भवति। फलयोरंतरं गतिफलं भवति। तत्र मेषादेः कर्कादिपर्यंतं फलमृणं भवति। कुतः अद्यतन ऋणफलात् श्वस्तनमृणफलमधिकमस्ति। अनयोरंतरे क्रियमाणे फलांतरमृणशेषमेव भवति, एवं मकरादेर्मेषादिपर्यंतमद्यतनधनमंदफलात् श्वस्तनं धनमंदफलमूलं[3] भवति। संशोध्यमानं स्वमृणत्वमेतीत्यनेनांतरे क्रिययाणे ऋणमेवावशिष्यते[4]। तेन मकरादेः कर्कादिपर्यंतं गतिफलमृणं भवतीत्युपपन्नं। एवं कर्कादेस्तुलादिपर्यंतमद्यतनऋणफलात् श्वस्तनमृणफलं न्यूनं भवति। तत्र शोधने क्रियमाणे धनशेषं भवति। एवं तुलादेर्मकरादिपर्यंतमद्यतनधनफलात् श्वस्तनधनफलमधिकं भवति। तयोरन्तरे धनशेषमेव तेन कर्कादेर्मकरादिपर्यंतं गतिफलं धनं भवतीत्युपपन्नं।

अथ स्पष्टशीघ्रगतिसाधनमाह—

स्पष्टाशुकेन्द्रस्य गतिः फलस्य कोटिज्यकाशु श्रवणांतरेण।
गुण्याशुकर्णेन विभाजिता च फलं स्वमस्वं च मृदस्फुटायां ॥२१॥[5]
फलस्य कोटचंशकर्किसंजिनीतः कर्णोधिकोने च गतिः स्फुटा स्यात्।
यदा न शुध्येद्विपरीतशुद्धौ शेषं भवेद्वक्रगतिर्ग्रहस्य ॥२२॥
दिनांतरालस्फुटखेटयोर्यद्विश्लेषशेषं सजवो भवेद्वा।

(घ) १. कर्कि for (कर्कि)

२. +केन्द्रे ॥२०॥ अस्यार्थः। चन्द्र मन्दोच्चगतिं मध्यचन्द्र भुक्ते विशोध्य शेषं चन्द्रस्य मतकेन्द्रगतिर्भवति। अन्येषां ग्रहाणां मध्यगतिरेव मंद केन्द्रगतिरस्ति। +

३. मूनं for (मूलं)

४. ऋर शेषमेवावशिष्यते for (ऋणमेवावशिष्यते)

५. ॥२१॥ for (२१)

Indira Gandhi National Centre for the Arts

अस्यार्थः—स्पष्टशीघ्रकेन्द्रगतिः फलकोटिज्याशीघ्रकर्णांतरेण गुण्या शीघ्रकर्णेन भक्ता फलं फलकोटिज्यातः कर्णेधिके मंदस्पष्टगतौ धनं कार्यं। फलकोटिज्यातः कर्णे ऊने ऋणं कार्यं, गतिः स्पष्टा भवति। यदा फलं गतौ न शुध्येत्तदा मंदस्पष्टगतिरेव तत्र शोध्या शेषं ग्रहस्य वक्रगतिर्भवति। दिनांतरालस्पष्टखेटयोर्विश्लेषे यच्छेषं साग्रहस्य गतिर्वा भवति।

अत्रोपपत्तिः-शीघ्रफलकोटिज्या कर्णांतरपरमत्वे गतिफलपरमत्वं फलकोटिज्या कर्णांतरा भावे गतिफलाभावः मध्ये तु[1] पातः फलकोटिज्या कर्णांतरपरमत्वमुच्चसमे ग्रहे अंत्यफलज्यातुल्यं भवति। फलस्याभावात्फलकोटिज्या त्रिज्या तुल्या भवति, गतिफलं[2] च परमं भवति। तद्यथा—अद्यतनश्वस्तनकेन्द्रदोर्ज्यांतरमंत्यफलज्यागुणं त्रिज्याभक्तं गतिफलं भवति। पुनरनुपातः अंत्यफलज्यातुल्येन फलकोटिज्या कर्णांतरेणेदं तदेष्टेन फलकोटिज्या कर्णांतरेण किमिति पुनरनुपातः, कर्णाग्रे इदं तदा त्रिज्याग्रे किमित्यत्र तुल्ययोरंत्यफलज्ययोस्त्रिज्ययोश्च नाशे कृते केन्द्रगतिः फलकोटिज्या कर्णांतरगुणा कर्णभक्ता भवतीत्युपपन्नं। सूर्यसिद्धांतोक्तगतिफलानयनप्रकारे त्रिज्याकर्णांतरं गृहीतमस्ति।

तद्यथा—

मन्दस्फुटीकृतां भुक्तिं प्रोह्य शीघ्रोच्चभुक्तितः,
तच्छेषं विवरेणाथ हन्यात्त्रिज्यांत्यकर्णयोः ॥१॥[3]
चलकर्णहृतं भुक्तौ कर्णे त्रिज्याधिके धनं,
ऋणमूनेऽधिके प्रोह्य भुक्तिं वक्रगतिर्भवेत् ॥२॥

अत्र त्रिज्या कर्णांतरस्थाने फलकोटिज्या कर्णांतरमेव व्याख्येयं, अनेनार्थेन कृतर्तुचन्द्रेत्यादिसौरोक्तवक्रकेन्द्रेषु भौमादीनां गतिः शून्यमायाति। त्रिज्याकर्णांतरे गृहीते गतिः शून्यं नायाति। अत्रोच्चसमे मध्यमे उदाहरणं भौमस्य वक्रकेन्द्रांशाः १६४ भुजः ०।१६ अस्य ज्या १६।३२।१८ भुजफलं १०।४७।४५ कोटिफलं ३७।३७।१६[4] कर्कादिकेन्द्रत्वात्त्रिज्यायां शोधितं शेषवर्गभुजफलवर्गयोगपदं कर्णः २४।४८ अत्र मध्यगतितुल्येव मंदस्पष्टगतिर्गृहीता।

(अ) १. मध्येनुपातः for (मध्ये तु पातः) २. + परमं +
३. ॥१॥ for (१) ४. ३९।३६।१६ for (३७।३७।१६)

Indira Gandhi National Centre for the Arts

अथ भौमशीघ्रकेन्द्रगतिः २७।४२ फलकोटिज्याकर्णांतरेणानेन २८।२६ गुणिता ७८७।३६ कर्णेनानेन २४।४८ भक्तालब्धं गतिफलं ३१।४१ फलकोटिज्यातः कर्णस्य न्यूनत्वाज्जातमृणफलं, अस्य मध्यगतेश्चांतरं[1] जाता गतिः शून्यं तस्मा-त्त्रिज्याकर्णांतरस्थाने फलकोटिज्या कर्णांतरमेव ग्राह्यं। एतादृशं सौराशयमवि-दित्वा यथावत्स्थितं व्याख्यानमंगीकृत्य कमलाकरेण तत्त्वविवेके भास्कराचार्यस्य दूषणं दत्तं तदसत् भास्कराचार्येण सौराशयानुसारेणैव गणितं निबद्धं कोटिफल-घ्नीत्यादिना।

अथ सौराक्तान्वक्रमार्गचलकेन्द्राशानाह—

कृततुर्चन्द्रैः १६४ युगवेद चन्द्रैः १४४,
खरामचन्द्रै १३० हुतभुङ्नरेन्द्रै १६३ २३।
शरेषु चन्द्रै १५५ श्चल केन्द्रभागैः स्युर्वक्रिणोभूमि-
सुतादयश्च स्वैर्वक्रभागैर्भगणांशशुद्धैः,
स्युर्मार्गिणस्ते खचराश्चलांशैः ॥२४॥[2]

अस्यार्थः—कृततुर्चन्द्रादयो यदा भौमादिकानां शीघ्रकेन्द्रांशाः स्युस्तदा तैर्यथाक्रमं वक्रिणो ज्ञेयाः, एतैरेव भागैर्भगणांश ३६०[3] शुद्धैः समाः यदा भौमादि-कानां चल केन्द्रांशा भवन्ति। तदा ते मार्गिणो भवन्तीति ज्ञेयं। एते केन्द्रांशा इदं गतिफलं सौरतन्त्रादिषु लिखितत्वाल्लिखितं यदा स्पष्टयोरन्तरं क्रियते तदैतेषु केन्द्रांशेषु गतिः शून्यं न भवति। भौमस्य गतिमन्दफलाभावे द्विपंचेन्दुमित १५२ चलकेन्द्रांशैर्गतेः शून्यत्वं भवति। बुधस्यैतावन्मिते शीघ्रकेन्द्रे १४५ गतिः शून्यं भवति। गुरोरेतावन्मिते[4] १२० केन्द्रे गतिः शून्यं भवति। शुक्रस्यैतावन्मिते[5] केन्द्रे

(घ) १. मध्यमगते for (मध्यगते)
२. ॥२४॥ for (१४)
३. '३६०' लुप्त
४. गुरोः १२० एतावन्मिते for (गुरोरेत-वन्मिते १२०)
५. शुक्रस्य १६१ एतावन्मिते for (शुक्रस्यैतावन्मिते)



१६१[1] गतिः शून्यं भवति । शनेः १०६ एतावन्मिते केन्द्रे गतिः शून्यं भवतीति ।

अथ पूर्वमुक्ता अपि अर्द्धफलादि वासनाः प्रकारांतरतो रेखागणिते नोच्यंते । अत्राभीष्टचिह्नात्त्रिज्यामितकर्कटेन कक्षावृत्तं कार्यं, नीचोच्चरेखा कार्या उच्चान्मेषादिर्विलोमं देयः, मेषादेर्मध्यग्रह उच्चादग्रतो देयः । ग्रहशीघ्रोच्चं मध्यमग्रहग्रहमंदोच्चाभ्यां हीनं मंदमन्दोच्चं भवति । तन्मेषादेर्विलोमं देयं, तद्ग्रहमन्दमंदोच्चस्य चिह्नं भवति । तन्मंदोच्चयोरन्तरं मन्दमन्दकेन्द्रं भवति । मन्दोच्चाछीघ्रांत्यफलज्यार्द्धेन वृत्तं कार्यं, तत्राप्युच्चरेखा केन्द्राभिमुखी कार्या । तस्मिन्परिधावुच्चात्पश्चिमतो मन्दमन्दकेंद्रं दत्वा चिह्नं कार्यं, तत्केन्द्रदोर्ज्या कार्या, भूकेन्द्रात्तचिह्नपर्यंतं वर्णरेखा कार्या, सा कर्णरेखा कक्षावृत्ते यत्र लग्ना तत्र शीघ्र फलार्द्धं संस्कृतं मन्दोच्चं जातं । अत्र शीघ्रफलं मेवादावृणं[2] तुलादौ धनं ज्ञेयं । पुनर्मंदोच्चस्य शीघ्रोच्चं तु मध्यमग्रह एवास्ति । तत्स्पष्टमन्दोच्चांतरं मन्दोच्चस्य शीघ्रकेन्द्रं भवति । उक्तकर्णरेखा कक्षावृत्ते यत्र लग्ना तत्र केन्द्रं कृत्वा मान्दांत्यफलज्यार्द्धेन वृत्तं कार्यं, तत्र कर्णरेखैवोच्चरेखास्ति । तत्र परिधावुच्चात् पूर्वतः[3] शीघ्रकेन्द्रं दत्वा चिह्नं कार्यं, तत्केन्द्रस्य दोर्ज्यां कोटिज्यां कृत्वा भुजफलं कोटिफलं च विधाय कर्णः कार्यः, सा कर्णरेखा कक्षावृत्ते यत्र लग्ना तत्र फलद्वयं संस्कृतं मंदोच्चं जातं भूकेन्द्रात्स्पष्टोच्चगा रेखा नीचपर्यंतं कार्या । सा स्पष्टनीचोच्चरेखा भवति ।

(घ) १. '१६१ लुप्तं'
२. मेषादौ ऋणं for (मेवादावृणं)
३. पूर्वतो for(पूर्वतः)



तस्यां केन्द्रादुच्चोन्मुखीं मांदांत्यफलज्यां दत्वा तत्र केन्द्रं कृत्वा त्रिज्यामितकर्कटेन मन्दप्रतिवृत्तं कार्यं, तस्मिनुच्चरेखा यत्र लग्ना तत्र स्पष्टोच्चं ज्ञेयं, स्पष्टोच्चमध्यमग्रहांतरं फलद्वयसंस्कृतं मन्दकेन्द्रं ज्ञेयं, अत्र शकलं ।

अथ द्वितीयं शकलं[१] कखगघं कक्षावृत्तं कार्यं, घं भूकेन्द्रं चछथधं[२] मन्दप्रतिवृत्तं थश्व[३] च घ रेखा स्पष्टोच्चरेखा कक्षावृत्ते कं मेषादिः खं स्पष्टोच्चं प्रतिवृत्ते छं मेषादिः थं स्पष्टोच्चं धं मध्यमः थधं मन्दकेन्द्रं अयं थचधकोणः ज्ञातोस्ति । एतस्य ज्यागचघ त्रिभुजे गचघ कोणस्यापि जीवास्ति सा ज्ञातास्ति । गघ भुजस्त्रिज्यामितः एतौ जातौ[४] स्तः । गघेन गचछकोणज्या[५] लभ्यते, तदा च घेन किमिति लब्धं चगघ कोणज्या, अस्याश्चापं मंदफलं चगघकोणः, अनेन हीनः थचध कोणो नातः[६] थघककोणः खंगं मन्दफलसंस्कृतं मन्दकेन्द्रं कृत्वा पुनर्गकेन्द्रं कृत्वा भूजतं[७] शीघ्रनीचोच्चवृत्तं कार्यं । एतस्योच्चं मन्दप्रतिवृत्तकेन्द्रसन्मुखं भवति । स्पष्टोच्चं भूकेन्द्रसन्मुखं भवति । चगघगरेखे वर्द्धनीये । लघुवृत्तपालिपर्यंतं जचिह्नं मध्यमोच्चं भूचिह्नं[८] स्पष्टोच्चं त चिह्नं बिंबं जतं मध्यमशीघ्रकेन्द्रं इदं चगघ तुल्येन जगभ[९] कोणेन मन्दफलरूपेण विलोमं संस्कृतं तभूं[१०] स्पष्टकेन्द्रं भवति । अस्य भुजज्यातवं कोटिज्यावगं गतरेखायां षष्टिस्तन्मानेन यदि तगं शीघ्रांत्यफलज्या तदावतं भुजफलं वगं कोटिफलं इदं मकरादि केन्द्रत्वाद् घग त्रिज्यायां योजितं, जातं घवकोटिः, अस्य वर्गः वतवर्गयुतः जातो घतवर्गः । अस्य मूलं घतं जातः शीघ्रकर्णः कर्णाग्रे यदि वतं भुजफलं तदा घमत्रिज्याग्रे किमिति लब्धस्य चापं जातं मगं शीघ्रफलमिदं मेषादिकेन्द्रत्वाद्धनं इदं मन्द स्पष्टकेन्द्रे खगे योजितं । शीघ्रस्पष्टं मन्दकेन्द्रमिदं कखेन स्पष्टोच्चेन युतं जातः स्पष्टग्रहः, अनेन शकलेन

(घ) १. + शकलं +
२. चथधंमन्द for (चछथधंमन्द)
३. थखचघरेखा for (थश्वचघरेखा)
४. ज्ञातौ for (जातौ)
५. गचघकोण for (गचछकोण)
६. जातः for (नातः)
७. भ्रजतं for (भूजतं)
८. भ्रचिह्नं for (भूचिह्नं)
९. जंगभ्रकोणेन for (जगभकोणेन)
१०. तभ्रं for (तभूं)

भौमादिपंचग्रहाणां मन्दकर्णाभावः सिध्यति। त्रिज्यायां कोटिफलं योज्यं शोध्यमिदमपि संगच्छति रविचन्द्रयोस्त्वनया कल्पनया मन्दकर्णाभावः सिद्धयति। परन्तु बिंबयोर्न्यूनाधिक्यं न संभवति। बिंबयोर्न्यूनाधिक्यं तु प्रत्यक्षं दृश्यते, तेन मन्दकर्णोपेक्षितः श्री[1] रविणा न कृतः, स्वल्पांतरत्वात् अत्र पूर्वाचार्यैः स्वल्पांतरत्वान्मृदुकर्मणीह कर्णः कृतो नेत्यादि सर्वग्रहसाधारण्येन मन्दकर्णाभाव उक्तः। स नादरणीयः, कमलाकरदैवज्ञैः सिद्धांततत्त्वविवेके एतद्रूपपरिधिकल्पनं सूर्यसिद्धांते त्रुटितग्रन्थकल्पनां कृत्वा कृतं तदसत्, मन्दजनानां प्रतारणमात्रं तन्मतानुसारिभिर्दादाभाईनामभिर्दैवज्ञैः सूर्यसिद्धांतटीकायां किरणावल्यामेकरूपपरिधिकल्पनं कृतं, तदप्यसत्। अन्यदपि शीघ्रांत्यफलज्यायाः मन्दकर्णगुणेनेन त्रिज्यया भजनेन स्पष्टत्वं कृत्वा फलसाधनं, कृतं तदप्यसत्। सौरोक्तफलस्य तत्कृतफलस्य चांतरं नवांशपरिमितं दृष्टमिदं गणितविरुद्धं[2] प्रत्यक्षविरुद्धं चेति।

अथ भौमादिपंचग्रहाणां शरसाधनमाह—

तत्रदावुपयोगित्वाच्चंद्रादीनां परमशरकला उच्यन्ते—

खभानि २७० खांका ९० नखभूमयश्च[3],
खांगानि ६० खांका[4] ९० खदिवाकराश्च १२०।
चन्द्रादिकानां परमाः खगानां
पुरातनै र्बाणकला प्रदिष्टाः ॥२३॥

अथ शरसाधनं—

पातोनमन्दस्फुटरवेर्दोर्ज्या निघ्नीपराभिः शरलिप्तिकाभिः।
चलांत्यकर्णेन हृताशरः स्यात्पातोनमन्दस्फुटगोलदिक्कः ॥२४॥[5]
हिमद्यु तेस्त्रिज्यकया त्रिभाजिता[6] भवेत्पृषत्कोपम[7] संस्कृतिक्षमः ॥२५॥
पाते अथवा मन्दफलं विलोमं दत्त्वा तद्रूनः खलु मध्यखेटः स्यात्।
पातकेन्द्रं च ततः तुरावत्साध्यः पृषत्को[8] गणकप्रवीणैः ॥२६॥[9]

(घ) १. 'श्री' लुप्त
२. विरु for (विरुद्धं)
३. + १२० +
४. खार्का: १२० for (खांका: ९०)
५. ॥२४॥ for (२४)
६. विभाजिता for (त्रिभाजिता)
७. पृषत्कोऽपम for (पृषत्कोपम)
८. पृशक्तो for (पृषत्को)
९. ॥२६॥ for (२६)

अथ पातोनमन्दस्फुटेत्यस्यार्थः—पातास्तु चक्रशुद्धाः पूर्वं चक्रे लिखिताः संति। चन्द्रस्य चक्रशुद्धः पातो राहुरेव ग्रह स्वपातोनः पातकेंद्र भवति। तस्य दोर्ज्यापरम-शरगुणा शीघ्रांत्यकर्णेन भक्ता फलस्य चापं शरकला भवंति। चन्द्रस्य त्रिज्या भक्ताः शरकला भवंति। पातकेन्द्रे मेषादिके शरकला उत्तरा तुलादिके दक्षिणा ज्ञेयाः। अत्रोपपत्तिः—प्रतिवृत्त[1]प्रकारेण भौमादिकानां शीघ्रप्रतिवृत्तेः मेषादेः सकाशाद् गणितागतः पातः अनुलोमं देयः, तत्र चिह्नं कृत्वा तत्रान्यत्त्रिज्या वृत्तस्य संपातः कार्यः। तस्मात्षड्भांतरे द्वितीयसंपातः कार्यः। पातात्त्रिभांतरे परमशर-कला तुल्यांतरेणोत्तरतः सषड्भपातात्परमशरकला तुल्यांतरेण दक्षिणतो वि-श्लिष्टं कार्यं ग्रहस्तस्मिन्वृत्ते मंदस्पष्टगत्या भ्रमति। अस्माभिः स्वल्पांतरत्वात्फल-साधनार्थं प्रतिमंडलस्थ एव गृहीतः। तस्य पातेन यदंतरं तत्पातकेन्द्रं भवति। यतः पाततुल्ये ग्रहे शराभावोस्ति, पातात्त्रिभांतरे परमशरकला तुल्यमंतरं भवति। मध्येऽनुपातेन क्रान्तिवच्छर आनेयः। स यथा त्रिज्या तुल्यया पातकेन्द्रदोर्ज्यया परमशरकला तुल्यमंतरं लभ्यते। तदेष्टया किमिति अस्मिंस्त्रिभुजे कोटिः प्रतिवृत्ते शरोभुजः, द्वितीयवृत्ते कर्णः, पुनः कर्णाग्रे इदं तदा त्रिज्याग्रे किमित्यनुपातेन लब्धस्य चापं शरो भवति। कर्णस्त्वस्माभिः फलसाधनार्थं भूकेन्द्रात्प्रतिमंडलपर्यंतं साधितोस्ति, परंतु स्वल्पांतरत्वात्स एव गृहीतः। तेन गणितेन किंचिदंतरं पतति, चन्द्रस्य प्रतिमंडलाभावात्त्रिज्याग्र एव शर आयाति। तेन तदीयं चापं चन्द्रस्य शरो भवति। पूर्वानुपाते तुल्ययोस्त्रिज्ययोर्नाशे कृते मंदकेन्द्रदोर्ज्या परमशरगुणा शीघ्रकर्णभक्तेत्युपपन्नम्।

अथ नीचोच्चवृत्तप्रकारेण शरसाधनमाह—पातेथवा मंदफलमित्यादिना अस्यार्थः—

अथ पाते विलोमं मंदफलं दत्त्वा तदूनो मध्यखेटः कार्यः तत्पातकेन्द्रं स्यात्, तस्मात्पुरावद् गणकप्रवीणैर्बाणः साध्यः। अत्रोपपत्तिः—नीचोच्चवृत्ते मध्यमोच्चा-न्मेषादिः पूर्वतो देयः।। ततो मंदस्पष्टपातं दत्त्वा चिह्नं कार्यं, ततो[2] नीचोच्चवृ-त्तसदृशस्य द्वितीयवृत्तस्य संपातः कार्यः। तद्वृत्तं पातादुत्तरतः बृहद्वृत्तीय परमश-रकलांतरेण सषड्भपाताद्दक्षिणतो विप्रकृष्टं यथा स्यात्तथा द्वितीयवृत्तं स्थापनीयं, शेषोपपत्तिः पूर्ववद् ज्ञेया।

इति नीचोच्चवृत्तप्रकारेण शरसाधनं संपूर्णं।

(घ) १. प्रविवृक्तिक for (प्रतिवृत्त) २. तत्र for (ततो)

Indira Gandhi National Centre for the Arts

अथ रेखागणितं—

अथ यवनाचार्यमतेन वक्ष्यमाणग्रहाणां गणितं विवक्षुस्तदुपयोगिरेखागणितनिष्पत्यध्यायानुक्तं निष्पत्तिगणितमुच्यते।

अथ यत्र प्रमाणत्रयमस्ति तत्रैकं मध्यप्रमाणं कल्पितं[1]। शेषं प्रमाणद्वयं पार्श्वस्थं कल्पनीयं। तत्र प्रथमतृतीयप्रमाणयोर्निष्पत्तिः प्रथमद्वितीयप्रमाणनिष्पत्ति द्वितीयतृतीयप्रमाणनिष्पत्तिघाततुल्यास्ति। यथा—कखगं प्रमाणत्रयं कल्पितमस्ति। खप्रमाणं मध्ये कल्पांत[2] क प्रमाणं प्रथमं ग प्रमाणं तृतीयं कग निष्पत्ति. कख प्रमाणनिष्पत्ति खगप्रमाणनिष्पत्तिघाततुल्यास्ति। अत्रोपपत्तिः—कख निष्पत्तिः रूप ह प्रमाणनिष्पत्तितुल्या कल्पिता।

{ रू १ ह
रू १ भू[3]
रू १ ब }

खग निष्पत्तिः रूपभू[4]प्रमाणनिष्पत्तितुल्या कल्पिता, एवं कग निष्पत्तिः रूप ब प्रमाणनिष्पत्तितुल्या कल्पिता। तस्माह[5] भूवं[6] निष्पत्तित्रयस्य प्रमाणं जातं हप्रमाणरूप निष्पत्तिः खकनिष्पत्ति तुल्यास्ति। पुनः रूपब प्रमाण निष्पत्तिः कग निष्पत्तितुल्याऽस्ति। तस्मात् हवनिष्पत्तिः खग निष्पत्तितुल्या नाता[8]। खग[9] निष्पत्तिः रूपभू[10] निष्पत्तितुल्यास्ति। तस्मात् रूपभूनिष्पत्तिः[11] हव निष्पत्तितुल्या जाता। वरूपघातः वतुल्य एवास्ति, रूपगणनेनाविकृतत्वात् तस्मात्कगनिष्पत्तिः हभू[13]घातेन समाना जाता। अयं हभूघातः[14] कख खग निष्पत्तिघाततुल्योस्ति। तस्मात्कगनिष्पत्तिर्द्वयोर्निष्पत्योर्घाततुल्या जातेत्युपपन्नं। एवं या निष्पत्तिरुक्तनिष्पत्तितुल्यास्ति। सा

ह० रू० १ / ख० क०	रू० १ भू०[7] / ह० ब०
रू० १ ब० / क० ग०	क० ग० / ह० भू०
ह० ब० / ख० ग०	
[12] ख० ग० / रू० १ भू०	

(घ) १. कल्पनीयं for (कल्पितं) २. कल्पितं for (कल्पांत)
३-४. भ्क for (भू) ५. तस्मात् for (तस्मा)
६. हभ्कवं for (हभूवं) ७. भ्क for (भू)
८. जाता for (नाता) ९. कग for (खग)
१०. भ्कनिष्पत्ति for (भूनिष्पत्ति) ११. भ्कनिष्पत्ति for (भूनिष्पत्तिः)
१२. क० ग० / रू १ भ्क for ख० ग० / रू० १ भू
१३. हभ्क for (हभू) १४. हभ्क for (हभू)

Indira Gandhi National Centre for the Arts

तदितरोक्तनिष्पत्तिद्वयसमाननिष्पत्तिद्वयघातो भविष्यति। कुतः, समाननिष्पत्ति-प्रमाणानां न्यूनाधिक्याभावात्। इदमेवास्माकमिष्टम्।

अथ यदि पूर्वोक्तं निष्पत्तिद्वयं तुल्यं स्यात्तदा प्रथम तृतीय $\left\{\begin{matrix} \text{ग० थ०} \\ \text{भू० य०} \end{matrix}\right\}$ प्रमाणयोर्निष्पत्तिर्मध्यनिष्पत्तिवर्गतुल्या भवति।

अथ यद्येतासां तिसृणां निष्पत्तीनां प्रमाणानि भिन्नानि भवंति। तदा षट्-प्रमाणानि भवन्ति। तत्र प्रमाणद्वयं घातनिष्पत्तेः प्रमाणचतुष्टयं घातरहित निष्पत्योर्भवति। तत्र प्रथमप्रमाणं घातनिष्पत्तेः द्वितीयप्रमाणं द्वयं[1] घातरहितनिष्पत्त्यो[2]-र्यद्भवति। तदायामविस्तारपिंडसंज्ञं क्रमेण भवति। घातप्रमाणस्य द्वितीयमघातयोः प्रथमप्रमाणद्वयं यद्भवति। तदप्यपरं दैर्घ्यविस्तारपिंड संज्ञं भवति। दैर्घ्य-विस्तारपिंडघाते[3] यत्फलमुपपद्यते, तद्घनफलं भवति। उभयत्रोत्पन्नं घनफल समानं भवति। यथा कप्रमाण खप्रमाणनिष्पत्तिर्गप्रमाणघप्रमाणहप्रमाणं[4] प्रमाण निष्पत्तिघाततुल्या कल्पितास्ति। तत्र कघवप्रमाणानां घनफलं खगहप्रमाणघनफ-लेन तुल्यं भवति। अत्रोपपत्तिः—गप्रमाणहप्रमाणघातः भूप्रमाण[5]तुल्यः कल्पितः। घप्रमाणहप्रमाणघातः यप्रमाणतुल्यः कल्पितः। घ[6]प्रमाणवप्रमाणयोर्घातश्च तप्रमा-णतुल्यः कल्पितः।[7] तस्मात् गप्रमाण घप्रमाणे हप्रमाणेन गुणिते भू[8]प्रमाण यप्रमाणे जाते तदा गप्रमाण घप्रमाणनिष्पत्तिः भू[9]प्रमाण यप्रमाण निष्पत्तिरिव तुल्या[10] भवि-ष्यति। पुनः घप्रमाणं हप्रमाणेन गुणितं पृथक् वप्रमाणेन गुणितं सत् यप्रमाणं त प्रमाणं चोत्पन्नं। तस्मात् हप्रमाणवप्रमाणनिष्पत्तिः यप्रमाणतप्रमाणनिष्प-त्तितुल्या भविष्यति। तस्मात् भू[11]प्रमाण तप्रमाणनिष्पत्तिः गप्रमाणघप्रमाण-

---

(घ) १. 'द्वयं' लुप्त
२. निष्पत्ते for (निष्पत्यो) ३. पिंड for (पिड्व)
४. + व + ५. भ्र for (भू)
६-७. 'व प्रमाण— कल्पितः' लुप्त। ८. भ्र for (भू)
९. भ्र for (भू) १०. निष्पत्तितुल्या for (निष्पत्ति रिव)
११. भ्र प्रमाण for (भू प्रमाण)

Indira Gandhi National Centre for the Arts

निष्पत्तितुल्य भू[1]प्रमाण यप्रमाण निष्पत्ति $\left\{\begin{matrix} \text{ह०} & \text{व०} \\ \text{य०} & \text{त०} \end{matrix}\right\}$ हप्रमाण वप्रमाण-निष्पत्तितुल्य यप्रमाण तप्रमाण निष्पत्त्योर्घात तुल्यास्ति । तस्मात् भू[2]प्रमाण तप्र-माणयोर्निष्पत्तिः (भू[3]० त०) कप्रमाण वप्रमाण निष्पत्तितुल्या जाता । (क० व०) तस्मात् कतघातः कघवघाततुल्यः व[4]भूघातेन खगहघात तुल्येन समानो जात इत्युप-पन्नं । अत्र प्र[5]थम[6]पंक्ति दैर्घ्यविस्तारपिंडेषु यत्किंचित्प्रमाणस्य निष्पत्तिः द्वितीयपंक्ति[7]–दैर्घ्यविस्तारपिंडेषु तादृश यत्किञ्चित्प्रमाणेन यास्ति सा शेषचतुर्णां प्रमाणानां निष्पत्त्योर्घाततुल्या भवति । यथा घप्रमाण गप्रमाणयो-र्निष्पत्तिः खप्रमाण कप्रमाणनिष्पत्ति हप्रमाण वप्रमाणा[8]-निष्पत्त्योर्घाततुल्यास्ति । $\left\{\begin{matrix} \text{क०} & \text{ख०} \\ \text{ग०} & \text{घ०} \\ \text{ह०} & \text{व०} \end{matrix}\right\}$ अत्रोपपत्तिः—यदि प्रथमघनफले दैर्घ्यविस्तारपिंड-संज्ञानां कघवप्रमाणानां घप्रमाणं पिंडः कल्प्यते, द्वितीय घनफले गप्रमाणं पिंडः कल्प्यते । तदा कप्रमाण वप्रमाणयोर्घातः प्रथमघनफलस्य भूमिः स्यात् । खप्रमाणहप्रमाणयोर्घातः द्वितीयघनफलस्य [10]भूमिः [11]स्यात् । उभयत्र घनफ[9]ल-द्वयं च समानमस्ति । तस्मात्प्रथमपिंडनिष्पत्तिर्द्वितीयपिंडेन तथा जाता, यथा द्वितीयभूमिक्षेत्र[12]निष्पत्तिः प्रथमभूमिनिष्पत्तितुल्या[13]स्ति । इदं रेखागणिते घन-क्षेत्राध्याये मयैव निरूपितमस्ति । खप्रमाण हप्रमाणघातरूप क्षेत्र कप्रमाण वप्रमा-णघातरूप क्षेत्रयोर्निष्पत्तिस्तद्भुज निष्पत्ति घातरूपास्ति । तद्भुजनिष्पत्तिस्तु खप्र-माणकप्रमाणनिष्पत्ति हप्रमाणवप्रमाणनिष्पत्तिर[14]स्ति । तस्मात् घप्रमाणगप्रमाण-

---

(घ) १. भ्र प्रमाण for (भू प्रमाण) २. भ्र प्रमाण for (भू प्रमाण)
३. भ्र० त० for (भू० त०) ४. वभ्रघातेन for (वभू घातेन)
५. 'प्रथम' लुप्त ६. 'पंक्ति' लुप्त
७. 'पंक्ति' लुप्त ८. वप्रमाण for for (वप्रमाणा)
९. फलं च for (फलद्वयं च) १०. 'निष्पत्तिर्' लुप्त
११. द्वितीयपिंड निष्पत्तिः for (द्वितीय पिंडेन तथा जाता यथा)
१२. 'क्षेत्र निष्पत्तिः' लुप्त १३. तुल्या जाता for (तुल्यास्ति)
१४. निष्पत्तिघाततुल्यास्ति for (निष्पत्तिरस्ति)

Indira Gandhi National Centre for the Arts

निष्पत्तिर्भूम्योर्निष्पत्तिघाततुल्यास्ति[1]। तदेवमुपपन्नं यथोक्तं पुनरपि घातक्षेत्रफ[2]-लयोर्निष्पत्तिर्यथा कख[3]निष्पत्ति हवनिष्पत्योर्घातरूपास्ति, तथा खवनिष्पत्ति हक-निष्पत्योर्घातोस्ति। तस्माद्या निष्पत्तिर्निष्पत्तिद्वयस्य घातरूपा भवेत्सैवान्यप्रमाण-जनितनिष्पत्योरपि घातरूपा भविष्यति, यदि प्रथमप्रमाणानि विलोमानि[4] क्रियंते।

अथ यदि दैर्घ्यविस्तारपिंडेन[5] युते पंक्तिद्वये घातं विना प्रमाणद्वयं समानं भवति। तदा शेषचत्वारि प्रमाणानि सजातीयानि सन्ति। कुतः, ययोर्घनक्षेत्रयोः पिंडौ समानौ स्यातां, तयोर्निष्पत्तिर्भूमिनिष्पत्तिसमाना स्यात्। तस्मात्समानं प्रमाणद्वयं पिण्डः कल्प्यते। तदा समानपिण्डद्वयस्य घनफलं समानं जायते। अनयोर्भूमिरपि समाना स्यात्, समकोण समान क्षेत्रयोर्भुजाः सजातीया भविष्यन्ति। तस्माच्चत्वारि शेषप्रमाणानि सजातीयानि स्युः, यथा कप्रमाणखप्रमाणे कघव-प्रमाणेषु प्रथमदैर्घ्य विस्तारपिण्डेषु खगहप्रमाणेषु द्वितीयदैर्घ्यविस्तारपिंडेषु समाने कल्पिते। तदा घप्रमाण वप्रमाणघात क्षेत्रगप्रमाणहप्रमाणघातक्षेत्रे समाने भवतः। तदा घप्रमाणगप्रमाणनिष्पत्तिर्हप्रमाण वप्रमाणतुल्या भविष्यति।

[ग० च०
ह० व०] अथ चतुर्षु सजातीयप्रमाणेष्वेकमज्ञातमस्ति। तत्र ज्ञातप्रमाणत्रयेण शेषज्ञानं भवति। तथैव षट्प्रमाणेषु ज्ञातपंचप्रमाणैः शेषं ज्ञेयं, एकदैर्घ्य विस्तार-पिण्डघातः, द्वितीयदैर्घ्यविस्तारपिण्डज्ञातप्रमाणद्वयघातेन भक्तः सन् अज्ञात-राशिज्ञानं भवति। द्वितीयप्रकारे तु प्रमाणशब्देन राशिरुच्यते। प्रमाणानि पंक्तित्रये स्थाप्यानि, प्रत्येकपंक्तौ राशिद्वयं लेख्यं, तत्र प्रथमपंक्तौ घातनिष्पत्तेः राशिद्वयं स्थाप्यं, मध्येऽवकाशं यथा स्यात्तथा द्वितीयपंक्तौ घातरहितनिष्पत्ते-

---

(घ) १. भूमिनिष्पत्योर्घा for (भूम्यो र्निष्पत्तिघा)

२. क्षेत्रयो र्निष्पत्ति for (क्षेत्र फलयो र्निष्पत्ति)

३. खक for (कख)

४. भिन्नानि for (विलोमानि) ५. पिंडयुते for (पिंडेन युते)

Indira Gandhi National Centre for the Arts

रंत्यावकाशं यथा स्यात्तथा राशिद्वयं स्थाप्यं । तृतीयपंक्तौ घातरहितद्वितीयनिष्पत्तेराद्यावकाशं यथा स्यात्तथा राशिद्वयं स्थाप्यं[1]। अनया क्रियया यदि क

क		ख
ग	घ	
	ह	व

प्रमाणमज्ञातं भवति । तदा कखमध्ये एको राशिस्तथा कल्पनीयो यस्य खराशिना निष्पत्तिर्हराशिवराश्योर्निष्पत्तिरिव स्यात् । असौ भूः[2] कल्पनीयः । तस्मात् कराशेर्निष्पत्तिर्भू[3]राशिना गराशिघराश्यो र्निष्पत्तिरिव जाता, तदा कराशिरपि ज्ञातो भविष्यति । वागघांते तादृशो राशिरुत्पाद्यः, घराशेर्निष्पत्तिस्तेन तथा भवति । यथा हराशेर्निष्पत्तिर्वराशि नास्ति, सराशिर्यः कल्पनीयः, तस्मात्कराशेर्निष्पत्तिः खराशिनागराशियराशिनिष्पत्तिरिव भवेत् । तदा कराशिरपि ज्ञातो भवति ।

अथवा हवराश्योराद्येऽवकाशे राशिस्तथा कल्प्यः, यथा तस्य राशेर्निष्पत्तिर्हराशिना गघराश्योर्निष्पत्तिरिव भवेत् । सः तराशिः कल्प्यः, तदा कराशेर्निष्पत्तिः खराशिना तथा भविष्यति । यथा तराशेर्निष्पत्तिर्वराशिनास्ति तदा कराशिरपि ज्ञातो भविष्यति । अनेन प्रकारेण शेष राशीनां मध्ये योऽज्ञातोस्ति, तस्यानयनं कर्तव्यं ईदृक् क्षेत्रं[4]।

क	भू[5]	ख
ग	घ	य
त	ह	व

इति घातनिष्पत्ति प्रकरणम् ।

अथ कोणस्वरूपं तत्प्रमाणं चोच्यते—

भुजद्वयोत्पन्ना सूची कोणशब्देनोच्यते, तद्भुजद्वयोपरिगतं चापं कोण प्रमाणं भवति । स कोणः केन्द्रगतो भवत्यथवा वृत्तपालिगतो भवति । यदि वृत्तांतरेकं त्रिभुजं क्रियते तदा तत्कोणत्रयेपि परिधिर्विभक्तो भवति । तस्माद्यच्चापप्रमाणं तदेव कोणप्रमाणं भवति । यदि कोणप्रमाणानि ज्ञातानि भविष्यंति, तदा कोणनिष्पत्तयोपि विदिता भवेयुः । तद्भुजनिष्पत्तयोपि ज्ञाता भवेयुः । पुनः

(घ) १. + तृतीयपंक्तौ घातरहितद्वितीयनिष्पत्तेराद्यावकाशं यथा स्यात्तथा राशिद्वयंस्थाप्यं +
२. भ्र for (भूः)　　　　३. भ्रराशि for (भूराशि)
४. + भवति +　　　　५. भ्र for (भू)

Indira Gandhi National Centre for the Arts

समकोणप्रमाणं परिधौ भार्द्धांशमितमस्ति, यद्येते कोणाः केन्द्रसमीपस्थाः क्रियन्ते । तदैतत्प्रमाणानि पूर्वप्रमाणेभ्योऽर्द्धं मितानि स्युः । कुतः, कोणानां चापनिष्पत्तेरूत्पन्नत्वात्, पुनः केन्द्रकोणाः वृत्तपालिकोणेभ्यो द्विगुणा भवन्ति । यदि द्वयोश्चापे समाने भवतः, पुनर्वृत्तकोणानां चापानि केन्द्रकोणचापेभ्यो द्विगुणितानि भवन्ति, यदि द्वौ कोणौ समानौ भवतः ।

इति कोणस्वरूपं सप्रमाणं निरूपितं ।

अथ कोणसन्मुखभुजानां कोणजीवानां निष्पत्तिः समाना भवतीत्याह—

कोणसन्मुखबाहूनां निष्पत्तिर्गदिता यदा ।
तत्कोणजीवयोश्चापि निष्पत्तिर्विदिता भवेत् ॥१॥[1]

सुगमार्थं ।

यथा कखस्य निष्पत्तिः कगेनास्ति तथा पुनः ।
गकोणजीवा निष्पत्तिर्हंकोणस्य च जीवया ॥२॥[2]

सुगमार्थं ।

अत्रोपपत्तिः–गकोणखकोणभुजौ वर्द्धनीयौ गदगह् खवखतरेखाश्च समानाः कार्याः । पुनर्गकेन्द्रं कृत्वा खकेन्द्रं च कृत्वा समानरेखार्द्धव्यासेन दहचापं वतचापं च कार्यं, पुनर्हभूलं[3]वतघलम्बौ दवरेखायां कार्यौ, एतौ लम्बौ गकोण खकोणयोर्ज्ये भवतः । पुन. कलम्बः गखरेखायां कार्यः, तत्र कलगत्रिभुजं हभूग[4]त्रिभुजं सजातीयं भविष्यति । तत्र हभूकल[5]रेखयोर्निष्पत्तिः गहकगरेखयो र्निष्पत्या समाना भवति । पुनः कलखत्रिभुजं तघखत्रिभुजं च सजातीयमस्ति । तत्र कलत्रघ[6]रेखयोर्निष्पत्तिः कखतखरेखयोर्निष्पत्या समाना भवति । अत्र कखरेखाया निष्पत्तिः गहरेखयाप्यस्ति, तखगहयोस्तुल्यत्वात्, तस्मात् हभू[7]जीवा या निष्पत्तिः तघजीवया

(घ) १. ॥१॥ for (१)
२. ॥२॥ for (२)
३. भ्फलं for (भूलं)
४. हभ्फग for (हभूग)
५. हभ्फकल for (हभूकल)
६. कलतघ for (कलत्रघ)
७. हभ्फ for (हभू)



IGNCA RAR
ACC No. R. 520
Indira Gandhi National Centre for the Arts

तथास्ति यथा कखभुजनिष्पत्तिः कगभुजेन, अत्र हभूतघयोः प्रमाणयोर्मध्ये कल-प्रमाणमस्ति । तस्मात् $\begin{bmatrix} \text{हभू}^{२}\text{० कल} \\ \text{गह० कग} \end{bmatrix}$ हभू[३]तघयोर्निष्पत्तिर्घातनिष्पत्तिर्जाता $\begin{bmatrix} \text{कल० तग}^{४}\text{०} \\ \text{कख० तख०} \end{bmatrix}$ कयोः हभू[५]कलनिष्पत्तिसमानगहगकनिष्पत्ति कल तघनिष्पत्ति समानकखतखनिष्पत्त्योर्घातोस्ति । अत्र षट्सु प्रमाणेषु गहतखप्रमाणे त्रिज्या । तुल्ये समाने एते उभयोर्घन फलयोः पिंडरूपे कल्पिते । अत्रावशिष्टं प्रमाणचतुष्टयं सजातीयं जातं, तस्मात् हभू[६]तघयोर्निष्पत्तिः कखकगनिष्पत्तितुल्या जाता । प्रथमं प्रमाणद्वयं गखकोणयोर्जीवे स्तः । अपरं प्रमाणद्वयं भुजौ स्तः । तदेवं कोणजीवानां कोण भुजानां च निष्पत्तिस्तुल्या भवतीत्युपपन्नं । $\begin{matrix} \text{हभू}^{७} & \text{तघ} \\ \text{गह} & \text{कग ।} \\ \text{कख} & \text{तख} \end{matrix}$

अथ समकोणत्रिभुजे द्वौ भुजौ जातौ स्तः, वा समकोणातिरिक्तैकः कोणः ज्ञातो भवति । तदा शेषकोणाः शेषभुजाश्च ज्ञाता भविष्यन्ति । कुतः, समकोणः सदा ज्ञात एवास्ति । ज्ञातकोणस्य कोटिस्तृतीयकोणो भवति । भुजयोर्निष्पत्तिः कोणजीवयोर्निष्पत्तिरिवास्ति । स[८]दा समकोणातिरिक्तश्चैककोणो ज्ञातोस्ति । भुजः कोपि न ज्ञातोस्ति, तदा प्रोक्तप्रकारेण कोणाः सर्वे ज्ञाता भविष्यंति । भुजानां निष्पत्तयश्च ज्ञाता भविष्यन्ति । परन्तु भुजप्रमाणानि न ज्ञातानि भविष्यन्ति । यद्येको भुज एव ज्ञायते तदा न किमपि ज्ञातं भवति । यदि समकोणत्रिभुजं न स्यात् । तत्र यदा सर्वे भुजा[९] ज्ञाता अपेक्षिता भवंति, वा भुजद्वयमेकः कोणश्च ज्ञातो भवति । तदा शेषकोणा[१०] भुजा अपि विदिताः स्युः । केन प्रकारेण तद्यथा—एककोणा-

---

(घ) १. हभ्म for (हभू) २. हभ्म for (हभू)
३. हभ्मतकयो for (हभूतघयो) ४. तघ for (तग)
५. हभ्म for (हभू) ६. हभ्मतघयो for (हभूतघयो)
७. हभ्म for (हभू) ८. यदि for (सदा)
९. भुजाः for (भुजा) १०. कोणाः for (कोणा)

Indira Gandhi National Centre for the Arts

त्तत्सन्मुखस्थो लम्बः कार्यः। अनेन त्रिभुजद्वयं समकोणं भविष्यति। ताभ्यां पूर्वोक्त-प्रकारेण भुजज्ञानं ज्याज्ञानं च भविष्यति। यदि चैको भुजः कोणद्वयं च ज्ञातं स्यात्, तदा शेषं लम्बनिष्काशनेन[1] बिनैव ज्ञातं स्यात्। कुतः, कोणद्वययोगश्चे-द्भार्द्धांशेभ्यः १८० शोध्यते, शेषं तृतीयकोण एव भवति। भुजयोर्निष्पत्तिस्त-त्कोणज्ययोर्निष्पत्तिरेवास्ति। यदि कोणत्रयं ज्ञातं स्यात्, भुजः कोपि न ज्ञातः स्यात्। तदोक्तप्रकारेण भुजनिष्पत्तयो ज्ञाताः भविष्यन्ति, नतु भुजप्रमाणानि। यदि चैकः कोणो ज्ञातो वैको भुजो ज्ञातः स्यात्। वा एककोणभुजौ ज्ञातौ वा भुजद्वयमेव ज्ञातं न कोपि कोणस्तदा किमपि शेषं न ज्ञातं स्यात्।

इति भुजनिष्पत्ति जीवानिष्पत्ति समाना भवतीति निरूपितं।

इति द्वितीय भागः

(घ) १. निष्कासनेन for (निष्काशनेन)

—:o:—